ગુજરાત રાજ્યના શિક્ષણવિભાગના પત્ર-ક્રમાંક
મશબ /1220/583/ છ, તા. 29/08/2020 - થી મંજૂર

# वेदः १

## मध्यमा २

## ( ધોરણ 12 )

**प्रतिज्ञापत्रम्**

भारतं मम देशः ।
सर्वे भारतीयाः मम भ्रातरः भगिन्यः च सन्ति ।
मम मानसे देशस्पृहा अस्ति । समृद्धिसहितं विविधतापरिपूर्णं
तस्य संस्कृतिगौरवम् अनुभवामि ।
अहं सदा तत्पात्रं भवितुं यत्नं करिष्यामि ।
अहं मम पितरौ आचार्यान् गुरुजनान् च प्रति आदरभावं धारयिष्यामि ।
प्रत्येकेन सह शिष्टव्यवहारं च करिष्यामि ।
अहं मम देशाय देशबान्धवेभ्यः च मम निष्ठाम् अर्पयामि ।
तेषां कल्याणे समृद्धौ च एव मम सुखम् अस्ति ।

**मूल्यम् : ₹ 15.00**

**गुजरातराज्यशाळापाठ्यपुस्तकमंडळम्**
**'विद्यायनम्', सेक्टर 10-ए, गांधीनगरम्-382010**

© गुजरात राज्यशाला पाठ्यपुस्तक मण्डलम्, गांधीनगरम्
अस्य पाठ्यपुस्तकस्य सर्वेऽधिकारा:गुजरातराज्यपाठ्यपुस्तक मण्डलहस्तका: सन्ति । अस्य पाठ्यपुस्तकस्य कश्चिदपि भाग: केनापि रूपेण गुजरातराज्यपाठ्य-पुस्तकमण्डल-नियामकस्य लिखितानुमत्या विना प्रकाशयितुं न शक्येत ।

**विषयमार्गदर्शनम्**
डॉ. प्रवीण महेता

**लेखनम्**
डॉ. शत्रुघ्न पाणिग्राही
श्री विमल व्यास
श्री राज शर्मा
श्री केवल जोषी

**समीक्षणम्**
डॉ. राजेन्द्रकुमार पण्डया
डॉ. कुलदीप पुरोहित:
श्री निसर्ग उपाध्याय:
श्री पराग पाठक:

**भाषाशुद्धि:**
डॉ. चिंतनकुमार दवे

**संयोजनम्**
डॉ. क्रिष्ना दवे
(विषय-संयोजक : अंग्रेजी)

**निर्माणायोजनम्**
श्री हरेन शाह
(उपनियामक: शैक्षणिक:)

**मुद्रणायोजनम्**
श्री हरेश ऐस. लीम्बाचीया
(उपनियामक: उत्पादनम् )

## प्रस्तावना

प्राच्यगुरुकुलपरम्परानुसारम् अध्ययनं कुर्वतां-छात्राणां कृते प्राचीनार्वाचीनयो: अध्ययनाध्यापनयो: पद्धत्यो: समन्वयं कृत्वा गुजरात राज्य-माध्यमिकोच्चतरमाध्यमिक शिक्षणसमिति: (बोर्ड) द्वारा नूतना-अभ्यासक्रमसंरचना कृता अस्ति। गुजरातसर्वकारद्वारा प्रमाणिता: मानिता: च अभ्यासक्रमा: सन्ति।

गुजरातसर्वकारद्वारा प्राप्तमान्यताया: **मध्यमा २ (कक्षा १२) वेद: १** इति विषयस्य नूतनाभ्यासक्रमानुसारं सज्जीकृतमिदं पुस्तकं-प्रकाशनात् प्राक् विषयज्ञै: सर्वाङ्गीणतया-समीक्षितं संसूचितपरिवर्तनानुसारं हस्तलिखितेषु लेखेषु योग्यतया संशोधनानन्तरं प्रकाशितमस्ति।

प्रस्तुतं पाठ्यपुस्तकं कक्षानुसारम् उपयोगि परिशुद्धं कर्तुं मण्डलद्वारा कृते प्रयत्नेऽपि न्यूनतापरिपूर्णार्थं विद्वद्भि: सूचिता: सूचना: सादरं स्वीकरणीया: एव।

**पी. भारती (IAS)**
नियामक:      कार्यवाहकप्रमुख:
ता. 26-10-2020      गान्धीनगरम्

**प्रथमावृत्ति: 2020**

**प्रकाशक:** - गुजरातराज्यशालापाठ्यपुस्तकमंडलम्, विद्यायनम्, सेक्टर 10-ए, गान्धीनगरप्रातिनिध्येन, पी. भारती, नियामक:
**मुद्रक:** -

# मूलभूतकर्तव्यानि

**प्रत्येकस्य भारतीयनागरिकस्य कर्तव्यानि निम्नानुसारं स्युः । ***

(क) संविधानं प्रति प्रामाणिकत्वम् आदर्शत्वं संस्थानां राष्ट्रध्वजस्य राष्ट्रगीतस्य च आदरः ।

(ख) स्वातन्त्र्याय अस्मदीयराष्ट्रियसत्याग्रहं प्रेरयताम् आदर्शानां हृदये प्रतिष्ठापनम् अनुसरणं च ।

(ग) भारतस्य सार्वभौमत्वस्य एकतायाः अखण्डिततायाश्च समर्थनं सद्रक्षणं च ।

(घ) देशस्य रक्षणं राष्ट्रयसेवायै उद्घोषणायां जातायां तदनुसरणञ्च ।

(च) धार्मिक-भाषाकीय-प्रादेशिकेभ्यः धार्मिकेभ्यो वा भेदेभ्यः परं स्थित्वा, समस्तभारतीयेषु साम्मनस्य- समानबन्धुत्वभावनायाः वृद्धिः, स्त्रीणां गौरव-हानिकारकव्यवहारत्यागश्च ।

(छ) अस्माकं समन्वितसंस्कृतेः समृद्धदायस्य मूल्यं ज्ञात्वा तदवग्रहः ।

(ज) वनानां तडागानां नदीनाम् अन्यवन्यपशुपक्षिसहितं प्राकृतिकपर्यावरणरक्षणं तद्वर्धनं तथा जीवमात्रं प्रति अनुकम्पाभावः ।

(झ) वैज्ञानिकमानसाय मानवतावादाय जिज्ञासायै सुधारणायै च भावनाभिगमाभिबोधः ।

(ट) सामान्यसम्पत्तिरक्षणं हिंसायाः त्यागश्च ।

(ठ) राष्ट्रपुरुषार्थस्य सिद्धेश्च अधिकाधिकमुन्नतसोपानानि प्रति सततं प्रगतिशीलं स्यात्तदर्थं वैयक्तिकसामूहिकप्रवृत्तीनां समस्तक्षेत्रेषु श्रेष्ठत्वम् आसादयितुं प्रयत्नः ।

(ड) मात्रा पित्रा अथवा अभिभावकेन षड्वर्षतः चतुर्दशवर्षं यावत् (6 तः 14)वयसे बालकाय अथवा पाल्याय शिक्षणलाभाः देयाः ।

* भारतीयं संविधानम् : अधिनियमः 51-क

# अनुक्रमणिका


| | | |
|---|---|---|
| १. | वेदानां शाखापरिचयः | 1 |
| २. | वेदोऽखिलो धर्ममूलम् | 8 |
| ३. | वेद-भाष्यकाराणां परिचयः | 13 |
| ४. | याज्ञवल्क्य परिचयः | 21 |
| ५. | ऋग्वेदेरुद्राभिषेकमन्त्राः १ | 25 |
| ६. | ऋग्वेदेरुद्राभिषेकमन्त्राः २ | 32 |
| ७. | मेधासूक्तम् ( ऋग्वेदीयम् ) | 38 |
| ८. | शुक्लयजुर्वेदे-षष्ठोऽध्यायः १ | 43 |
| ९. | शुक्लयजुर्वेदे-षष्ठोऽध्यायः २ | 50 |
| १०. | शुक्लयजुर्वेदे-सप्तमोऽध्यायः १ | 57 |
| ११. | शुक्लयजुर्वेदे-सप्तमोऽध्यायः २ | 67 |
| १२. | सामवेदे-आग्नेयकाण्डम् | 76 |
| १३. | अथर्ववेदे रुद्राभिषेकयमन्त्राः १ | 82 |
| १४. | अथर्ववेदे रुद्राभिषेकयमन्त्राः २ | 88 |
| १५. | वेदमन्त्राणां नानाविधप्रयोगाः | 93 |
| १६. | वेदपारायणम् एवं वेदपरम्परा | 99 |
| १७. | पुरुषसूक्तस्य पदपाठः | 103 |

# १ वेदानां शाखापरिचयः

**प्रस्तावना**

संस्कृतवाङ्मये वेदानां स्थानं सर्वोपरि वर्तते । वेदा:संस्कृतसाहित्यस्य न अपि तु विश्वसाहित्यस्य प्राचीनतमाः ग्रन्थाः सन्ति । भूमण्डलेऽस्मिन् समुपलब्धेषु विविधभाषागतप्राचीनग्रन्थेषु वेदः सर्वेभ्यः प्राचीनतममः इति सर्वैः अङ्गीक्रियन्ते। अर्थात् परमात्मनः निश्वासभूतोऽयं वेदः विश्वब्रह्माण्डस्य ज्ञानदीपो वर्तते ।

**यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।**

**निर्ममे तमहं वन्दे विद्यातीर्थं महेश्वरम् ॥**

(छान्दोग्यब्राह्मणम् - ५-९)

| वेद | | शाखा |
|---|---|---|
| **ऋग्वेदः** | - | **शाकलः, बाष्कलः** |
| **यजुर्वेदः** | - | **माध्यन्दिनी (वाजसनेयि), काण्वः, तैत्तिरीय, मैत्रायणीय, कठः, कपिष्ठलः** |
| **सामवेदः** | - | **कौथुमी, राणायणीय, जैमिनीय** |
| **अथर्ववेदः** | - | **शौनकः, पिजलादः** |



वेदः परमात्मना प्रदत्तं वैदिकज्ञानमस्ति स मानवानां कृते कर्तव्याकर्तव्यानाम् आहारव्यवहाराणां भगवदाराधनादीनां यजनयाजनादीनाञ्च सर्वेषां प्रश्नानां समाधानं वेदेषु विद्यते । चतुर्ण्णां वेदानां पृथक् पृथक् शाखाः भवन्ति । एतासां शाखानां पठनेन अध्ययनेन वा मानवः सम्पूर्णं ज्ञानं प्राप्नोति ।

शाखानां प्रचारः प्रसारञ्च ऋषिभिः स्वशिष्यैः विस्तारितः । तदेव वर्णनमत्र प्रस्तूयते । यज्ञस्यावश्यकतामभिलक्ष्य उदात्तदृष्ट्या महामुनिना व्यासेन स्वशिष्यान् वेदमध्यापितः । यज्ञे चत्वारः ऋत्विजो भवन्ति । १ होता २ अध्वर्युः ३ उद्‌गाता ४ ब्रह्मा ।

**होता** :- आवाहनकर्ता स हि यज्ञावसरे प्रक्रान्तदेवानां प्रशंसां रचितान् मन्त्रान् उच्चारयन् देवतामाह्वयति तत्कार्याय सङ्कलिताः मन्त्राः स्तुतिरूपाः ऋचः समाख्याताः तेषां सङ्ग्रहः एव ऋग्वेदः । एतमुद्देश्यमभिलक्ष्य व्यासः पैलम् ऋग्वेदं पाठयामासः।

**अध्वर्यु** :- अध्वर्युः विधिवत् यज्ञं सम्पादयति । तत्रावश्यकमन्त्राः यजूँषि तत्संग्रहको यजुर्वेदः तदर्थं व्यासेन वैशम्पायनं यजुर्वेदं पाठितम्।

**उद्‌गाता** :- उच्चस्वरेण गानकर्ता स हि स्वरबद्धान् मन्त्रान् उच्चैः गायति । तदपेक्षितमन्त्राणां संग्रहः सामवेदः व्यासेन कविजैमिनीं सामवेदमध्यापितम् ।

**ब्रह्मा** :- यज्ञनिरीक्षकः कृताकृतान्वेक्षणकर्ता स हि सर्वविधमन्त्रज्ञः तदपेक्षितो मन्त्रराशिः अर्थववेदः इति यज्ञनिरीक्षणकार्यसम्पादनाय मुनिना व्यासेन सुमन्तुमुनिम् अथर्ववेदं पाठितम् ।

तत्रर्ग्वेदधरः पैलः
सामगो जैमिनिः कविः ।
वैशम्पायन एकैको
निष्णातो यजुषामुतः ॥
अथर्वाङ्गिरसासमासीत्
सुमन्तुर्दारुणो मुनिः ॥

(भागवतपुराणम् १-४-२१)

भाष्यकारपतञ्जलिना महाभाष्ये पस्पशाह्निके उक्तं यत् ''चत्वारो वेदाः साङ्गाः सरहस्याः बहुधाभिन्नाः'' । एकशतमध्वर्युः शाखा । सहस्रवर्त्मा सामवेदः एकविंशतिधा बाह्वृच्यम् । नवधाऽथर्वणो वेदः ।

## ऋग्वेदशाखा

ऋग्वेदो ज्ञानकाण्डमस्ति । ऋग्वेदो विश्वसाहित्यस्य प्राचीनतमो ग्रन्थोऽस्ति । भाष्यकारः पतञ्जलिमतानुसारम् ऋग्वेदस्य एकविंशतिः शाखाः सन्ति । परन्तु साम्प्रतकाले शाकल-बाष्कल-आश्वलायन-शाङ्खायन-माण्डूकायनाः पञ्चैव शाखाः प्रसिद्धास्सन्ति ।

### १ शाकलशाखा

सम्प्रति प्रचलिता ऋग्वेदस्य संहिता शाकलशाखीया एव वर्तते । अस्याः संहितायाः अन्ते ऋक् परिशिष्ट नाम्ना सङ्गृहीतानि षट्त्रिंशत् ३६ सङ्ख्यकानि सूक्तानि सन्ति । एतेषु सूक्तेषु कानिचित् सूक्तानि अतीव प्रख्यातानि सन्ति। यथा श्रीसूक्तम्, रात्रिसूक्तम्, मेधासूक्तम्, शिवसङ्कल्पसूक्तञ्चेति । शाकलशाखायां सप्तदशाधिकानि सहस्रसंख्यकानि १०१७ सूक्तानि सन्ति ।

### २ बाष्कलशाखा

यद्यपि सम्प्रति बाष्कलशाखासंहितायाः अध्यापनं न भवति । तथाऽपि अस्याः शाखायाः विशिष्टं वर्णनं समुपलभ्यते।

ऋक्परिशिष्टस्यान्तिमसूक्ते अन्तिममन्त्ररूपेणैयमृक् समुपलभ्यते । अस्मादेव सूक्तात् बाष्कलशाखा संहितायाः समाप्तिः भवति । बाष्कलशाखानुसारेण पञ्चविंशत्युत्तरसहस्रसंख्याकानि १०२५ सूक्तानि ऋग्वेदे सन्ति ।

**३ आश्वलायनशाखा**

साम्प्रतमस्याः शाखायाः अध्ययनं न हि जायते । परन्तु आसीत् कश्चन कालविशेषः यदस्याः शाखायाः ऋक्संहिताऽसीत् यतः १७ शताब्दस्य कवीन्द्राचार्यस्य सूच्यामस्य ग्रन्थस्य नाम स्पष्टरूपेण समुपलभ्यते । किन्तु अधुना अस्याः शाखायाः गृह्यसूत्रश्रौतसूत्रे समुपलभ्येते ।

**४ शाङ्खायनशाखा**

साम्प्रते अस्याः शाखायाः ब्राह्मणारण्यकग्रन्थौ प्रकाशितौ स्तः । बहूनां समालोचकानां मतानुसारेण शाङ्खायनशाखा कौषीतकिशाखेति ऋग्वेदस्यैकस्या एव शाखायाः नामद्वयं वर्तते।

**५ माण्डूकायनशाखा**

अस्याः अपि शाखायाःउपलब्धिर्नहि जायते । किन्तु तत्र अस्याः

शाखायाः ग्रन्थानाम् उद्धरणमात्रमवेक्ष्य शाखायाः अनुमानं क्रियते ।

## यजुर्वेदशाखा

चतसृष्वपि संहितासु यजुः संहिता अतीव महत्त्वपूर्णाऽस्ति । यजुर्वेदे सर्वविधानामपि यज्ञयागादीनां वर्णनं विद्यते। कृष्णयजुः शुक्लयजुर्भेदेन सा द्विविधा विभक्ता ''अनियताक्षरावसानो यजुः'' अर्थात् यत्राक्षराणां सङ्ख्यानियता निश्चिता वा नास्ति तद्यजुः । गद्यात्मको यजुस्तथा शैषेयजुः यद्दक् सामभ्यां भिन्नं गद्यात्मकं मन्त्राणाम् अभिधानमेव यजुः वर्तते। एकशतमध्वर्युः शाखा शुक्लयजुर्वेदस्य पञ्चदशशाखाः विद्यन्ते । तासु साम्प्रते द्वे शाखे स्तः ।

शुक्लयजुर्वेदस्य वाजसनेयी संहिता अतीव विख्याताऽस्ति अस्याम् चत्वारिंशदध्यायेषु अन्तिमाः पञ्चदशाध्यायाः खिल रूपेण प्रसिद्धकारणात् अवान्तरयुगीयाः मन्यन्ते । शुक्लयजुर्वेदस्य माध्यन्दिनशाखा एवं काण्वशाखा चेति द्वे शाखे स्तः। प्रथमा उत्तरभारते प्राप्यते । द्वितीया च महाराष्ट्रे प्राप्यते । अनयोः शाखयोः संहिते भिन्ने सति अपि स्वल्पमेवभेदं धारयतः बहुषु अंशेषु समरूपता वर्तते । कृष्णयजुर्वेदस्य पञ्चाशीति शाखासु चतस्र एव शाखाः समुपलब्धाः सन्ति ताश्च शाखाः यथा –

१ तैत्तिरीयशाखा, २ मैत्रायणीशाखा, ३ काठकशाखा, ४ कपिष्ठलशाखा

**१ तैत्तिरीयशाखा**

इयं हि कृष्णयजुर्वेदस्य प्रधानशाखा वर्तते । अत्र सप्त ७ खण्डाः सन्ति । ते च खण्डाः अष्टकशब्देन काण्डशब्देन च व्यवह्रियन्ते । प्रकाण्डे कतिपयाः अध्यायाः सन्ति । अत्र अध्यायाः प्रपाठकशब्देन अपि अभिधीयन्ते । अस्याः शाखायाः प्रसारः दक्षिणभारते वर्तते । आन्ध्राः द्रविडाश्च समग्रतया महाराष्ट्रीयाः च अंशतः अस्याः शाखायाः अनुयायिनः सन्ति। अस्याः शाखायाः विद्वत्तापूर्णभाष्यम् आचार्यः सायणः अलिखत् ।

**२ मैत्रायणीशाखा**

कृष्णयजुर्वेदस्येयं शाखा गद्यपद्यात्मिका वर्तते । अस्यां संहितायां चत्वारि काण्डानि सन्ति । अस्यां संहितायां २१४४ मन्त्राः सन्ति, येषु १७०१ ऋचः प्रतिकाण्डम् ऋग्वेदात् सङ्गृहीताः सन्ति ।

**३ काठकशाखा**

यजुर्वेदस्य सप्तविंशतिशाखासु काठकशाखान्यतमा वर्तते । महाभाष्यानुसारेण कठशाखायाः प्रतिग्रामं प्रचारः आसीत्। तथाहि ग्रामेग्रामे काठकं कलापकं च प्रोच्यते इति महाभाष्यवाक्यम् । अनेनास्याः शाखायाः प्राचीनकाले प्रचुरः प्रसारः अनुमीयते । कठसंहितायाम् पञ्चखण्डाःसन्ति । ते च खण्डाः इठिमिका, मध्यमिका, आरमिका, याज्यानुवाक्या,

अश्वमेधानुवचनमिति नामभि: प्रख्याता: सन्ति । मन्त्राणां संख्या ३०९१ एकनवत्यधिकत्रिसहस्रं वर्तते । मन्त्रब्राह्मण सम्मिल्य १८००० अष्टादशसहस्र मन्त्रा: सन्ति ।

**४ कपिष्ठलशाखा**

कपिष्ठलनामक: कश्चन ऋषिरासीत् । ''कपिष्ठलो गोत्रे'' इति सूत्रे भगवान् पाणिनि: कपिष्ठलस्योल्लेखं करोति स्म । निरुक्तस्य व्याख्याकार: दुर्गाचार्य: अपि कापिष्ठल आसीत् । इत्याह स्वयमेव स: अहञ्च कापिष्ठलो वसिष्ठ: इत्यस्मिन् वाक्ये । अस्या: शाखाया: एकैव ग्रन्थ: समुपलभ्यते । सोप्यपूर्णा: वर्तते । काठक संहिताया: अनेकविधं पार्थक्यमस्ति। अस्या: स्वराङ्कनपद्धति: ऋग्वेदेन सह मिलति । ऋग्वेद इव अयमपि ग्रन्थ: अष्टकेषु अध्यायेषु च विभक्तो वर्तते। अस्मिन् ग्रन्थे षट् अष्टका: सन्ति ।

## सामवेदशाखा

जैमिनि: स्वपुत्रं सुमन्तुं सुमन्तु: स्वात्मजं सुन्वन्तं सुन्वान् स्वपुत्रं सुकर्माणं सामवेदं पाठयामास । महर्षि: पतञ्जलिस्तु ''सहस्रवर्त्मा सामवेद:'' इति प्राह किन्तु सम्प्रति सामवेदस्य तिस्र: एवशाखा: समुपलभ्यन्ते । १. कौथुमीशाखा, २. राणायणीयशाखा, ३. जैमिनीयशाखा । आसां परिचय: अधस्तादुपस्थाप्यते ।

**१ कौथुमीशाखा**

अस्या: सामवेदस्य शाखाया: संहिता सर्वाधिकलोकप्रसिद्धा वर्तते । अस्या: ताण्डयनामकशाखाऽपि समुपलभ्यते। आचार्य: शङ्कर: स्वकीये भाष्ये अनेकस्थानेषु अस्या: शाखाया: नामोल्लेखं चकार । तेनास्या: शाखाया: गौरवं सूच्यते। पञ्चविंशतिकाण्डात्मक: २५ विपुलकाय: ताण्ड्यमहाब्राह्मणग्रन्थ: अस्या: एव शाखाया: वर्तते । छान्दोग्योपनिषद् अस्या: शाखाया: एव वर्तते ।

**२ राणायणीशाखा**

इयं शाखा कौथुमीशाखाया: नितरां भिद्यते । मन्त्रगणनदृष्ट्या उभावप्येकैव स्त: उभयो: उच्चारणे यत्र तत्र भिन्नता जायते । कौथुमशाखाया: यत्र हाउ राइ इत्युच्चारयन्ति तत्र राणायणीया: हावु रायी इत्युच्चारयन्ति । छन्दोग्यानां सात्यमुग्रिराणायणीया ह्रस्वानि पठन्तीति । आपिशलिशिक्षाकर्त्राअभिहितम् । अर्थात् एकारस्य औकार स्थाने ह्रस्वोच्चारणं कुर्वन्ति ।

**३ जैमिनीयशाखा**

इयं शाखा पूर्णतया समुपलभ्यते । जैमिनीयशाखा लाहौर नगरत: नागराक्षरेषु प्रकाशिताऽस्ति । अस्यां शाखायां मन्त्राणां संख्या १६८७ वर्तते । सम्पूर्णे ग्रन्थे गानसंख्या १२२८ वर्तते । यद्यपि कौथुमीयसामसंहितात: जैमिनीयसामसंहिताया: पाठो न भिद्यते तथापि गानप्रकारस्तु उभयो: भिद्यते एव ।

## अथर्ववेदशाखा

ऋग्वेदादयस्त्रयो वेदा आमुष्मिकाणां फलानां प्रदातार: सन्ति । किन्त्वथर्ववेद: ऐहिकमपि फलं प्रयच्छति । जीवनं सुखमयं कर्तुं येषां साधनानामावश्यकता भवति तेषां सिद्धयर्थमिह अनेकेषामनुष्ठानानां निर्देश: कृतो वर्तते । महर्षि: पतञ्जलि: पस्पशाह्निके अथर्ववेदस्य नवशाखानां निर्देशं करोति । १ पिप्पलाद: २ स्तौद: ३ मोद: ४ शौनकीय: ५ जाजल: ६ जलद: ७ ब्रह्मवद: ८ देवदर्श: ९ चारणवैद्यारण्या: । साम्प्रतमथर्ववेदस्य द्वे एव शाखे समुपलभ्येते । १ पिप्पलाद: २ शौनक: इति ।

**१ पिप्पलादशाखा**

मुनि: पिप्पलाद: एको महान् अध्यात्मवेत्ताऽसीत् । पुरा अस्य संहिताया: विशेषा ख्याति: आसीत् । पिप्पलादसंहिताया: एक ग्रन्थ: शारदालिप्यां काश्मीरे समुपलब्धोऽभूत् । स: च ग्रन्थ: काश्मीर नृपतिना जर्मनविदुषे रोथमहोदयाय उपहाररूपेण प्रेषितोऽभूत् । पिप्पलादशाखाया: मन्त्रसंहिता विंशतिकाण्डेषु विभक्ताऽस्ति ।

**२ शौनकशाखा**

अथर्ववेदसंहिताशौनकशाखाया: एक वर्तते । अस्यां मन्त्रसंहितायां विंशतिकाण्डानि (२०) एकत्रिंशदुतरसप्तशतानि सूक्तानि (७३१) सप्ताशीत्यधिकनवशतोत्तरपञ्चसहस्रसंख्याकाश्च (५९८७) मन्त्रा: सन्ति । आयुर्वेदविज्ञानस्य महनीयं वर्णनं समुपलभ्यते । रूजां वर्णनं शारीरिकप्रतिकारस्य वर्णनं औषध्यादीनाञ्च वर्णनमत्र समुपलभ्यते । भौतिकविज्ञानस्य चात्र वर्णनं समुपलभ्यते । यस्य सत्यापनं साम्प्रतिकै: वैज्ञानिकै: अपि क्रियते ।

साम्प्रतिकाले चतुर्णाम् वेदानां प्रचलिता: शाखा: अधस्तात् विवेचिता: ।

**वेदा:**

| **ऋग्वेद:** | **यजुर्वेद:** | **सामवेद:** | **अथर्ववेद:** |
|---|---|---|---|
| १ शाकलशाखा | १ शुक्लयजुर्वेद | १ कौथुमी | १ पिप्पलाद: |
| २ बाष्कलशाखा | १ माध्यन्दिनी | २ राणायणी | २ शौनक: |
| ३ आश्वलायन | २ काण्व: | ३ जैमिनी | |
| ४ शाङ्खायन | २ कृष्णयजुर्वेद: | | |
| ५ माण्डूकायन | १ तैत्तिरीय: | | |
| | २ मैत्रायणी | | |
| | ३ काठक: | | |
| | ४ कपिष्ठल: | | |

## शब्दार्था:

**भूमण्डलम्** - पृथ्वीम, **मन्त्रज्ञ:** - मन्त्रविद्, **काण्ड:** - समूह:, **साम्प्रतम्** - वर्तमानम्, **अवसान:** - अन्त:, **उपनिषद्** - शिष्यस्य गुरो: समीपे उपवेशनम् ।

## स्वाध्याय:

**१. निम्नाङ्क्तितानां प्रश्नानां योग्यं विकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) यज्ञे ........................ ऋत्विजो भवन्ति । (त्रय:, चत्वार:, पञ्च)

(२) ........................ महामुनिना स्वशिष्यान् वेदमध्यापित: । (याज्ञवल्क्य, गार्गी, वेदव्यास:)

(३) व्यास: ........................ ऋग्वेदं पाठित: । (पैलं, वैशम्पायनं, जैमिनिं)

(४) एकशतं ........................ शाखा: वर्तन्ते । (होता, अध्वर्यु:, उद्गाता)

(५) साम्प्रते ऋग्वेदस्य ........................ शाखा: उपलभ्यन्ते । (९, ५, ६)

(६) यजुर्वेदस्य ........................ अध्याया: सन्ति । (२०, ३०, ४०)

(७) सामवेदस्य ........................ शाखा सर्वाधिकलोकप्रसिद्धा वर्तते । (कौथुमि, जैमिनीय. राणायणीय)

(८) अथर्ववेदस्य ........................ शाखा: वर्तन्ते । (१०, ९, ८)

**२. निम्नाङ्कितानां प्रश्नानाम् एकैक वाक्येनोत्तराणि लिखत ।**

(१) विश्वसाहित्यस्य प्राचीनतमाः ग्रन्थाः के ?

(२) ऋग्वेदस्य कस्याः शाखायाः नामद्वयं वर्तते ?

(३) यजुर्वेदस्य कौ द्वौ विभागौ स्तः ?

(४) साम्प्रतिके सामवेदस्य कति शाखाः समुपलभ्यन्ते ?

(५) पिप्पलादशाखायां कति काण्डानि सन्ति ?

**३. निम्नाङ्कितानां शाखानां परिचयो देयः ।**

(१) शाकलशाखा

(२) तैत्तरीयशाखा

(३) कौथुमीयशाखा

(४) पिप्पलादशाखा

(५) कपिष्ठलशाखा

**4. निम्नाङ्कित-श्लोक पूर्तिं कुरुत ।**

(१) यस्य निश्वसितं .......................... ।

(२) तदृग्वेदधरः पैलः .......................... ।

**५. शब्दानां परिचयो देयः ।**

(१) चतुर्णाम्

(२) ऋत्विजः

(३) यजूँषि

(४) सूक्तात्

(५) शाखे

(६) अंशेषु

(७) इयं

**६. क्रियापदानां परिचयो देयः ।**

(१) क्रियते

(२) अभूत्

(३) व्यवह्रियन्ते

(४) भिद्यते

(५) लभ्येते

(६) पाठयामास

(७) प्राप्नोति

**७. (अ) सन्धिविच्छेदं कुरुत ।**

(१) भूमण्डलेऽस्मिन्

(२) अथर्वाङ्गिरसमासीत्

(३) प्रसिद्धास्सन्ति

(४) पञ्चैव

**(ब) सन्धिमेलनं कुरुत ।**

(१) ग्रन्थः + अस्ति

(२) सम + उप + लब्धिः + न

(३) छान्दोग्य + उपनिषत्

(४) तत् + यजुः

**छात्र-प्रवृत्तिः**

- चतुर्णाम् वेदशाखानां कोष्ठात्मकं भित्तिचित्रं कुरुत ।

**विशिष्टज्ञानम्**

- अनभ्यासेन वेदानामाचारस्य च वर्जनात् ।
  आलस्यादन्नदोषाच्च मृत्युर्विप्राञ्जिघांसति ॥

**विवरणः**

वेदाभ्यासेन विना वेदिनर्देशानुसारेण
आचरण विना आलस्येन जनः
अन्नदोष लिप्तो भूत्वा मृत्युं प्राप्नोति ।

**वेदः** विद् धातोः ज्ञाने घञ् प्रत्यये वेदः निष्पद्यते ।

**वेदव्यासः** वेदं व्यस्यति पृथक् करोति इति ।

**ऋत्विक्** ऋतौ यजति इति ।

**होता** जुहोति इति होमकर्ता

**अध्वर्युः** अध्वरं यज्ञं यौति सम्पादयति

**ऊद्गाता** उद्गायति साम यः

**ब्रह्मा** बृंहति वर्द्धते यः

**ऋक्** ऋच्यन्ते स्तूयन्ते देवा अनया सा

**शाकलः** शकलेन प्रोक्तम् अधीयते शाकलाः तेषां सङ्ग्रहः घोषो वा

**यजुः** इज्यते अनेन

**मन्त्रः** मन्त्र्यते, गुप्तं परिभाष्यते, मननात् त्रायते

**संहिता** सम्यक् धीयते स्मर्यते वा

**तैत्तिरीय** तैतिरं तित्तिरी प्रोक्त यजुर्वेदीय शाखामधीते वेति वा

**सामः** ऋचामुपरि गानं भवति सः सामः

**अथर्वः** नास्ति यस्मिन् हिंसा सः अर्थः

**शाखा** शाखेति गगनं व्याप्नोति इति शिष्य परम्परा गुरु शिष्य परम्परा अध्ययनम्

●

| २ | वेदोऽखिलो धर्ममूलम् |
|---|---|

# २ वेदोऽखिलो धर्ममूलम्

**प्रस्तावना**

अखिलभूमण्डलेऽस्मिन् समुपलब्धेषु विविधभाषागतप्राचीनग्रन्थेषु वेदः सर्वेभ्यः प्राचीनतमम् इति सर्वैरेव अङ्गीक्रियन्ते। वेदो धर्मनिरूपणे स्वतन्त्रभावेनप्रमाणम् स्मृत्यादयस्तु तन्मूलकतया । श्रुति स्मृत्योर्विरोधे श्रुतिरेव गरीयसी । न केवलं धर्ममूलतयैव वेदाः समादृताः अपि तु विश्वस्मिन् सर्वप्राचीनग्रन्थाः अपि सन्ति । प्राचीनानि धर्मसमाजव्यवहारप्रभृतानि वस्तुजातानि बोधयितुं श्रुतय एव क्षमन्ते ।

**वेदोऽखिलो धर्ममूलं स्मृतिशीले च तदिदाम् ।**

**आचारश्चैव साधुनामात्मन स्तुष्टिरेव च ॥**

(मनुस्मृतिः २.६)

---

''**विद्यन्ते धर्मादयः पुरुषार्थाः यैस्ते वेदाः**'' इति बह्वृच् प्रातिशाख्ये वेदशब्दास्यार्थः अभिहितः वेदः अपौरुषेय। **इष्ट प्राप्त्यनिष्ट परिहारयोरलोकिकमुपायं यो वेदयति स वेदः ।** इत्यनेन वयं ज्ञातुं शक्नुमः यत् अस्माकं कृते किम् इष्टं किम् अनिष्टम् इष्टानिष्टयोः अलौकिकम् उपायं यः ज्ञापयति सः वेदः । इच्छितः वस्तूनां प्राप्तिः एवम् अनिष्ट वस्तूनां परिहारः (त्यागः) एतयोः कृते यत्र अलौकिकाः उपायाः वर्णिताः सन्ति ते ग्रन्थाः वेदाः । इह संसारे मानवाः नानाविधदुःखसन्तापैः सन्तप्यमाना नाधिगच्छन्ति । शान्त्यभवम् इत्यत्र किं कारणम् ? तर्हि नहि कारणेन विना किमपि कार्यं सञ्जायते । अतः यत्कार्यमकल्याणकरं तेन कारणेन तेषां दुःखप्राप्तिभर्वति । अतः तत्परिहाराय कल्याणवीरकर्मणां किमपि विधायकं शास्त्रमावश्यकम् । अस्माकं कृते सनातनवेदाः एव शुभकर्मसु नियोक्तारः इति निश्चियन्ते । यतः कल्याणं, भद्रं, सुखं, शर्मश्च पुण्यकर्मणानुष्ठानेनैव भवति । शुभकर्मणि च तान्येव यानि वेद उपदिशति । वेदविहितं यत्कर्म तत्तु धर्मः इति कथ्यते । वेदाध्ययनं विना भारतीय संस्कृति एवं भारतीय जीवनदर्शनम् अवगन्तुं न शक्यते। वेदाध्ययनं लौकिकाय तथा अलौकिकाय सुखाय कल्पताम् । यद्यपि मोक्ष प्राप्तिः जीवनस्य परमं लक्ष्यं वर्तते । सर्वाविधधर्मस्य मूलं वेदः एव इति मनुः कथयति स्म । अतः तेन उक्तमस्ति ''**वेदोऽखिलो धर्ममूलम्**'' वेदादेवधर्म प्रकटीभूतः ।

सुखस्य मूलं धर्म इति स्वीकृतः । परन्तु धर्मस्यापि मूलमर्थोऽस्ति । वेदार्थानुशीलनाद् ज्ञायते यद् वेदा हि विविधज्ञानविज्ञानराशयः संस्कृतेः आधाररूपाः जीवनस्योन्नायकाः कर्तव्याकर्तव्यावबोधकाः मूल्यप्रदायकाः सन्ति । वेदास्त्वस्माकं श्रेय-प्रेयप्रभृतीनामपि साधनमस्ति । प्राचीनानि धर्म-समाज-व्यवहार प्रभृतिनी वस्तुजातानि बोधयितुं श्रुतय एव क्षमन्ते । वेदास्तु धर्ममूलतयैव सर्वथा समादृताः सन्ति । मनुना प्रोक्तञ्च

**यः कश्चित् कस्यकचिद् धर्मोमनुना परिकीर्तितः ।**

**स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः ॥**

(मनुस्मृतिः २.४७)

भारतीयः संस्कृतेः मूलरूपं वेदेष्वेवोपलभ्यते । यजुर्वेदे प्राप्यते ''**सा प्रथमा संस्कृतिर्विश्ववाराः**'' वैदिकी संस्कृतिः प्रथमा संस्कृतिरासीत् ।

वेदः एव ब्राह्मणानां कृते निःश्रेयस्करः भवति । वेदेष्वध्यात्मदर्शनस्योत्कृष्टभाण्डागारं निक्षिप्तमस्ति । किञ्च तेषां प्रतिपादनरीतिरर्वाचीनं प्रतिपादनशैलीतः सर्वथा भिन्न एव । मानवानां जीवदर्शनं वेदेष्वेव दर्शनीयम् । अतः ब्राह्मणेन निष्कारणेन षडङ्गसहितेन वेदाभ्यासं कर्तव्यमिति

**ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च ।**

(पस्पशान्हिकम् - ९)

यो हि द्विजो वेदमधीत्यान्यत्र श्रमं विदधाति स शूद्रो इह मत: यथा

**योऽनधीत्यो द्विजो वेदमन्यत्र कुरुते श्रमम् ।**

**सजीवन्नेव शूद्रत्वमाशुगच्छति सान्वयः ॥**

यः ब्राह्मणः वेदाध्ययनं न करोति अन्यत्र निरर्थकः विषयेषु श्रमं करोति । तस्य जीवनं शूद्रत्वं अर्थात् स्ववंशेन सह शूद्रत्वं गच्छति । अतः वेदाध्ययनं कर्तव्यम् "**स्वाध्यायोऽध्येतव्यः**" इति "स्व" शब्दः आम्नातः तच्चाऽध्ययनं न काम्यं किन्तु नित्यम् । अत एव पुरुषार्थः अनुशासने सूत्रितम् "**वेदस्याध्ययनं नित्यमनध्ययने पातात्**" अपहता पाप्मा स्वाध्यायो देवपवित्रं वा एतत् तं यम् न तस्य वाच्यपि भागोऽस्ति । अध्येतारं पुरुषं तदीयप्रयास अभिज्ञानेन सखिवत् पालयतीति सखिवद् वेदः । बहुद्रव्यप्रयाससाध्यक्रतुफलस्य अध्ययनमात्रेण सम्पादनं तत्पालनम् ।

**यं यं क्रतुमधीते तेन तेनास्येष्टं भवत्यग्नेर्वायोरादित्यस्य सायुज्यं गच्छति**

(तै. आ. २.१५)

यद्यपि एतद् ब्रह्मयज्ञः स्वाध्यायफलं तथापि ग्रहणार्थः अध्ययनमन्तरेण ब्रह्मयज्ञासम्भवात् तदीय फलमपि सम्पद्यते। इदृशं सखिविदं वेदरूपं सखाय यः पुमान् अध्ययनमकृत्वा परित्यज्य तस्य वाच्यपि भाग्यं नास्ति । फले भाग्यं नास्तीति किम् वेदितव्यम् सकलदेवतानां धर्मस्य परब्रह्मतत्वस्य च प्रतिपादकं वेदमनुच्चार्य परनिन्दानृतकलहादिहेतुं लौकिकीं वार्तां सर्वत्रोच्चार्यतः स्पष्टः एव वाचि भाग्यभावः । यथा

**नानुध्यायाद् बहून शब्दान् वाचो विग्लापनं हि तत् ।**

(बृ. उपनिषद्. ४.४.२१)

आर्याणां सभ्यतासंस्कृतिश्च वेदानेवाधारीकृत्य विराजते । वेदाः न केवलं भारतीयैरपि तु वैदेशिकैः विद्वदिभद्रपि श्रद्धयाऽवलोकिताः सन्ति । महर्षिदयानन्देन सकलसत्यविद्यानां पुस्तकत्वेन वेदस्य महत्वं परिगणयन् वेदानां पठनं पाठनं श्रवणं श्रावणञ्च सकलजनानां प्रमुखं कर्तव्यं प्रतिपादितम् । वेदानां महत्ता न कोऽपि सामान्यतया वर्णयितुं समर्थः । अत्र सर्वाङ्गपूर्णतया मानवजीवनोद्देश्यभूताः धमार्थकाममौक्षाख्याश्चत्वारः अपि पुरुषार्थाः विवेचिताः ।

**न वेदशास्त्रदन्यत्तु किञ्चिच्छास्त्रं हि विद्यते ।**

**निसृतं सर्वशास्त्रस्तु वेदशास्त्रात्सनातनात् ॥**

(याज्ञवल्यस्मृतिः १८)

वेदेषु मानवजीवनोपयोगिनः सर्वेऽपि विषयाः साधु विवेचिताः सन्ति । अनेनैव कारणेन भारतीयाः मनीषिणः वेदानां प्रामाण्ये सर्वथासर्वदा च विश्वसयन्ति । पृथिव्यां निवासं कुर्वन्ति तेषां सर्वेषां जीवानां समानरूपेण कल्याणभावेन वैदिकीः दृष्टिः । ज्ञानस्य विमलाधारासमस्तेऽपि क्षितिमण्डले सर्वास्वपि दिशासु वेदेभ्यः एव निःसृत्य प्रससुः । वेदाः न केवलं भारतीयानाम् अपि तु भूविः सेर्वषामपि मानवजीवानां हितसाधनाय सन्ति ।

**अयं वेदः पृथिवीमन्वविन्दन्**

(तै. ब्रा. ३.७/६)

वेदेषु ऊर्जासंसाधनं, धातुविज्ञानं, जलविज्ञानम्, चिकित्साविज्ञानम्, अरण्यसम्पद् पर्वतसमृद्धिः, अस्त्रशास्त्र निर्माणोपयोगविधिः, अदेवमातृका देवमातृका च कृषिः खनिजशास्त्रं, ज्योतिर्विज्ञानं, सामाजिकव्यवस्थाऽर्थशास्त्रम् इत्यादि उपलभ्यन्ते। वैदिकीसंस्कृतिः कृषिः संस्कृतिः वर्तते । अस्य विचारस्य प्रतिबिम्बं कृषिसूक्ते दृश्यते । कृषिद्वारा मानवस्य कल्याणं भवति । प्राणानां संरक्षणं धान्यद्वारा भवति । धान्यस्य निर्माणं कृषिद्वारा एव भवति । कृषेः कृते ऋतूनाम् अनुकूलता आवश्यकी । पर्जन्यसूक्ते वर्षाकालस्य यथार्थं वर्णनमस्ति । अयं पर्जन्यः वारं वारं गर्जति अतः सः कनिक्रदत् वृषभः उच्यते । अयं पर्जन्यः भुवि गर्भं स्थापयति । पर्जन्यगर्जनया दुष्टानाम् अमङ्गलानाञ्च नाशो भवति ।

**प्रव्वातां वान्ति पतयन्ति विद्युत**

(ऋग्वेदे ५.८.३.४)

**वेदः ज्ञापको वेदयिता वेत्ति चराचरं जगतः स जगदीश्वर विदन्ति येन स ऋग्वेदार्दिवा।**

(यजुर्वेदभाष्यम् २.२१)

वेदेषु ज्ञानं, विज्ञानं, धर्म, दर्शनम्, सदाचारः, संस्कृतिः, नैतिकः, सामाजिकः, राजनैतिकप्रभृतिनन् जीवनौपयोगी विषयाणां सन्निवेशोऽस्ति । यत्र प्रत्यक्षस्य न चानुमानस्य प्रवेशः तत्राऽपि ते प्रविशन्ति ।

**प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते ।**

**एवं विदन्ति वेदेन तस्माद्वेदस्य वेदता ॥**

(तै. बा. ३.१०.११.४)

वेदेषु निहितज्ञानस्य सीमानिर्धारणं भवत्यशक्यम् । अतः **"अनन्ता वै वेदाः"** अनन्त ज्ञान समन्वितास्सन्त्येते वेदाः।

**वेदमेव सदाऽभ्यसेत् तपस्तप्यन् द्विजोत्तमः ।**

**वेदभ्यासो हि विप्रस्य तपः परमिहोच्यते ॥**

(मनुस्मृतिः २.१६६)

यो वेदार्थः जानाति सोऽयमिहलोके सकलं श्रेयः प्राप्नोति । तेन ज्ञानेन तपः परमिहोच्यते । तदेतद् ऐहिक आमुष्मिकञ्च ज्ञानफलं वेदाऽभ्यासेन प्राप्यते ।

**यावतीर्थै देवतास्ताः सर्वा वेदविदि ब्राह्मणे वसन्ति ।**

**तस्माद् ब्राह्मणेभ्यो वेदविद्भ्योः दिवे दिवे नमस्कूर्यान् नाश्लीलं कीर्तयेदेता एव देवताः प्रीणाति ॥**

(तै. आ. २.१५)

न केवलमेतद् देवतात्रयं किन्तु सर्वाऽपि देवताः वेदविदे वसन्ति । तस्माद् ब्राह्मणान् वेदविदो दृष्ट्वा स्मृत्वा वा प्रतिदिनं नमस्कुर्यात् । एवं सति तत्तमन्त्रार्थभूताः सर्वाऽपि देवता वेदार्थविदा स्मर्यमाणतया तदीयहृदये अवस्थिता अयं नमस्कर्तारं तोषयति ।

अतः एवास्माकं राष्ट्रस्य सभ्यता संस्कृति, धर्म, इतिहासादीनां विषयाणां प्रमाणभूतं ज्ञानं प्राप्तुं वेदः सनातनं चक्षुः येन चतुर्वर्णां, चतुराश्रमाणां, त्रयाणां लोकानां कालानाञ्च ज्ञानाय वेदानामध्ययनमनिवार्यं भवति ।

**चातुर्वण्यं त्रयोलोकाश्चत्वाराश्रमाः पृथक् ।**

**भूतं भव्यं भविष्यञ्च सर्वं वेदात् प्रसिद्धयति ॥**

(मनुस्मृतिः १२.९७)

## शब्दार्थाः

**धर्मः** धरति लोकान् ध्रियते पुण्यात्मभिः इति वा । **इष्टं** – इज्यते इष्यते वा यज्ञादि कर्मः । **अनिष्टं** – अवाञ्छितः **अन्वेषणं** – अनुसन्धानम्, **सुखम्** – शर्म, सुखपतीति आत्मवृति गुणविशेषः, **उत्कृष्टम्** – अतिशययुक्तम्, प्रशस्तम्, **पाप्मा** – पापम्, **मनीषिणः** – पण्डितः, **कृषिः** – कर्षणम्, **विद्युत** – विशेषेण द्योतते इति, **द्विजः** – द्विर्जायते, ब्राह्मण, **विप्रः** – विशेषेण प्रति पूरयति षट् कर्माणि इति, **ब्राह्मणः** – ब्रह्मवेदस्तमधीते वासः ।

## स्वाध्यायः

**१. निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) सर्वविधधर्मस्य मूलं ........................ एव अस्ति । (स्मृतयः, वेदः, पुराणानि)

(२) वेदादेव ........................ प्रकटीभूतः । (धर्मः, अर्थः, कामः)

(३) प्राचीनानि धर्म समाज व्यवहारादिनी बोधयितुं ........................ एव क्षमन्ते ।

(स्मृतयः, श्रुतयः, महाभाष्यम्)

(४) वेदः ........................ कृते निःश्रेयस्करः भवति । (क्षत्रियाणानाम्, वैश्यानाम्, ब्राह्मणानाम्)

(५) वैदिकीसंस्कृतिः ........................ संस्कृतिरासीत् । (प्रथमा, द्वितीया, अन्तिमा)

**२. निम्नाङ्कितानां प्रश्नानाम् एकैक वाक्येनोत्तराणि लिखत ।**

(१) कः अपौरुषेय?

(२) वेदाविहितं यत्कर्म तत् किम्?

(३) वेदाध्यनेन विना किम् अवगन्तुं न शक्यते?

(४) भारतीयः संस्कृतेः मूलं कुत्र प्राप्यते?

(५) सर्वे देवाः कुत्र वसन्ति?

**३. (अ) निम्नाङ्कित-श्लोकानां भावार्थं लिखित ।**

(१) यः कश्चित् कस्यचिद् धर्मो मनुना परिकीर्तितः ।
सः सर्वोऽभिहितो वेदे सर्वज्ञान मयो हि सः ॥

(२) योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् ।
सजीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥

(३) चातुर्वण्यं त्रयोलोकाञ्चत्वाराश्रमाः पृथक् ।
भूतं भव्यं भविष्यञ्च सर्वं वेदात् प्रसिद्ध्यति ॥

**(ब) श्लोकपूर्ति विधेया ।**

(१) न वेद शास्त्रदन्यतु .................................. सनातनात् ॥

(२) वेदमेव सदाऽभ्यसेत् .................................. परमिहोच्यते ।।

(३) वेदोऽखिलो धर्ममूलम् .................................. तुष्टिरेव च ॥

**४. निम्नाङ्कितनां प्रश्नानां पञ्च वाक्यैः उत्तराणि लिखन्तु ।**

(१) वेदे कीदृशाः उपायाः वर्णिताः सन्ति?

(२) कः शूद्रत्वम् उच्यते?

(३) किमर्थं वेदानां महत्ता वर्णयितुं न समर्थः?

(४) किमर्थं वेदं सदाभ्यसेत्?

(५) वेदेषु कीदृशं ज्ञानं वर्तते?

५. **शब्दानां विभक्तिपरिचयो देयः ।**

(१) सन्तायै: (४) प्राचीनतायाम्

(२) नियोक्तार: (५) वेदविद्भ्याम्

(३) परब्रह्मण:

६. **क्रियापदानां परिचयो देयः ।**

(१) क्षमन्ते (४) पतयन्ति

(२) सम्पद्यते (५) क्रीणाति

(३) प्रससु:

७. **(अ) सन्धिविच्छेदं कुरुत ।**

(१) कृतेऽस्माकं (४) वेदाभ्यास:

(२) कर्मणामनुष्ठानेन (५) परमिहोच्यते

(३) वेदेष्वध्यात्मदर्शनम्

**(ब) सन्धिमेलनं कुरुत ।**

(१) वेद + अर्थ + अनुशीलनाद् (४) संस्कृति: + च

(२) वेदम् + अधीत्य (५) जगत् + ईश्वर:

(३) जीवन + उद्देश्यम्

**छात्र-प्रवृत्तिः**

- विविधशास्त्रेषु प्रतिपादितधर्मलक्षणम् अवलोकनीयम् ॥

**विशिष्टज्ञानम्**

- वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्यय: ।
  वेदोनारायणो साक्षाद् स्वयम्भूरिति शुश्रुम ॥
- वेद प्रेरित कर्माणि धममिति । वेद निन्दितानि
  कर्माणि अधर्माणि इति । वेदा: साक्षाद् नारायण
  स्वरूपा:, वेदा: स्वयंभुवा इति बह्मवचनम् ।

| ३ | # वेद-भाष्यकाराणां परिचयः |
|---|---|

**प्रस्तावना**

**अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा ।**

**आदौ वेदमयी वाणी यतः सर्वाः प्रवृत्तयः ॥**

इत्यनेन ज्ञायते यत् वेदाः स्वयम्भुवाः अर्थात् वेदाः सृष्टिः आदौ प्रवृत्ताः सन्ति । ते नित्याः कालपरिच्छिन्नाः वर्तन्ते । जीवजगतः सृष्टेः प्राक् अयं वेदः शब्दब्रह्मरूपेण भासमानावस्थायाम् आसीत् । मानवसृष्टेः अनन्तरम् ईश्वरप्रेरणया ऋषयः एतेषां दर्शनं कृतवन्तः । अतः कथ्यते ऋषयः मन्त्रद्रष्टारः न तु कर्तारः । महाभारतस्य शान्तिपर्वणि सप्तानां प्रमुखवेदाचार्याणां नामानि श्रूयन्ते यथा -

**मरीचिरङ्गिराश्चात्रिः पुलस्त्यः पुलहः क्रतुः ।**

**वशिष्ठ इति सप्तैते मानसा निर्मिता हि वै ॥**

**एते वेदविदो मुख्या वेदाचार्याश्च कल्पिताः ।**

**प्रवृत्तिधर्मिणश्चैव प्राजापत्येन कल्पिताः ॥**

महर्षिव्यासः परवर्तिनां मनुष्याणां नश्यमानां धारणशक्तिम् अवगत्य वेदस्य सुरक्षानिमित्तं शाखाप्रशाखारूपेण विभागीकरणं कृतवान् । वेदार्थबोधाय ब्राह्मणग्रन्थानामपि भाष्यं जातम् । महर्षियास्केनापि निर्वचनज्ञानार्थं निरुक्तस्य रचना कृता । वेदार्थज्ञानाय वेदाङ्गानां प्रातिशाख्यानामपिरचना जाता । तथापि वेदमन्त्राणाम् अर्थावबोधाय यदा काठिन्यम् आगतम् तदा वेदानां भाष्यं कर्तुं भाष्यकाराः प्रयत्नशीलाः अभवन् ।

प्रस्तुतपाठेऽस्मिन् वयं प्रमुखभाष्यकाराणां विषये पठिष्यामः । तेषां नामानि यथा - श्रीस्कन्दस्वामी, श्रीनारायणः, श्रीउद्गीथः, श्रीवेङ्कटमाधवः, श्रीआनन्दतीर्थः, श्री आत्मानन्दः, श्रीसायणाचार्यः, श्रीमाधवः, श्रीभरतस्वामी, श्री गुणविष्णुः, श्रीउवटः, श्रीमहीधरः, श्रीहलायुधः, श्रीमहर्षिदयानन्दः, एते सर्वे भाष्यकाराः सुविदिताः सन्ति । एतेषां सर्वेषां भाष्यकारणां विषये अद्यवयं क्रमेण पठामः ।

---

## श्रीस्कन्दस्वामी

वेदभाष्यकारेषु सर्वप्राचीनतमभाष्यकारः स्कन्दस्वामी वर्तते । स्कन्दस्वामी गुजरातराजस्य वलभीति स्थानवास्तव्य आसीत् । एतन्मन्यते यत् स्कन्दस्वामिनः समये गुर्जरस्य राजधानी वलभी एवासीदिति । अस्य पितुर्नाम भर्तृध्रुवः आसीदिति ऋग्वेदभाष्यस्य प्रथमाष्टकस्यान्ते भाष्यकारेण चर्चा स्वयं कृताऽस्ति ।

**वलभीविनिवास्येता मृगर्थागमसंहृतिम् ।**

**भर्तृध्रुवसुतश्चक्रे स्कन्दस्वामी यथास्मृति ॥**

आचार्यस्कन्दस्वामिनः समयस्याऽपि निर्णयः पर्याप्तपर्यालोचनेन निश्चित्य वक्तुं शक्यते । परवर्तिषु ग्रन्थेष्वस्य नामोल्लेखेनास्याविर्भावकालः सूचितो भवति । स्कन्दस्वामी शतपथब्राह्मणस्य विख्यातो भाष्यकारः हरिस्वामिनो गुरुः आसीत्। स्कन्दस्वामिनः समयः सप्तमशतकमिति निश्चित्य वक्तुं शक्यते । यतो हि स्वयं हरिस्वामिनोपपत्तिक्रमेण शतपथब्राह्मणस्य प्रारम्भे स्कन्दस्वामिनं निजगुरुं स्वीकृत्य स्वपरिचयं दत्तम्

**नागस्वामी तत्र ............... श्रीगुहस्वामिनन्दनः ।**

**तत्र याजी प्रमाणयज्ञ आढ्यो लक्ष्म्या समेधितः ॥**

**तन्नन्दनो हरिस्वामी प्रस्फुरद्वेदवेदिमान् ।**

**त्रयी व्याख्यानधौरेयोऽधीततन्त्रो गुरोर्मुखात् ॥**

**''श्रीस्कन्दस्वाम्यस्ति मे गुरुः''** (शतपथभाष्यम् ५-६.७)

६३८ खैष्टाब्दे हरिस्वामिना शतपथब्राह्मणस्य भाष्यं कृतम् । अतः अनुमीयते स्कन्दस्वामिनः समयः सप्तमशतकस्य प्रथमार्द्धः आसीत् । स्कन्दस्वामी यास्कस्य निरूक्तेऽपि टीकां कृतवान् । निरुक्तस्य टीकाकर्ता ऋग्वेदस्य भाष्यकर्ता एक एव स्कन्दस्वामी इति देवराजयज्वा कथयति । स्कन्दस्वामिनः भाष्यं विशदं सुबोधगम्यं च वर्तते । तस्य भाष्ये प्रत्येकसूक्तस्यारम्भे सूक्तस्य ऋषि-देवता-छन्दसां विषये उल्लेखो वर्तते । तस्य भाष्यम् अतीव सरलं क्लिष्टताराहितं च वर्तते । सायणाचार्यस्य ऋग्वेदभाष्योपरि स्कन्दस्वामिनः भाष्यस्य प्रभावः परिलक्ष्यते । अस्य भाष्यकारस्य भाष्यं चतुर्थाष्टकपर्यन्तमेव समुपलब्धं भवति । शेषार्द्धस्य पूर्तिः आचार्य-नारायणेन उद्गीथेन च कृतास्ति इति ज्ञायते वेङ्कटमाधवस्य ऋग्वेदभाष्यानुशीलनेन यथा

**स्कन्दस्वामी नारायण उद्गीथ इति ते क्रमात् ।**

**चक्रुः सहैकमृग्भाष्यं पदवाक्यार्थगोचरम् ॥**

## श्रीनारायणः

उपरि लिखितेन श्लोकेन प्रमाणितो भवति यत् ऋग्भाष्यरचनायां स्कन्दस्वामिनः साहाय्यं नारायणेन कृतम् । श्लोकस्य क्रमाच्छब्देनानुमीयते यदृग्वेदस्य मध्यभागे नारायणेन स्वभाष्यं लिखितम् । अस्य भाष्यकारस्य समयः स्कन्दस्वामिनः समये एव आसीत् ।

## श्रीउद्गीथः

वेङ्कटमाधवस्य कथनानुसारेण उद्गीथः स्कन्दस्वामिनं प्रति ऋग्भाष्यलेखने साहाय्यं कृतवान् । अयं हि महापुरुषः ऋग्वेदस्यान्तिमभागस्य भाष्यं रचयामास । प्रत्येकाध्यायस्य परिसमाप्तौ तेन स्वविषये लिखितम् ।

**इति वनवासीविनिर्गताचार्यस्य उद्गीथस्य कृता ऋग्वेदभाष्ये........ अध्यायः समाप्तः ।**

अनेन कथनेनोद्गीथाचार्यस्य वनवासिना सह कमपि सम्बन्धं प्रतीयते । प्राचीनकाले आधुनिककर्णाटकस्य प्रतीच्यभूखण्डः 'वनवासीप्रान्त' इति नाम्ना ख्यातः आसीत् । यः परवर्तिसमये स्कन्दस्वामिनः समये वल्लभीनगरे न्यवसत्। अतः स्कन्दस्वामिनः समय एवास्य समय इति वक्तुं शक्यते । अनेन प्रतीयते यत् उद्गीथस्य कालः ख्रीष्टाब्दस्य षष्ठशतकस्योत्तरार्द्धः सप्तमशतकस्य पूर्वार्द्धो वा सिध्यति । स्कन्दस्वामीभाष्यशैलीमनुसृत्यानेन आदौ ऋषेर्देवतायाश्च विवरणं प्रदत्तम् । निरुक्तस्य तथा व्याकरणस्यापि उपयोगः भाष्येऽस्मिन् दृश्यते । अतः वेदभाष्यकर्मणि उद्गीथस्य स्थानं महत्वपूर्णं विद्यते ।

## श्रीवेङ्कटमाधवः

वेङ्कटमाधवोऽयं सम्पूर्णऋक्संहितायामुपरि स्वभाष्यं प्रणीतवान् । कतिपयैः आलोचकैः अनुमीयन्ते यदयं विद्वान् ऋक्संहितायामुपरि भाष्यद्वयं लिलेख । स्वरचितस्य प्रथमभाष्यस्यान्तिमे भागे आचार्यवेङ्कटमाधवः स्वकीयं परिचयं प्रदत्तवान् अस्ति । तस्य जन्म कौशिकगोत्रे अभवत् । तस्य पूर्वजाः आन्ध्रप्रदेशस्थितस्य दक्षिणापथीयचौलदेशे न्यवसन्। अस्य पितुः नाम वेङ्कटाचार्य, मातुः नाम च सुन्दरीदेवी इति । अस्य सङ्कर्षणाख्यः एकोऽनुजः अप्यासीत् । सप्तत्यधिकत्रयोदश विक्रमाब्दस्य पार्श्ववर्ती देवराजयज्वा स्कीयभाष्यस्योपोद्घाते वेङ्कटमाधवस्य नामोल्लेखं कृतवान् । यथा

**''श्रीवेङ्कटाचार्यतनयस्य माधवस्य भाष्यकृतौ नामनुक्रमण्याः पर्यालोचनात् ......... क्रियते'' इति ।**

अनेन सिद्धं भवति यत् वेङ्कटमाधवस्य समयः देवराजयज्वनः पूर्वमासीत् । आचार्यसायणः ऋग्वेदस्य एकस्य मन्त्रस्य भाष्ये माधवभट्टस्य नामोल्लेखं कृतवान् । अनेन सायणात् पूर्ववर्तित्वमपि अस्य सिद्धं भवति । पण्डितः साम्बशिवशास्त्रिमहोदयेन अस्य भाष्यकारस्य समयः १०५० ख्रैष्टाब्दतः ११५० ख्रैष्टाब्दं यावत् इति मन्यते ।

अस्य भाष्यकारस्य भाष्यम् अत्यन्तं संक्षिप्तम् । केवलं मन्त्राणां पदानां व्याख्या एव कृतास्ति । '**वर्जयन् शब्दविस्तारं शब्दैः कतिपयैरिति**' इत्यनेन कथनेन स्पष्टं भवति । केवलं पर्यायवाचिशब्दानां सन्निवेशेन एव मन्त्राणाम् अर्थान् स्पष्टयितुं माधवः प्रयत्नं कृतवान् । व्याकरणजन्यतथ्यानां स्थानं नास्ति । सर्वत्र ब्राह्मणग्रन्थानां प्रामाण्यं समाविष्टमस्ति । तस्य कथनम् अस्ति यत् यः ब्राह्मणग्रन्थानामर्थं सम्यग्रूपेण विवेचनं कृतवान् स एव यथार्थवेत्ता भवति । यथा

**संहितायास्तुरीयांशं विजानन्त्यधुनातनाः ।**

**निरुक्तव्याकरणयोरासीत् येषां परिश्रमाः ॥**

**अथ ये ब्राह्मणार्थानां विवेक्तारः कृतश्रमाः ।**

**शब्दरीतिं विजानन्तिं ते सर्वं कथयन्त्यपि ॥**

## श्रीआनन्दतीर्थः

द्वैतवादस्य प्रवर्तकः मध्व एव आनन्दतीर्थनाम्ना ज्ञायते । ऋग्वेदस्य प्रथममण्डलस्य चत्वारिंशत् मन्त्राणामुपरि तस्य भाष्यं वर्तते । अस्मिन् प्रसङ्गे कथनं यथा – ''ऋक्शाखागतैकोत्तरसहस्रसूक्तमध्ये कानिचित् चत्वारिंशत् सूक्तानि भगवत्पादैः व्याख्यातानि'' । तस्य व्याख्या छन्दोबद्धानि तस्य भाष्ये सर्वत्र नारायणस्य प्रतिपादनं युक्तितरमेव प्रतिभाति।

द्वैतवादस्योपरि आनन्दतीर्थस्य भाष्यं पर्यवेशितम् । अस्य माध्वभाष्यस्य रचनाकालात् त्रिंशद्वर्षाभ्यन्तरे एव तस्य सम्प्रदायस्य प्रमुखाचार्येण जयतीर्थेन तस्य भाष्योपरि टीका कृता । अस्य आनन्दतीर्थस्य समयः विक्रमस्य पञ्चपञ्चाशदधिकद्वाद्वशाब्दतः विक्रमस्य पञ्चत्रिंशदधिकत्रयोदशाब्दपर्यन्तं स्वीक्रियते ।

## श्रीआत्मानन्दः

आत्मानन्दः ऋग्वेदस्य अस्यवामीयसूक्तस्य व्याख्यां कृतवान् । तस्य भाष्ये स्कन्दस्वामिनः भास्करस्य च नामोल्लेखः वर्तते, परन्तु आचार्यसायणस्य नाम कुत्रापि न दृश्यते । अतः ज्ञायते आत्मानन्दः स्कन्दस्वामिनः भास्कराच्च परवर्ती तथा सायणाचार्यस्य पूर्ववर्ती आसीत् । तस्य भाष्ये मिताक्षरायाः कर्तुः विज्ञानेश्वरस्य तथा स्मृतिचन्द्रिकायाः रचयितुः त्रयोदशशतकवर्तिनः देवणभट्टस्य नामोल्लेखेन प्रतीयते यत् चतुर्दशशतकमस्य समयः स्यादिति । तस्य भाष्यम् आध्यात्मकपरकमिति स्वयमेव लिखितम् –

**अधियज्ञविषयं स्कन्दादिभाष्यम् , निरुक्तमधिदैवतविषयम् इयन्तु भाष्मध्यात्मविषयमिति । न च भिन्नविषयाणां विरोधः । अस्य भाष्यमूलं विष्णुधर्मोत्तरम् ।**

अयम् अद्वैतवादी आचार्यः स्वशास्त्रे निष्णात आसीत् ।

वेदभाष्यकारेषु सायणस्य स्थानं सर्वोपरि विद्यते । सः विजयनगरसंस्थापकमहाराज बुक्कस्य प्रधानामात्यपदे १३६४ तमख्रीष्टाब्दतः १३७८ तमख्रीष्टाब्दपर्यन्तमासीत् तदनन्तरं १३७९ तमख्रीष्टाब्दतः १३८७ तमख्रीष्टाब्दपर्यन्तं महाराजहरिहरस्य अमात्यपदं मृत्युपर्यन्तं समलङ्कृतम् ।

वेदानुरक्तविजयनगरस्य बुक्कमहीपतिः सर्वेषां वेदानां सम्यक् अर्थज्ञानाय भाष्यं प्रकाशयितुं स्वमन्त्रिणम् आदिशत्।

पुनश्च श्रूयते निजज्येष्ठभ्रात्रा माधवाचार्येण प्रेरितो भूत्वा व्याख्याकार्येऽस्मिन् असौ प्रवृत्तोऽभूत् । तेन भाष्यमिदं माधवीय नाम्ना ज्ञायते । यथा –

**यत्कटाक्षेण यद्रूपं दधद् बुक्कमहीपतिः ।**

**आदिशन् माधवाचार्य्यं वेदार्थस्य प्रकाशने ॥**

विजयनगरस्य अधिपतिः बुक्कमहीपतिः भाष्यं प्रकाशयितुं माधवाचार्यम् आदिशत् । परन्तु कार्यान्तरव्यस्तताहेतोः स्वकनिष्ठभ्रातरं भाष्यं कर्तुं नियोजितवान् । अतः आचार्यसायणः बहुश्रमं स्वीकृत्य वेदस्य याः याः खलु शाखाः सन्ति, तासु सर्वासु शाखासु भाष्यम् अरचयन्। परन्तु तस्य शैली प्राक्तनी एव आसीत् । यद् यद् ब्राह्मणग्रन्थेषु विधिमुखेन यत् च श्रौतसूत्रैः उपविध्रणं कृतमस्ति तत्साहाय्येन, निरुक्तस्य साहाय्येन व्याकरणस्य च साहाय्येन च वेदस्य भाष्यम्अदचयत्। सायणाआर्यस्य भाष्यं यज्ञपरंक वर्तते । सायमाचार्येण प्रणीता भाष्यग्रन्थाः यथा – ऋग्वेदसंहिताभाष्यम्, शुक्लयजुर्वेदस्य काण्वसंहिताभाष्यम्, कृष्णयजुर्वेदस्य तैत्तिरीयसंहिताभाष्यम्, सामवेदसंहिताभाष्यम्, अथर्ववेदसंहिताभाष्यम्, ऐतरेयब्राह्मणम्, शतपथब्राह्मणम्, तैत्तिरीयब्राह्मणम्, ताण्डयब्राह्मणम्, षड्विंशब्राह्मणम्, सामविधानब्राह्मणम्, आर्षेयब्राह्मणम्, देवताध्यायब्राह्मणम्, उपनिषद्–ब्राह्मणम्, संहितोपनिषद् ब्राह्मणम्, वंशब्राह्मणम्, ऐतरेयारण्यकभाष्यम्, तैत्तिरीय–आरण्यकभाष्यम् । अनेन प्रकारेण आचार्यसायणः पञ्चसंहितानामुपरि भाष्याणि तथा त्रयोदशब्राह्मणारण्यकयोः व्याख्यां कृतवान् । विपुलकायस्य शतपथब्राह्मणस्य व्याख्या सायणाचार्येण सम्यक् तया कृता । अद्यत्वे वेदभाष्यस्य ये विद्वांसः सन्ति, तेषां कृते सायणभाष्यं दीपवत् वर्तते। सायणाचार्यस्य वेदभाष्यनिर्माणप्रशंसायां विद्वासः कथयन्ति –

**''वेदानां पुण्यप्रकर्ष एव मूर्त्तौ भूत्वा सायणात्मना प्रकटीभूतः'' इति**

सायणस्य जन्म भारद्वाजगोत्रे ब्राह्मणकुले अभूत् । अस्य मातुर्नाम सतीदेवी पितुश्च मायण इत्यासीत् । विख्यातो दार्शनिकः श्रीमान् माधवाचार्यः ज्येष्ठभ्राता । प्रसिद्धकविः भोगनाथ– कनिष्ठभ्राता चेति ज्ञायते । अयं सायणाचार्यः तैत्तिरीयशाखाध्यायी आन्ध्रब्राह्मणः आसीत् । यजुर्वेदस्य यज्ञप्राधान्यत्वात् ऋग्वेदस्य अभ्यर्हितत्वेऽपि यजुर्वेदस्य भाष्यम् आदौ अलिखत् ।

**''आध्वर्यवस्य यज्ञेषु प्राधान्याद् व्याकृतः पुरा ।**

**यजुर्वेदोऽथ होत्रार्थमृग्वेदो व्याकरिष्यते'' ॥**

सायणाचार्यस्य अपरं नाम '**विद्यारण्यस्वामी**' इत्यासीत् । यद्यपि सायणविरचितम् ऋक्संहिताभाष्यं तथा अन्यानि कानिचित् भाष्यानि '**माधवीयम्**' इति नाम्ना एव ख्यातानि सन्ति । अतः केचन भाष्यमिदं माधवाचार्येण विरचितम् इति स्वमतस्य पुष्टिं कुर्वन्ति । परन्तु सायणाचार्यस्य ग्रन्थानां पर्यालोचनेन ज्ञातं भवति यत् आलोचकानां कथनम् इदं भ्रमणात्मकम् इति । आचार्यसायणेन एव एषां भाष्याणां '**माधवीयम्**' इति नाम्ना माधवस्य ग्रन्थकर्तृत्वेन न कश्चिदपि सम्बन्धः विद्यते । सायणेन भाष्यकृता स्वग्रन्थे 'वेदार्थप्रकाशनाम्ना' अभिहितः । तस्य सर्वे ग्रन्थाः श्रद्धया स्वगुरवे विद्यातीर्थाय समर्पिताः । तस्य परिचयविषये एकत्र श्रूयते । यथा

**सेनापत्यं च राज्यं च दण्डनेतृत्वमेव च ।**

**सूर्यलोकाधिपत्यं च वेदभाष्यविदर्हति ॥ इति ॥**

## श्रीमाधवः

सामवेदस्य प्रथमभाष्यकाररूपेण माधवोऽयं प्रतीतो भवति । सामवेदस्य उभयोः खण्डयोरूपरि भाष्यं कृतवान्। तस्य भाष्यग्रन्थस्य नाम '**विवरणम्**' इत्यस्ति । तत्र छन्दार्चिकभाष्यस्य नाम 'छन्दसिकाविवरणम्' तथा उत्तरार्चिकभाष्यस्य नाम 'उत्तरविवरणम्' । अद्यावपि भाष्यमिदम् अमुद्रितावस्थायाम् एवास्ति ।

माधवस्य पितुर्नाम 'नारायणः' । माधवस्य समयः सप्तमशताब्द्याम् आसीत् । एषः बाणभट्टस्य पूर्ववर्ती आसीत्। अस्य भाष्यमतीव महत्त्वपूर्णं विद्यते ।

## श्रीभरतस्वामी

भरतस्वामी सामवेदस्योपरि भाष्यं कृतवान् । इदमपि अद्यावपि अप्रकाशितं वर्तते । अस्य जन्म काश्यपगोत्रे अभवत्। अस्य पितुः नाम नारायणः तथा मातुः नाम यज्ञदादेवी इति । सः स्वकीयभाष्यग्रन्थास्यारम्भे स्ववंशपरिचयविषये लिखितवान् यथा -

**नत्वा नारायणं तातं तत्प्रसादादवाप्तधीः ।**

**साम्नां श्रीभरतस्वामी काश्यपो व्याकरोदृचम् ॥**

**होसलाधीश्वरे पृथ्वीं रामनाथे प्रशासति ।**

**व्याख्या कृतेयं क्षेमेण श्रीरंगे वसता मया ॥**

उपरोक्तकथनेन ज्ञातं भवति,होसलाधीश्वरस्य रामनाथनृपस्य शासनावसानकालः १२९५ ईस्वीय वर्तते । अतः अस्यैव पार्श्ववर्ती भरतस्वामिनोऽपि भाष्यस्य रचनाकालः स्यात् । अस्य भाष्यमतीव सङ्क्षिप्तमस्ति । सामब्राह्मणस्योपरि अपि अस्य भाष्यमस्ति । परन्तु सामवेदस्य सर्वाषाम् ऋचामुपरि तस्य व्याख्या लिखिता इति स्वयं प्रकाशयति यथा -

**इत्थं श्रीभरतस्वामी काश्यपो यज्ञदासुतः ।**

**नारायणार्यतनयो व्याख्यात् साम्नामृचोऽखिलाः ॥**

## श्रीगुणविष्णुः

अयं महापुरुषः मिथिलायाः बङ्गप्रदेशस्य वा कस्मिंश्चिद् अपि भागे न्यवसत् । तस्य 'छान्दोग्यमन्त्रभाष्यम्' कौथुमशाखाया उपरि वर्तते । ग्रन्थोऽयं सुविख्यातः वर्तते । अस्य ग्रन्थस्य संस्करणं 'कलकत्तासंस्कृतपरिषद्' इत्याख्यसंस्थातः प्रकाशितं वर्तते । अस्य भाष्यस्योपरि सायणस्य प्रभावः दृश्यते वल्लालसेनस्य अथवा तस्य पुत्रस्य लक्ष्मणसेनस्य शासनसमये तस्य समयः इति ज्ञायते । अतः विक्रमस्य द्वादशशतकस्य अन्तिमभागः अथवा त्रयोदशशतकस्य आद्यभागः तस्य समयः इति निश्चेतुं शक्यते । मन्त्रब्राह्मणभाष्यम् । पारस्करगृह्यसूत्रभाष्यञ्चेति अन्यौ द्वौ भाष्यग्रन्थौ स्तः ।

## श्रीउव्वटः

वज्रटस्य पुत्र उव्वटः काश्मीरीयः विद्वान आसीत् । परन्तु अवन्त्यां भोजराजशासनकाले स्थित्वा भाष्याणां प्रणयनं कृतवान् । गुर्जरदेशप्रसिद्धे 'आनन्दपुरे' वसता तेन भाष्यं कृतम् इति अपर उल्लेखः दृश्यते । परन्तु भोजराजसमकालिकः उव्वटः इति तस्य भाष्यस्य अन्तभागे लिखितमस्ति - यथा -

**ऋष्यादींश्च पुरस्कृत्य अवन्त्यामुवटो वसन् ।**

**मन्त्रभाष्यमिदं चक्रे भोजे राष्ट्रं प्रशासति ॥**

**आनन्दपुरवास्तव्यवज्रटाख्यस्य सूनुना ।**

**मन्त्रभाष्यमिदं वामृप्तं भोजे पृथ्वीं प्रशासति ॥**

अस्य भाष्यस्य नाम 'उव्वटभाष्यम्' । यजुर्वेदस्य माध्यान्दिनशाखाया उपरि भाष्यमिदं वर्तते । अस्य भाष्यं सरलं, सङ्क्षिप्तं प्रामाणिकञ्च वर्तते । अस्य भाष्ये अनेकेषु स्थलेषु आध्यात्मपरकोऽर्थः दर्शितः अस्ति । शुक्लयजुर्वेदभाष्यव्यतिरेके अन्ये चत्वारो ग्रन्थाः ऋक्प्रातिशाख्यस्य टीका, यजुः प्रातिशाख्यस्य टीका, ऋक्सर्वानुक्रमणीभाष्यम्, ईशावास्योपनिषद्भाष्यञ्चेति प्रसिद्धाः सन्ति । सुधासागरकारस्य भीमसेनस्य मतेन उव्वटः मम्मटस्य कनिष्ठः भ्राता आसीत् ।

## श्रीमहीधरः

शुक्लयजुर्वेदस्य माध्यान्दिनसंहितायाः भाष्यं सरलभाषया आचार्यमहीधरेण कृतम् । अयमाचार्यः वाराणसीनिवासी नागरब्राह्मणः कुलालङ्कारः प्रसिद्धकर्मकाण्डी श्रौतयज्ञमर्मज्ञश्च आसीत् । अस्य मातुर्नाम लक्ष्मी पितुर्नाम नृसिंहगणेश

इति ज्ञायते । अस्मिन् विषये तस्य भाष्ये उल्लेखः वर्तते ''**प्रणम्य लक्ष्मीं नृहरिं गणेशम्**'' इति एषः तन्त्रशास्त्रस्यापि विद्वान् आसीत् ।

अस्याविर्भावकालः पोडषशतकस्योत्तरार्द्धे इति ज्ञायते । अतः महानुभावोऽयम् उव्वटाचार्यात् पञ्चाशद्वर्षानन्तरमभवत्। महीधरेण अन्येऽपि ग्रन्थाः रचिताः, यथा – कात्यायनशुल्बसूत्रभाष्यम्, मन्त्रमहार्णवः, तन्त्रसुधानिधिः इत्यादयः । अयञ्च प्रतिभावान् विद्वान् आसीत् ।

## श्रीहलायुधः

शुक्लयजुर्वेदस्य काण्वसंहिताया उपरि भाष्यं वर्तते । अस्य भाष्यस्य नाम ''**ब्राह्मणसर्वस्वम्**'' इति । भाष्यारम्भे हलायुधेन स्वविषये लिखितम् । येन स्पष्टं भवति; वङ्गप्रदेशस्य अन्तिमहिन्दुनृपतेः लक्ष्मणसेनस्य व्यवहारमण्डपे धर्माधिकारिणः पदे नियुक्त आसीत् । यथा –

**बाल्ये ख्यापितराजपण्डितपदं श्वेतार्चिबिम्बोज्ज्वल-**

**च्छत्रोत्सिकंतमहामहस्तमुपदं दत्वा नवे यौवने ॥**

**यस्मै योवनशेषयोग्यमखिलक्ष्मापालनारायणः**

**श्रीमान् लक्षणसेनदेवनृपतिर्धर्माधिकारं ददौ ॥**

लक्ष्मणसेनस्य समयः ११७० तः १२०० ईस्वीयपर्यन्तं विद्यते । अतः हलायुधोऽपि तस्मिन् समये एव आसीत्। ब्राह्मणसर्वस्वव्यतिरेकेऽपि अस्य मीमांसासर्वस्व-वैष्णवसर्वस्व, शैवसर्वस्व-पण्डितसर्वस्वादयः पञ्च ग्रन्थाः प्रसिद्धाः आसन् ॥

## श्रीमहर्षिदयानन्दः

अस्य महात्मनः जन्म गुजरातप्रान्तान्तर्गत- टङ्कारानगरे १८२४ मे ईस्वीयाब्दे अभवत् । अस्य पितुर्नाम करशनजी तिवारी तथा मातुर्नाम रुक्मिणी इत्यासीत् ।

तस्य भाष्यं ब्रह्मपरकम् अस्ति । असौ निरुक्तमाश्रित्य वेदभाष्यं कृतवान् । ऋग्वेदस्य भाष्यं तथा यजुर्वेदस्य भाष्यं तस्य महत्वपूर्णे भाष्ये स्तः । ऋग्वेदादिभाष्यभूमिका, सत्यार्थप्रकाशः, संस्कारविधिः, गोकर्णनिधिः, व्यवहारभानुः आर्याभिनयप्रभृतयः विश्वाङ्मये सुप्रतिष्ठिताः सन्ति ।

स क्रान्तदर्शी निर्भीकः धर्मपरायणः गवां रक्षकः मूर्तिपूजा अवतारवादादिविरोधकर्ता आर्यसमाजस्य प्रतिष्ठापकः सिद्धपुरुषः आसीत्

अन्ये केचनाचार्याः आसन्, येषां योगदानं भाष्यकरणे विद्यते, तेषु भवस्वामी, गुहदेव, कुण्डिनः, आचार्यक्षुरः, भट्टभास्करः, अनन्ताचार्यः, धानुष्कयज्वा इत्यादयः अन्यतमाः सन्ति ।

## श्रीअथर्वभाष्यम्

संहिताभाष्ये अथर्वभाष्यस्य रचना सर्वान्तेऽभवत् । अथर्वभाष्यस्योपोद्घाते सायणेन लिखितम्

**व्याख्याय वेदत्रितयं आमुष्मिकफलप्रदम् ।**

**ऐहिकामुष्मिकफलं चतुर्थ व्याचिकीर्षति ॥**

अस्याथर्ववेदस्य विंशतिः काण्डेषु मात्र द्वादशकाण्डोपरि एव सायणभाष्यं मिलति । अतिपरिश्रमेणास्य भाष्यस्य प्रथमसंस्करणं बम्बईनगरीतः पण्डितकाशीनाथपाण्डुरङ्गेन चतुषु काण्डेषु ख्रीष्टस्य १८९५ – १८९८ ईस्वीये प्रकाशितम्। किञ्च श्रूयते अथर्वभाष्यस्य सम्पूर्णहस्तलिखितप्रत्यपि ग्वालियरनगरेऽस्ति ।

## शब्दार्थाः

**निरुक्तिः** - निर्वचनं, निश्चयकथनम्, **वाचा** - वाक्, **प्रतीयते** - ज्ञातं भवति, **प्राक्तनः** - प्राचीन, **उपविघ्रणम्** - प्रतिपादनम्, **प्रकटीकृतः** - आविर्भूतः, **समलङ्कृतम्** - विराजमानम्, **मर्मज्ञः** - विज्ञाता, **आक्षेपः** - समालोचनम्।

## स्वाध्यायः

१. **निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) वेदार्थज्ञानाय ........................ रचना जाता । (स्मृतिनां, वेदाङ्गानां, श्रुतीनां)

(२) शतपथब्राह्मणस्य विख्यातो भाष्यकारः हरिस्वामीनो गुरु ........................ आसीत् ?

(सायण, महीधरः, स्कन्दस्वामी)

(३) द्वैतवादस्य प्रवर्तकः मध्य एव ........................ नाम्ना ज्ञायते । (आनन्दतीर्थ, हलायुधः, उव्वटः)

(४) सायणाचार्यस्य अपरं नाम ........................ आसीत् । (विद्यारव्यस्वामी, मध्व, धार्मात्मा)

(५) माधवस्य भाष्यस्य नाम ........................ वर्तते । (माधवीयम्, विवरणम्, वेदार्थप्रकाशः)

२. **निम्नाङ्कितानां प्रश्नानाम् एकैकवाक्येनोत्तराणि लिखत ।**

(१) स्कन्दस्वामिनः कः समयः ?

(२) अस्यवामीयसूक्तस्य व्याख्यां कः कृतवान् ?

(३) महीधरस्य पितुः नाम किम् ?

(४) भीमसेनस्य मतेन कः मम्मटस्य कनिष्ठः भ्राता आसीत् ?

(५) अथर्ववेदस्य कति काण्डानि ?

३. **(अ) निम्नाङ्कित-श्लोकानां भावार्थं लिखित ।**

(१) स्कन्दस्वामी नारायण उद्गीथ इति ते क्रमात् ।
चक्रुः सहैकमृग्भाष्यं पदवाक्यार्थगोचरम् ॥

(२) संहितायास्तुरीयांशं विजानन्त्यधुनातनाः ।
निरुक्तव्याकरणयोरासीत् येषां परिश्रमाः ॥

(३) आध्वर्यवस्य यज्ञेषु प्राधान्यःद् व्याकृतः पुरा ।
यजुर्वेदोऽथ होत्रर्थिमृग्वेदो व्याकरिष्यते ॥

**(ब) श्लोकपूर्ति विधेया ।**

(१) नत्वा नारायणं .................................. व्याकरोदृचम् ॥

(२) आनन्दपुरवास्तव्य .................................. प्रशासति ॥

(३) यत्कटाक्षेण .................................. प्रकाशने

४. **निम्नाङ्कितभाष्यकाराणां परिचयो देयः ।**

(१) स्कन्दस्वामी
(२) सायणः
(३) महिधरः
(४) उव्वटः
(५) हलायुधः

**५. शब्दानां विभक्ति परिचयो देयः ।**

(१) ब्रह्मणः
(२) स्वामिनः
(३) आलोचकैः
(४) आत्मनि
(५) शाखासु

**६. क्रियापदानां परिचयो देयः ।**

(१) अभवन्
(२) रचयामास
(३) लिलेख
(४) श्रूयते
(५) स्तः

**७. (अ) सन्धिविच्छेदं कुरुत ।**

(१) एतन्मन्यते
(२) ग्रन्थेष्वस्य
(३) एकोऽनुजः
(४) क्रमाच्छब्देनानुमीयते
(५) इत्यादयः

**(ब) सन्धिमेलनं कुरुत ।**

(१) एव + आसीत् + इति
(२) भास्करात् + च
(३) अध्यात्मकः + अर्थः
(४) अयं + च
(५) सर्व + अन्ते

**छात्र-प्रवृत्तिः**

- विभिन्नेषु पुस्तकालयेषु स्थितानां भाष्यकारणां पुस्तकानाम् अवलोकनं करणीयम् ।

**विशिष्टज्ञानम्**

- अद्यन् आदित्य रश्मिभिः शिर्ष्णो रोग मनीनशः । अ.वे. ९/८/२२
- सर्वं वेदात् प्रसिद्ध्यति ।
  अस्मिन् संसारेसर्वं वेदात् प्राप्यते ।

| ४ | याज्ञवल्क्यपरिचयः |
|---|---|

## प्रस्तावना

भारतीयसंस्कृतौ वैदिकसंस्कृतौ च वेदस्य महत्वम् अत्याधिकं वर्तते । वेदाः चत्वादः सन्ति । प्रत्येकवेदानां भिन्नाभिन्नाः शाखाः समुपलभ्यन्ते । चतुर्षु वेदेषु यजुर्वेदस्य द्वौ भागौ स्तः । शुक्लः कृष्णश्चेति । शुक्लयजुर्वेदः वाजसनेयानां सप्तदशभेदाः भवन्ति । यथा - जाबालाः, गौधेयाः (औधेयाः), काण्वाः, माध्यन्दिताः, श्यामाः, श्यामायनीयाः, कपोलाः, पिङ्गलाः, वत्साः, पौण्ड्रश्वत्साः, आवटिकाः, परमावटिकाः, पाराशर्याः, वैणेयाः, बाधेयाः, गालवाः, कात्यायनीयाश्चेति। वाजस्य सनिर्दानं यस्य महर्षेः अस्ति सोऽयं वाजसनिः तस्य पुत्रः वाजसनेयः तस्यापरं नाम याज्ञवल्क्येति समाधेयम्।

**प्रत्यग्रवेदेन गिरां मलं यो**
**विधूय योगेन च चित्तजातम् ।**
**ज्ञानेन त्वपदंलक्ष्यमापतं**
**याज्ञवल्क्यं प्रणतोऽस्मि नित्यम् ॥**

एतादृशं महान् याज्ञवल्क्यमुनिविषये वयम् अस्मिन् पाठे पठिष्यामः ।



सुविदितमस्त्येतद् विदुषां समवाये यत् महर्षिर्याज्ञवल्क्यो महान् धर्मचिन्तकः आध्यात्मविद्योगी ज्ञानी श्रीरामकथायाः प्रवक्ता चासीत्, इति विद्वांसो विदन्ति । उपरञ्च पुराणेषु ब्रह्मण अवताररूपेण चर्चितोऽस्ति । महनीयकीर्तिरयं श्रीमद्भागवते देवरातस्य पुत्रो महर्षेर्वैशम्पायनस्य च शिष्यः कथितः पूर्वं वैशम्पायनादेव वेदानां विशेषतो यजुर्वेदस्याखिलं ज्ञानमधिगतम्।

एकदा गुरुणा वैशम्पायनेन सह विवादे सञ्जाते गुरुः रुष्टोऽभवत् । कथितञ्च तेन मत्सकाशात् पठितां विद्यां प्रत्यावर्तय इति । गुरोः आज्ञा गरीयसि इति मत्वा याज्ञवल्क्येन सर्वाः ऋचाः वमिताः । याश्च तदपरशिष्यैः तित्तिररूपेण गृहीताः। यजुर्वेदस्य सैव शाखा ''तोत्तिरीयशाखा'' इति नाम्ना जगति प्रसिद्धा बभूव ।

पुनश्च खिन्नमानसो याज्ञवल्क्यः वेदविद्याप्राप्त्यर्थं भगवतः सूर्यस्योपासनां सम्यक् चकार । तदनु प्रार्थयामास यद् देव ! यदि प्रसन्नोऽसि तदा पूर्वं केनाप्यप्राप्ता यजुर्वेदविद्या यथा मह्यं प्राप्ता भवेत्तथा कुरु ।

महर्षिर्याज्ञवल्क्यस्य स्तुत्युपासनया प्रसन्नो भगवान् सूर्यः तदग्रेऽश्वरूपेण प्रकटितो भूत्वा तस्मै तान् मन्त्रान् उपदिदेश। ये मन्त्राः कमपि इतः पूर्वम् अप्राप्ता आसन् तथा चोक्तं श्रीमद्भागवते -

**एवं स्तुतः स भगवान् वाजिरूपधरो हरिः ।**

**यजूंष्टायातयामानि मुनयेऽदात् प्रसादितः ॥** (भा. १२/६/७३)

अश्वरूपात् सूर्यात् सम्प्राप्तत्वात् शुक्लयजुर्वेदस्येयं शाखा 'वाजसनेय', 'माध्यन्दिनः' वेति संज्ञया सुप्रसिद्धा । अस्याः शाखायाश्च मुख्यद्रष्टा महर्षियाज्ञवल्क्य एव । 'वाजसनेयीसंहितायाः आचार्यत्वात्' 'वाजसनेय' इत्यपि कथयन्ति विद्वांसः। इत्थं महर्षियाज्ञवल्क्यः वेदानां मुख्यआचार्यः उपदेशकश्च । सहैवैते शतपथब्राह्मणस्य बृहदारण्यकोपनिषदश्च द्रष्टारोऽपि अस्ति ।

एकदा विदेहस्य जनकस्य हृदि एषा भावना जागृता यदहं कस्यापि ब्रह्मनिष्ठगुरोः सकाशात् ब्रह्मविद्यालाभङ्करिष्ये। इति निश्चित्य सर्वोत्तमस्य ब्रह्मनिष्ठस्य परीक्षणाय एका सभा आयोजिता । तस्यां सभायां तैः घोषणा कृता 'ये केचन ब्रह्मनिष्ठाः स्युस्ते स्वतपोबलेन एताः सुर्वणभूताः सहस्रसंख्याकाः गाः सजीवाः विधाय नयन्तु । सर्वेषामिच्छाऽभूद्यत् - वयं ग्रहीष्यामः किन्तु पूर्वमुत्थाय यदि वयमेवं कुर्मस्तदा सभाजनाः ज्ञास्यन्ति यदिमे तु स्वयमेव ब्रह्मनिष्ठाः कल्पयन्ति। इति विमृश्य शिष्टाचारस्य लोकापवादस्य च भयेन न कोऽपि उत्थितः . सुयोगेन सशिष्यायाज्ञवल्क्य अपि तत्रैवासीत्। तैः एकः शिष्यः प्रबोधितो यत् समस्ताः गाः नयन्तु । तदा तेषां ऋषिभिः गार्ग्या च सह शास्त्रार्थोऽभूत् । सर्वेषां प्रश्नानां समुचितोत्तरं प्रदत्तम् । सर्वे सन्तुष्टा जाताः । सर्वेमहर्षियाज्ञवल्क्यस्य प्रतिभाज्ञानेन, विद्याशक्त्या दिव्ययोगबलेन च पराभूताः । तदा महाराजेन जनकेन तेम्यो ब्राह्मविद्याऽधिगता । याज्ञवल्क्यः विदेहराजमहाराजजनकस्य गुरुः आसीत्। याज्ञवल्क्यः अद्वितीयो महान् विद्वान् वाक्पटुः एवम् आत्मज्ञानी चासीत् । अस्य स्वभावः उग्रः आसीत् । जनकस्य विद्वत् सभायां वाद-विवाद समये शाकल्यादाक्रोशपूर्णशब्दैरवदत् 'मूर्धा ते निपतिष्यन्ति' क्रोधेन सह दयावान् एवं कोमल प्रवृत्तयः आसन् । वाद-विवादकाले स्त्रीभ्यः वाऽन्येभ्यः कृपाभावेन न दृश्यते । अपितु प्रतिस्पर्धारूपेणैव दृश्यते इति।

याज्ञवल्क्य बहुकालपर्यन्तं मिथिलायामधिवासंचकार तेन अधिसंख्यका विद्वांसः मैथिला इत्यामनन्ति । प्रमाणानि च बहूनि सन्ति । याज्ञवल्क्यस्मृतौ 'मिथिलास्थः स योगीन्द्रः' इत्यस्यैव प्रमाणं विद्यते । अपि च मध्यमिथिलायां द्वारवङ्गमण्डले योगिवन (जगवन) योगिआरा (जोगियारा) ग्रामावधुनामपि विद्यमानौ स्तः । परम्पराप्राप्त जनश्रुत्या अयं ग्रामस्यास्य निवासी आसीत् ।

सुप्रसिद्धे कृत्यसारसमुच्चये महानिबन्धे मिथिलाप्रसङ्गे लिखितमस्ति यत् -

**श्रीजानकीजानिपवित्रगोत्रा या याज्ञवल्क्यगौतमजन्मदात्री ।**

**स्वर्गात्मिकाऽवनिगताऽपि पुराणतन्त्रविख्यातकीर्तिलसिता मिथिलापुरीयम् ॥**

योगीश्वराणां विषये जन्मभूमेर्विचिकित्सा न कर्तव्या । ते नैकदेशिनो भवन्ति । अन्यच्च '**विद्वान् सर्वत्र पूज्यते**' ते सार्वदैशिका भवन्ति ।

विष्णुपुराणानुसारं सूर्यात् वेदविद्यामधीत्य जनककात्यायन - शतानीक - जनमेजयेभ्यः वेदमध्यापितः । येन

याज्ञवल्क्यऋषिः शतानीक एवं जनमेजय समकालीनः प्रतीक्षते । महाभारते शान्तिपर्वणि जनक एवं विश्वावसु गन्धर्वेन सह याज्ञवल्क्य द्वारा कृत तत्वज्ञान संवादस्य निर्देशः प्राप्यते । तत्र विश्वावसोः चतुर्विंशति पश्नानाम् उत्तरं प्रदत्तम् । याज्ञवल्क्यमहर्षेः त्रेतायां जन्मः अभवत् । त्रेतायां वाजसनेय नाम्ना महर्षिः आसीत् । तस्य वर्णनं बृहदारण्यकोपनिषदि वर्णितमस्ति । अतः अस्य दिगन्तकीर्तेः वेदशिरोभागेषु उपनिषत्सु तथा महाभारतादि इतिहासेसु अयं प्रसिद्धः ।

महर्षि याज्ञवल्क्यस्य द्वे भार्ये आस्ताम् । प्रथमा मैत्रेयी । द्वितीया भरद्वाजकन्या कात्यायनी च । मैत्रेयी याज्ञवल्क्यात् ज्ञानोपदेशं लब्ध्वा कैवल्यपदं प्राप्तम् । कात्यायन्याः त्रयः पुत्राः आसन्। प्रथमः चन्द्रकान्तः द्वितीय महामेघः, तृतीय विजयः इति ।

योगोपदेष्ट्वाचार्येषु स्मृतिकारेषु च महर्षियाज्ञवल्क्यस्य स्थानं सर्वोत्तममस्ति । याज्ञवल्क्यस्मृत्या सहैव ब्रह्मोक्तयोगियाज्ञवल्कयः बृहद्योगियाज्ञवल्क्यादि स्मृतयोऽपि तन्नाम्ना प्रथिताः सन्ति । एतदतिरिक्तं याज्ञवल्क्यगीता, याज्ञवल्क्योपनिषद्, याज्ञवल्क्यशिक्षादयो ग्रन्था अपि सुप्रसिद्धाः सन्ति । एभिर्गायत्रीभाष्यस्य सर्वप्रथमं प्रणयनं कृतम् । इत्येव न हि - क्रमसन्धान - गलदृक - मनस्वार - तिस्रः शिक्षा अपि प्रणीताः सन्ति ।

इत्थं महर्षियाज्ञवल्क्यस्य त्यागस्य, तपसः सदाचारमयजीवनस्य च प्रेरणया मानवाः सर्वोत्कर्षं प्राप्तुं शक्नुवन्ति । योगीश्वरस्य महेर्षियाज्ञवल्क्यस्य वचनानि भाषितानि सर्वाधिकानि प्रमाणिकानि सर्वोपरि मान्यानि च सन्ति ।

## शब्दार्थाः

**मलं** - पापं, **आपतिः** - विपत्ति, **रुष्टः** - क्रोधयुक्तः, **वमिताः** - वान्तः, उल्लङ्गितः, **खिन्न** - खेदयुक्तः, **दिगन्तः** - दिशः अन्य पर्यन्तम्, **कैवल्यपदं** - मोक्षपदं, **प्रथिताः** - विख्याताः, प्रसिद्धाः ।

## स्वाध्यायः

**१. निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) वेदाः ........................ सन्ति । (५, ३, ४)

(२) याज्ञवल्क्य ........................ कथायाः प्रवक्ताऽसीत् । (श्रीराम, श्रीकृष्ण, श्रीमहाभारत्)

(३) गुरोः ........................ गरीयसि । (कृपा, आज्ञा, पूजा)

(४) याज्ञवल्क्यस्य स्वभावः ........................ आसीत् । (उग्रः, सौम्यः, चञ्चलः)

(५) विश्वावसोः ........................ प्रश्नानाम् उत्तरं प्रदत्तः । (९, १८, २४)

**२. निम्नाङ्कितानां प्रश्नानाम् एकैक वाक्येनोत्तराणि लिखत ।**

(१) श्रीमद् भागवतानुसारं याज्ञवल्क्य कस्य पुत्र?

(२) केन सह विवादः सञ्जातः?

(३) जनकस्य गुरुः कःआसीत्?

(४) याज्ञवल्क्यस्य जन्म कदाऽभवत्?

(५) याज्ञवल्क्यस्य भार्ययोः नाम किम्?

**३. श्लोकपूर्तिः विधेया ।**

(१) प्रत्यग्रवेदेन .................................. प्रणतोऽस्मि् नित्यम् ॥

(२) एवं स्तुतः स .................................. प्रसादित ॥

४. **विस्तृत प्रश्नानाम् उत्तराणि लिखत ।**

(१) सूर्यात् याज्ञवल्क्यः कया रीत्या वेदमधीतम् ?

(२) जनकस्य सभायाः वर्णनं स्वमतानुसारं कुरुत ?

(३) विविधमतानुसारं याज्ञवल्क्यस्य कालनिर्णयम् चर्चयत ।

(४) याज्ञवल्क्यस्य संक्षिप्तः परिचयो देयः ?

५. **शब्दानां विभक्तिपरिचयो देयः ।**

(१) महर्षेः

(२) विदुषां

(३) द्रष्टारः

(४) तेभ्यः

(५) विश्वावसोः

६. **क्रियापदानां परिचयो देयः ।**

(१) पठिष्यामः

(२) विदन्ति

(३) चकार

(४) कुरु

(५) अभवत्

७. **(अ) सन्धिविच्छेदं कुरुत ।**

(१) सोऽयं

(२) प्रत्यग्रवेदेन

(३) सर्वेषामिच्छाऽभूत्

(४) समुचित्तोत्तरम्

(५) तन्नाम्ना

**(ब) सन्धिमेलनं कुरुत ।**

(१) प्रणतः + अस्मि

(२) केन + अपि + अप्राप्ता

(३) तत्र + एव + आज्ञन्

(४) इति + अस्य + एव

(५) दिक् + अन्त

**छात्र-प्रवृत्तिः**

- गार्गीयाज्ञवल्क्ययोः संवादं पठन्तु ।
- याज्ञवल्क्यविरचितग्रन्थानां सिंहावलोकनं कुर्वन्तु ।

**विशिष्टज्ञानम्**

- त्रिफलां लवणाक्तां वै भक्षयेच्छिष्यकः सदा ।
  क्षीणमेधाजनन्येषा स्वरवर्णकरी तथा ॥ याज्ञवल्क्य शिक्षा - ३८
- वेदाध्यायी शिष्यः यदा प्रतिदिनं त्रिफलाचूर्णं
  लवणयुक्तां भययति तदा तस्य शिष्यस्य
  तीक्ष्णमेधा मधुरवाणी च भवति ।

●

# ५ ऋग्वेदे रुद्राभिषेकमन्त्राः १

**प्रस्तावना**

सोमतत्त्वं प्राणतत्त्वमिति ज्ञायते । कर्मसम्पादनार्थं यथा शरीरस्य स्थित्यर्थं जीवनीशक्तेः आवश्यकता तथा सामग्रिकस्थित्यर्थं कार्यसम्पादनानुकूलसाहसार्थं सोमस्य आवश्यकता वर्तते । ऋग्वेदे नवममण्डले १४तमे सूक्ते पावमानसूक्तस्य ऋषिदृशा वर्णनं प्राप्यते । पावमान सोमः सृष्टेः प्रत्येकं पदार्थे सोमस्य अर्थात् जलीयतत्त्वस्य विद्यता वर्तते । शतपथब्राह्मणानुसारम् अस्मिन् संसारे द्विप्रकारकः पदार्थः प्राप्यते यथा - शुष्कपदार्थः अर्थात् जलरहितः अपरश्च आर्द्रपदार्थः अर्थात् जलसहितः । यः शुष्कपदार्थः सः आग्नेयपदार्थः भवति । यः आर्द्र पदार्थः सः सोम्यः अर्थात् सोमीय तत्त्वभूतः भवति । अत एव बृहदजाबालोपनिषदि स्पष्टी क्रियते यत् अयं समग्रः संसारः अग्निसोमतत्त्वयोः संयोगात् भवति । अतः श्रूयते 'अग्निसोमात्मकं जगत्' - इति ।

सोमः पृथिवीस्थानीयो देवोऽस्ति । ऋग्वेदस्य नवममण्डले अस्य देवस्य स्तुतिर्भवति । सम्पूर्णे ऋग्वेदे पञ्चाशदुत्तरमेकशतं सूक्तानि सोमदेवस्य गुणगानं कुर्वन्ति । तत्रापि सोमरसविषये चर्चा दृश्यते । सोमरसः सोमनामकवनस्पतितः निष्पीडितः रसः । अयं रसः इन्द्रदेवाय अतीवप्रियो वर्तते । प्रस्तुतपाठ्यांशः ऋग्वेदस्य प्रथममण्डलस्य १९ तमसूक्तं तथा नवममण्डलस्य ६७तमसूक्तमस्ति । भरद्वाज-काश्यप-गौतमात्रि-विश्वामित्र-जमदग्नि-वशिष्ठादय ऋषयः अस्य सूक्तस्य द्रष्टारः । पवमानसोमः मुख्यरूपेणात्र भजते ।

---

**या ते धामा॑नि ह॒विषा॒ यज॑न्ति॒ ता ते॒ विश्वा॑ परि॒भूर॑स्तु य॒ज्ञम् ।**

**गय॒स्फान॑ः प्र॒तर॑णः सु॒वीरोऽवी॑रहा॒ प्र च॑रा सोम॒ दुर्या॑न् ॥ १ ॥ ऋ.मं.१.सू.९१.मं.१९**

**पदपाठः-** या । ते॒ । धामा॑नि । ह॒विषा॑ । यज॑न्ति । ता । ते॒ । विश्वा॑ । प॒रि॒ऽभूः । अ॒स्तु॒ । य॒ज्ञम् ॥

गय॒ऽस्फन॑ः । प्र॒ऽतर॑णः । सु॒ऽवीर॑ः । अवी॑रऽहा । प्र । च॒र॒ । सो॒म॒ । दुर्या॑न् ॥ १ ॥

**सरलार्थः-** हे सोम ! यजमानः हविस्समर्पणपूर्वकं तव येषां धाम्नां संस्कारं करोति तानि सर्वाणि यज्ञात् परितः सन्ति। त्वम् अस्माकं विस्तारकः, तारकः, सुवीरः, शत्रुविनाशकः भव । त्वम् अस्माकं गृहं निकषा भव ।

**सोमो॑ धे॒नुं सोमो॒ अर्व॑न्तमा॒शुं सोमो॑ वी॒रं क॑र्म॒ण्यं॑ ददाति ।**

**सा॒द॒न्यं॑ वि॒द॒थ्यं॑ स॒भेयं॑ पि॒तृ॒श्रव॑णं॒ यो ददा॑शदस्मै ॥ २ ॥ ऋ.मं.१सू.९१.मं.२०**

**पदपाठः-** सोम॑ः । धे॒नुम् । सोम॑ः । अर्व॑न्तम् । आ॒शुम् । सोम॑ः । वी॒रम् । क॒र्म॒ण्य॑म् । द॒दा॒ति ॥

सा॒द॒न्य॑म् । वि॒द॒थ्य॑म् । स॒भेय॑म् । पि॒तृ॒ऽश्रव॑णम् । यः । ददा॑शत् । अ॒स्मै॒ ॥ २ ॥

**सरलार्थः-** यः यजमानः सोममुद्दिश्य हविर्लक्षणान्यन्नानि ददाति तस्मै यजमानाय सोमः गां शीघ्रगामिनमश्वं च प्रयच्छति। अपि च लौकिककर्मणि दक्षं, दर्शपूर्णमासादियागानुष्ठातारं, सकलशास्त्राभिज्ञं, साभायां साधुं, पितुः यशोवृद्धिकारिणं वीरपुत्रं तस्मै ददाति ॥ २ ॥

**अषा॑ह्ळं यु॒त्सु पृत॑नासु॒ पप्रिं॑ स्व॒र्षाम॒प्सां वृ॒जन॑स्य गो॒पाम् ।**

**भ॒रे॒षु॒जां सु॑क्षि॒तिं सु॒श्रव॑सं॒ जय॑न्तं॒ त्वामनु॑ मदेम सोम ॥ ३ ॥ ऋ.मं.१सू.९१.मं.२१**

**पदपाठः-** अषा॑ह्ळम् । यु॒त्ऽसु । पृत॑नासु । पप्रि॑म् । स्व॒ःऽस्याम् । अ॒प्साम् । वृ॒जन॑स्य । गो॒पाम् ॥

भ॒रे॒षु॒ऽजाम् । सु॒ऽक्षि॒ति॒म् । सु॒ऽश्रव॑सम् । जय॑न्तम् । त्वाम् । अनु॑ । म॒दे॒म॒ । सो॒म॒ ॥ ३ ॥

**सरलार्थः-** हे सोम ! त्वं युद्धेषु अपराजितानां सैनिकानां पुरुषाणाम् उत्साहसञ्चारकारी, उदकानां दातारः, बलस्य रक्षयिता, शोभननिवासस्थानस्य प्रापयितारः, शोभनयशस्कः, शत्रुविनाशकारी भव । हे सोम ! ईदृग्भूतं त्वाम् अनुलक्ष्य वयं यजमानाः हर्षयुक्ताः भवामः ।

**त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः ।**

**त्वमा ततन्थोर्वन्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ ॥ ४ ॥ ऋ.मं.१.सू.९१.मं.२२**

**पदपाठः-** त्वम् । इमाः । ओषधीः । सोम । विश्वाः । त्वम् । अपः । अजनयः । त्वम् । गाः ॥

त्वम् । आ । ततन्थ । उरु । अन्तरिक्षम् । त्वम् । ज्योतिषा । वि । तमः । ववर्थ ॥ ४ ॥

**सरलार्थः-** हे सोम ! त्वं भूम्यां वर्तमानाः सर्वाः ओषधयः, तासामोषधीनां कारणभूतानि वृष्ट्युदकानि, गवाश्वादय उत्पादितवानसि । त्वम् एतद् विशालमन्तरिक्षं विस्तारितवानसि । पुनश्च तस्मिन् अन्तरिक्षे यत् अन्धकारमस्ति तस्य अन्धकारस्य सम्पूर्णं निवारणं त्वं स्वकीयप्रकाशेन कृतवानसि ।

**देवेन नो मनसा देव सोम रायो भागं सहसावन्नभि युध्य ।**

**मा त्वा तनदीशिषे वीर्यस्योभयेभ्यः प्र चिकित्सा गविष्टौ ॥ ५ ॥ ऋ.मं.१.सू.९१.मं.२३**

**पदपाठः-** देवेन । नः । मनसा । देव । सोम । रायः । भागम् । सहसाऽवन् । अभि । युध्य ॥

मा । त्वा । आ । तनत् । ईशिषे । वीर्यस्य । उभयेभ्यः । प्र । चिकित्सा । गोऽविष्टौ ॥ ५ ॥

**सरलार्थः-** हे द्योतमान् सहसावन् सोम ! त्वम् अपहर्तारं शत्रुं विजित्य द्योतमानया त्वदीयया बुद्धया अस्मभ्यं धनस्यांशं देहि । त्वं न केनचिदपि वारितः । त्वम् उभयेषां युध्यमानानां सम्बन्धिनः वीर्यस्य नाम बलस्य ईश्वरो भवसि । सङ्गोष्ठ्यां सभायां वा त्वं स्वप्रभावस्य प्रदर्शनं कृत्वा अस्मदीयमुपद्रवं परिहर ॥ ५ ॥

**त्वं सोमासि धारयुर्मन्द्र ओजिष्ठो अध्वरे ।**

**पवस्व मंहयद्रयिः ॥ ६ ॥ ऋ.मं.९.सू.६७.मं.१**

**पदपाठः-** त्वम् । सोम । असि । धारयुः । मन्द्रः । ओजिष्ठः । अध्वरे ॥

पवस्व । मंहयत्ऽरयिः ॥ ६ ॥

**सरलार्थः-** हे सोम ! त्वम् अभिषूयमाणः आनन्ददाता ओजस्वितमः अस्मदीये हिंसारहिते यज्ञे रसधाराप्रवाहकः असि । त्वम् अस्मान् धनं प्रदाय सुस्थजीवनाय प्रेरितं कुरु । हे मादयितृतमः सोम ! त्वं द्रोणकलशे पात्रेषु पवित्रेण दृष्टि पूतो भव ॥ ६ ॥

**त्वं सुतो नृमादनो दधन्वान् मत्सरिन्तमः ।**

**इन्द्राय सूरिरन्धसा ॥ ७ ॥ ऋ.मं.९.सू.६७.मं.२**

**पदपाठः-** त्वम् । सुतः । नृऽमादनः । दधन्वान् । मत्सरिन्ऽतमः ॥

इन्द्राय । सूरिः । अन्धसा ॥ ७ ॥

**सरलार्थः-** हे सोम ! यदा त्वम् अस्माभिरभिषुतः भवसि तदा त्वं कर्मणो नेतृणामृत्विजाम् आनन्दप्रदायकः सर्वाधिकतृप्तिप्रदः धनधारकः यज्ञधारको भवसि । पुनश्च त्वम् इन्द्राय मदकारीहवीरूपेणान्नप्रदाता भवसि ॥ ७ ॥

**त्वं सुष्वाणो अद्रिभिरभ्यर्ष कनिक्रदत् ।**

**द्युमन्तं शुष्ममुत्तमम् ॥ ८ ॥ ऋ.मं.९.सू.६७.मं.३**

**पदपाठः-** त्वम् । सुस्वानः । अद्रिऽभिः । अभि । अर्ष । कनिक्रदत् ॥

द्युऽमन्तम् । शुष्मम् । उत्ऽतमम् ॥ ८ ॥

**सरलार्थः-** हे पवमान सोम ! ग्रावभिः पेषितः त्वं भृशं शब्दं कुर्वन् कलशं प्रति गच्छ । तथा च त्वं सञ्चारितरसरूपेण दीप्तियुक्तम् उत्तमं श्रेष्ठबलदायकम् अन्नम् बलं च प्रयच्छ ।

**इन्दुर्हिन्वानो अर्षति तिरो वाराण्यव्यया ।**

**हरिर्वाजमचिक्रदत् ॥ ९ ॥ ऋ.मं.९.सू.६७.मं.४**

**पदपाठः-** इन्दुः । हिन्वानः । अर्षति । तिरः । वाराणि । अव्यया ॥

हरिः । वाजम् । अचिक्रदत् ॥ ९ ॥

**सरलार्थः-** हे सोम ! पाषाणैः पेषितः मेषवालैः परिष्कृतः तव रसः अधः गच्छति । हरितवर्णयुक्तः अन्नरूपः सोमोऽयम् अधः स्थितं पात्रं निसृतं मङ्गलशब्दं कुर्वन् इन्द्रमाह्वयतीत्यर्थः ॥ ९ ॥

**इन्दो व्यव्यमर्षसि वि श्रवांसि वि सौभगा ।**

**वि वाजान् त्सोम गोमतः ॥ १० ॥ ऋ. मं.९.सू.६७.मं.५**

**पदपाठः-** इन्दो इति । वि । अव्यम् । अर्षसि । वि । श्रवांसि । वि । सौभगा ॥

वि । वाजान् । सोम । गोऽमतः ॥ १० ॥

**सरलार्थः-** हे सोम ! त्वं मेषवालैः पवित्रो भूत्वा विविधं धाराभिर्गच्छसि । त्वं हवीरूपाणि अन्नानि भवसि । सौभाग्यानि धनानि विविधं प्राप्नोषि । हे सोम ! त्वं पशुबलानि अन्नानि धनानि च सर्वाणि वस्तूनि अस्माकं कृते प्रयच्छ ॥ १० ॥

**आ न इन्दो शतग्विनं रयिं गोमन्तमश्विनम् ।**

**भरा सोम सहस्त्रिणम् ॥ ११ ॥ ऋ.मं.९.सू.६७.मं.६**

**पदपाठः-** आ । नः । इन्दो इति । शतऽग्विनम् । रयिम् । गोमन्तम् । अश्विनम् ॥

भर । सोम । सहस्त्रिणम् ॥ ११ ॥

**सरलार्थः-** पात्रेषु क्षरन् हे सोम ! त्वम् अस्मभ्यं शतं गावः सहस्रसङ्ख्यकान् अश्वान् धनं पुत्रञ्च प्रयच्छ ॥११॥

**पवमानास इन्दवस्तिरः पवित्रमाशवः ।**

**इन्द्रं यामेभिराशत ॥ १२॥ ऋ.मं.९.सू.६७.मं.७**

**पदपाठः-** पवमानासः । इन्दवः । तिरः । पवित्रम् । आशवः ॥

इन्द्रम् । यामेभिः । आशत ॥ १२॥

**सरलार्थः-** उर्णास्तुकेन निर्मितं मेषवालपरिच्छिन्नपवित्रं सोमरसः द्रोणकलशं प्रति बहुधाराः क्षरन् शुद्धो जातः। एतादृशः शीघ्रगामी सोमरसः द्रुतगत्या इन्द्रदेवं प्राप्नोति ॥ १२ ॥

कुकुहः सोम्यो रस इन्दुरिन्द्राय पूर्व्यः ।

आयुः पवत आयवे ॥ १३॥ ऋ.मं.९.सू.६७.मं.८

**पदपाठः-** कुकुहः । सोम्यः । रसः । इन्दुः । इन्द्राय । पूर्व्यः ॥

आयुः । पवते । आयवे ।। १३ ॥

**सरलार्थः-** सोमः सर्वकर्मकारयितृत्वेन सर्वेषां समुच्छ्रितोऽतिशयितो भवति । सोमनामकवनस्पतितः निष्पीडितोऽयं रसः कलशेषु पवित्रेण पूतो भवति । आदौ पानाय इन्द्रार्थमभिमुखं गच्छति ॥ १३ ॥

हिन्वन्ति सूरमुस्रयः पवमानं मधुश्चुतम् ।

अभि गिरा समस्वरन् ॥ १४ ।। ऋ.मं.९.सू.६७.मं.९.

**पदपाठः-** हिन्वन्ति । सूरम् । उस्रयः । पवमानम् । मधुऽश्चुतम् ॥

अभि । गिरा । सम् । अस्वरन् ॥ १४ ॥

**सरलार्थः-** कर्मकरणार्थमितस्ततः संञ्चरन्त्योऽङ्गुलयः सोमात् स्वादिष्टं रसं निष्कासयन्ति । तदा अयं यागादिकर्मणि प्रेरितः सोमरसः बलवृद्धिकारी शुद्धश्च भवति । अस्य रसस्य प्रशंसायां समस्वरेण मन्त्रान् गायन्ति सर्वे स्तोतारः ऋत्विजः ॥ १४ ॥

अविता नो अजाश्वः पूषा यामनियामनि ।

आ भक्षत्कन्यासु नः ॥ १५ ॥ ऋ.मं.९.सू.६७.मं.१०

**पदपाठः-** अविता । नः । अजऽअश्वः । पूषा । यामनिऽयामनि ॥

आ । भक्षत् । कन्यासु । नः ॥ १५ ॥

**सरलार्थः-** अजा एवाश्व वाहनानि यस्य देवस्य वर्तते तादृशः पूषादेवः अस्माकं गमनपथस्य पालयिता भवतु । अपि च अस्मभ्यं शोभनीयाः कमनीयाः कन्याः प्रयच्छन्तु । यज्ञे अस्माकं रक्षिता भवतु ।

अयं सोमः कपर्दिने घृतं न पवते मधु ।

आ भक्षत्कन्यासु नः ॥ १६ ॥ ऋ.मं.९.सू.६७.मं.११

**पदपाठः-** अयम् । सोमः । कपर्दिने । घृतम् । न । पवते । मधु ॥

आ । भक्षत् । कन्यासु । नः ॥ १६ ॥

**सरलार्थः-** अयं मादयिताभिषुतोऽस्मदीयः सोमः जटाधारी महादेवनिमित्तम् अथवा मुकुटधारी पूषादेवनिमित्तं घृतसमानं मधुररसं प्रस्तौति । एतस्य मादकस्य हवीरूपस्य सोमरसस्य आस्वादनेन प्रीतः पूषादेवः अस्माकं कन्यानां सहायतां करोति ॥ १६ ॥

अयं त आघृणे सुतो घृतं न पवते शुचि ।

आ भक्षत्कन्यासु नः ॥ १७ ।। ऋ.मं.९.सू.६७.मं.१२

**पदपाठः-** अयम् । त । आघृणे । सुतः । घृतम् । न । पवते । शुचि ।

आ । भक्षत् । कन्यासु । नः ॥ १७॥

**सरलार्थः-** सर्वतो दीप्यमान हे पवमान पूषन् ! त्वदर्थम् अयम् अभिषुतः सोमः पात्रेषु पवित्रेण पवित्रो भवति क्षरति वा । शुद्धं घृतं यथा त्वां प्राप्नोति तद्वत् । ततस्त्वमभिलषितान्यस्माकं देहीति ॥ १७ ॥

वा॒चो ज॒न्तुः क॒वी॒नां पव॑स्व सोम॒ धार॑या ।

दे॒वेषु॑ रत्न॒धा अ॑सि ॥ १८ ॥ ऋ.मं.९.सू.६७.मं.१३

**पदपाठः-** वा॒चः । ज॒न्तुः । क॒वी॒नाम् । पव॑स्व । सो॒म॒ । धार॑या ॥

दे॒वेषु॑ । रत्न॒ऽधा । अ॑सि ॥ १८ ॥

**सरलार्थः-** हे सोम ! कवीनां क्रान्तप्रज्ञानां स्तोतृणां मेधाविनां च मध्ये त्वमेव वाचं जनयसि अर्थात् वाक्शक्तेः प्रेरको भवसि । अत्यन्तं वाग्मी त्वं पवित्रधारया द्रोणकलशं ग्रहांश्च प्राप्नोसि । तदनन्तरम् इन्द्रादिदेवेषु रमणशीलस्य निधाता भवसि । त्वं देवेषु स्तोत्रकारिषु कर्मकुर्वाणेषु यजमानेषु वास्मासु कनकादिरत्नस्य दाता भवसि ॥ १८ ॥

## शब्दार्थाः

**धामानि** - द्युप्रभृतिष्ववस्थितानि, **परिभूः** - परितः प्राप्तानि सन्तु, **दुर्यान्** - गृहान् (गृहा वै दुर्याः इति श्रुतेः), **गयस्फानः** - गृहस्य धनस्य वा वर्धयिता, **प्रतरणः** - प्रकर्षेण दुरितात् तारयिता, **सुवीरः** - शोभनैः वीरैः उपेतः, **आशुम्** - शीघ्रम्, **सदनम्** - गृहम्, **विदथ्यम्** - यज्ञम्, **सभेयम्** - सभायां साधुम्, **पृतनासु** - सेनासु, **अप्साम्** - जलम्, **वृजनम्** - बलम्, **गोपाम्** - गोपयितारं रक्षितारं वा, **उरु** - विस्तीर्णम्, **रायः** - धनम्, **वीर्यस्य** - बलस्य, **सहसावन्** - बलवन्, **ईशिषे** - ईश्वरः, **गविष्टौ** - सग्रामे, **अध्वरे** - हिंसारहिते, **पूतम्** - पवित्रम्, **सूरिः** - प्राज्ञः, **अन्धसा** - हवीरूपेणान्नेन, **अद्रिभिः** - ग्रावभिः, **द्युमन्तम्** - दीप्तियुक्तम्, **कनिक्रदत्** - शब्दं कुर्वन्, **शुष्मम्** - बलम्, **इन्दुः** - सोमः, **वाराणि** - वालानि, **हरिः** - हरितवर्णः सोमः, **वाजम्** - अन्नम् (सोमरसः), **अर्षसि** - धाराभिर्गच्छति, **श्रवांसि** - हवीरूपाणि अन्नानि, **शतग्वीनम्** - शतं गावो यस्य स शतगुः, **आशत** - व्याप्नुवन्ति, **सहस्त्रिणम्** - सहस्रसङ्ख्याकम्, **अश्विनम्** - अश्वयुक्तम, **आशवः** - क्षिप्रगामी, **ककुहः** - सोमः, **पवते** - पवित्रेण पूतो भवति, **पूर्व्यः** - पूर्वैः कृतोऽभिषुतः, **हिन्वन्ति** - अभिषवार्थं प्रेरयन्ति, **गीरा** -स्तुत्या, **मधुश्चुतम्** - मदकरस्य रसस्य च्यावयितारम्, **सूरम्** - सुवीर्यम्, **अविता** - पालयिता, **यामनियमानि** - सर्वस्मिन् गमने, **कपर्दिने** - कल्याणमुकुटवते, **शुचिम्** - शुद्धम्, **पूतम्** - पवित्रम्, **कवीनाम्** - क्रान्तप्रज्ञानाम् ।

## स्वाध्यायः

**१. निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) ........................ वीरं कर्मण्यं ददाति । (सोमम्, सूर्यो, विद्याम्)

(२) अयं समग्रः संसारः ........................ संयोगात् भवति । (अग्निसोमतत्त्वयोः, अग्निवायुतत्त्वयोः, अग्निसूर्यतत्त्वयोः)

(३) ग्रावभिः पेषितः त्वं भृशं शब्दं कुर्वन् ........................ प्रति गच्छ । (यज्ञगृहम्, कलशम्, स्वर्गम्)

(४) त्वं ........................ कनकादिरत्नस्य दाता भवसि । (देवेषु, मर्त्येषु, स्वर्गेषु)

(५) ........................ सूरिरन्धसा । (सूर्याय, अग्नये, इन्द्राय)

**२. निम्नाङ्कितनां प्रश्नानां एकैकवाक्येनोत्तराणि लिखत ।**

(१) द्रोणकलशे कस्य रसस्य स्थापनं भवति?

(२) इन्द्रदेवस्य कृते उत्तमहवीरूपेण कः स्तूयते?

(३) सोमः कस्य लोकस्य देवोऽस्ति?

(४) सम्पूर्णे ऋग्वेदे सोमदेवस्य कृते कति सूक्तानि वर्तन्ते?

(५) कानि सन्ति पूषादेवस्य वाहनानि?

**३. (अ) निम्नाङ्कितमन्त्राणां भावार्थं लिखत ।**

(१) सोमो धेनुं सोमो अर्वन्तमाशुं सोमो वीरं कर्मण्यं ददाति ।
सादन्यं विदथ्यं सभेयं पितृश्रवणं यो ददाशदस्मै ॥

(२) इन्दो व्यव्यमर्षसि वि श्रवांसि वि सौभगा ।
वि वाजान् त्सोम गोमतः ॥

(३) वाचो जन्तुः कवीनां पवस्व सोम धारया ।
देवेषु रत्नधा असि ॥

**(ब) निम्नलिखितमन्त्राणां पूर्तिं विधेया ।**

(१) या ते धामानि हविषा .................................. प्र चरा सोम दुर्यान् ॥

(२) आ न इन्दो शतग्विनं .................................. सोम सहस्रिणम् ॥

(३) त्वं सोमासि .................................. पवस्व मंहयद्रयिः ॥

**४. पञ्चवाक्यैः उत्तराणि लिखत ।**

(१) सोमः यजमानाय किं किं प्रयच्छति?

(२) सोमरसस्य निष्पादनं कथं भवति?

(३) सोमस्य किमस्ति महत्त्वम्?

(४) सोमेन के उत्पादिताः?

(५) सोमस्य प्रशंसां मन्त्रद्रष्टाऋषयः कथं कुर्वन्ति?

**५. शब्दरूपाणां परिचयं यच्छत ।**

(१) अद्रिभिः
(२) कवीनाम्
(३) अध्वरे
(४) वृजनम्
(५) वाहनानि

**६. क्रियापदानां परिचयं लिखत ।**

(१) जनयसि
(२) ज्ञायते
(३) भजते
(४) प्रयच्छ
(५) भव

**७. (अ) सन्धिविच्छेदं कुरुत ।**

(१) ददाशदस्मै
(२) ईदृग्भूतम्
(३) विश्वास्त्वमपः
(४) धाराभिर्गच्छसि
(५) सूरमुस्रयः

**( ब ) सन्धिमेलनं कुरुत ।**

(१) यामेभिः + आशत

(२) परिभूः + अस्तु

(३) अद्रिभिः + अभि + अर्ष

(४) इन्दुः + इन्द्राय

(५) अर्वन्तम् + आशुम्

**छात्र-प्रवृत्तिः**

- सम्पूर्णऋग्वेदस्य १५० सोमसूक्तेषु सोमदेवस्य कृते प्रयुक्तानां विशेषणपदानां संग्रहः करणीयः
- याज्ञवल्क्यविरचितग्रन्थानां सिंहावलोकनं कुर्वन्तु ।

**विशिष्टज्ञानम्**

सोमऽएव नो राजेमा मानुषीः प्रजाः ।
अविमुक्तचक्रऽआसीरँस्तीरे तुभ्यमसौ ॥

- हे नदि ! तव तीरे इमाः प्रजाः तिष्ठन्ति । किम्भूताः प्रजाः ? मानुष्यः । पुनः किम्भूताः ? अविमुक्तचक्राः (अविमुक्तम् अत्यक्तं चक्रं मण्डलं याभिस्ता अविमुक्तचक्राः) । अस्माकं प्रजानां सोमः राजा, राजा यथा रक्षकः पोषकः च एवम् अस्माकं सोमश्चन्द्रो रक्षकः पोषकः च भवत्विति ।

●

| ६ | ऋग्वेदे रुद्राभिषेकमन्त्राः २ |
|---|---|

# ६ ऋग्वेदे रुद्राभिषेकमन्त्राः २

**प्रस्तावना**

विश्वे शाश्वतः नियमः ऋतपदेन उच्यते, ऋततत्त्वं हि संसारस्य सञ्चालनं नियन्त्रणं च करोति । सूर्यः, चन्द्रः, समग्रसंसारस्य ऋततत्त्वेन नियन्त्रिताः भवन्ति । ऋततत्त्वस्य रूपद्वयं वर्तते-पालकतत्त्वं संहरकतत्त्वं च । प्राकृतिकनियमाकूलने वृत्तिकारणात् ऋततत्त्वं पोषकं रक्षकं च भवति । एतदतिरिक्तं विपरीतं वर्तनं नाशकत्त्वं संहारकतत्त्वञ्च भवति । एतदेव तत्त्वावबोधम् आधारीकृत्य पालकरक्षकतत्त्वं विष्णुः शिवः शंकरः वा कथ्यते । संहारकतत्त्वं रुद्रतत्त्वम् इति कथ्यते । वेदिकवाङ्मये रुद्रस्य कृते अनेके शब्दाः यथा रुद्रः, शिवः, भवः, शर्वः, पशुपतिः इत्यादयः कथ्यन्ते। संहारार्थकः रुद्रशब्दः भवति । दण्डदानात् दुःखदानात् संहारकरणात् च शर्वः इति कथ्यते । ऋग्वेदे यजुर्वेदे अथर्ववेदे च अनेकेषु सूक्तेषु रुद्रः वर्णितः । अभिषेकेन तृप्तोऽयं देवः जीवपुरुषस्य सर्वाणि दुःखानि निवारयति ! सोमरसेनापि अस्य देवस्याभिषेकं भवति । वैदिकसाहित्ये सोमरस निष्कासनस्य बहुविधप्रकाराः दृश्यन्ते । इन्द्रस्य कृते सोमपानं सुखकरं वर्तते । अयं अमृतप्रदायित्वात् सोमलतारूपेण सुविदितम् । एतस्य समीकरणम् अथर्ववेदे चन्द्रेण साकं वर्तते । अत्र सोमेन शुद्धतत्त्वं विद्यते येन देवाः जायन्ते, सुरायां मलिनत्वं दृश्यते येन मानवाः जायन्ते । अस्मिन् प्रकरणे ऋग्वेदस्य नवममण्डलस्थसप्तषष्टितमसूक्तस्य चतुर्दशमन्त्रतः द्वात्रिंशत्पर्यन्तं मन्त्राः प्रतिपादिताः वर्तन्ते ।

---

**आ कुलशेषु धावति श्येनो वर्म वि गाहते ।**

**अभि द्रोणा कनिक्रदत् ॥ १ ॥ ऋ.मं.९.सू.६७.मं.१४**

**पदपाठः-** आ । कुलशेषु । धावति । श्येनः । वर्म । वि । गाहते ॥
अभि । द्रोणा । कनिक्रदत् ।। १ ॥

**सरलार्थः-** ऋत्विग्भिरभिषिच्यमानः अयं सोमरसः द्रोणकलशं प्रति धावति सर्वतो भावेन गच्छति । यथा श्येनपक्षीविशेषः वर्म वरणीयं कुलायं स्वनीडं वा विगाहते प्रविशति तद्वत् । निनादितः अयं रसः अपरेषु पात्रेषु द्रोणकलशेषु च अत्यन्तं शब्दं कुर्वन् परिपूरितो भवति ।

**परि प्र सोम ते रसोऽसर्जि कुलशे सुतः ।**

**श्येनो न तक्तो अर्षति ॥ २ ॥ ऋ.मं.९.सू.६७.मं.१५**

**पदपाठः-** परि । प्र । सोम । ते । रसः । असर्जि । कुलशे । सुतः ॥
श्येनः । न । तक्तः । अर्षति ॥ २ ॥

**सरलार्थः-** हे सोम ! गमनशीलः श्येनपक्षी यथा सर्वत्र गच्छति पुनश्च स्वस्य आवासस्थानम् आगत्य तिष्ठति तथैव अभिषुतानन्तरं द्रोणकलशे संरक्षितः तव रसः पृथक् पृथक् परितो ग्रहेषु चमसेषु च विभक्तो भवति ।

**पवस्व सोम मन्दयन्निन्द्राय मधुमत्तमः ॥ ३ ॥ ऋ.मं.९.सू.६७.मं.१६**

**पदपाठः-** पवस्व । सोम । मन्दयन् । इन्द्राय । मधुमत्ऽतमः ॥ ३ ॥

**सरलार्थः-** हे सोम ! त्वम् इन्द्रं मोदमानः सन् अतिशयेन मधुररसरूपेण इन्द्रार्थमागच्छ ।

**असृग्रन् देववीतये वाजयन्तो रथा इव ॥ ४ ॥ ऋ.मं.९.सू.६७.मं.१७**

**पदपाठः-** असृग्रन् । देवऽवीतये । वाजऽयन्तः । रथाऽ इवा ॥ ४ ॥

**सरलार्थः-** शक्तिशालिनः अभिषुताः शत्रुधनानि बलानि वा स्वामिन इच्छन्तः रथा इव ध्वनितः सोमरसाः देवानां पानाय ऋत्विग्भिः प्रदीयन्ते ।

**ते सुतासो मदिन्तमाः शुक्रा वायुमसृक्षत ॥ ५ ।। ऋ.मं.९.सू.६७.मं.१८**

**पदपाठः-** ते । सुतासः । मदिन्ऽतमाः । शुक्राः । वायुम् । असृक्षत ॥ ५॥

**सरलार्थः-** अतिशयेन मादयितारः दीप्यमानाः अभिषुताः ते सोमरसाः वायुः इव ध्वनिं कुर्वन्ति । अर्थात् वायुमेव सोमपानार्थमागच्छति ।

**ग्राव्णा तुन्नो अभिष्टुतः पवित्रं सोम गच्छसि ।**

**दधत्स्तोत्रे सुवीर्यम् ॥ ६ ॥ ऋ.मं.९.सू.६७.मं.१९**

**पदपाठः-** ग्राव्णा । तुन्नः । अभिऽस्तुतः । पवित्रम् । सोम । गच्छसि ॥

दधत् । स्तोत्रे । सुऽवीर्यम् ॥ ६ ॥

**सरलार्थः-** हे सोम ! प्रस्तरेण अभिपीडितोऽभिषुतस्त्वं पवित्रं सन् स्तोत्रकारिणे जनाय शोभनवीर्योपेतं धनादिकं प्रदाय देवतार्पणनिमित्तं गच्छसि ।

**एष तुन्नो अभिष्टुतः पवित्रमति गाहते ।**

**रक्षोहा वारमव्ययम् ॥ ७ ।। ऋ.मं.९.सू.६७.मं.२०**

**पदपाठः-** एषः । तुन्नः । अभिऽस्तुतः । पवित्रम् । अति । गाहते ॥

रक्षःऽहा । वारम् । अव्ययम् ॥ ७ ॥

**सरलार्थः-** ग्रावभिः अभिव्यथितः प्रेषितः अभिष्टुतः परिष्कृतः अस्मदीयः अयं सोमरसः कर्मविघ्नकारिणां रक्षसां पापानां वा हन्ता भवेत् । मेषवालैः परिष्कृतः अयं द्रोणकलशं प्रविशति ।

**यदन्ति यच्च दूरके भयं विन्दति मामिह ।**

**पवमान वि तज्जहि ॥ ८ ॥ ऋ.मं.९.सू.६७.मं.२१**

**पदपाठः-** यत् । अन्ति । यत् । च । दूरके । भयम् । विन्दति । माम् । इह ।

पवमान । वि । तत् । जहि ॥ ८ ।।

**सरलार्थः-** हे पवमान सोम ! अन्तिके अतिदूरदेशे अथवा अस्मिन् प्रदेशेऽपि यत् भयं लभते तत् भयं त्वं विशेषेण नाशय । पुनश्च अस्मिन् क्रियमाणे यज्ञेऽस्मिँल्लोके वा यद्भयं व्याप्नोति तन्नाशयेत्यर्थः ।

**पवमानः सो अद्य नः पवित्रेण विचर्षणिः ।**

**यः पोता स पुनातु नः ॥ ९ ॥ ऋ.मं.९.सू.६७.मं.२२**

**पदपाठः-** पवमानः । सः । अद्य । नः । पवित्रेण । विऽचर्षणिः ॥

यः । पोता । सः । पुनातु । नः ॥ ९ ॥

**सरलार्थः-** सः तादृशः प्रसिद्धः सर्वस्य द्रष्टा पवमानः सोमः इदानीमेव पापशोधकेन तेजसा अस्मान् पापरहितान् करोतु। किम्भूतः पवमानः ? विचर्षणिर्द्रष्टा कृताकृतप्रत्यवेक्षक इत्यर्थः । यश्च स्वभावतः पोता नाम रक्षको वायुः, स अस्मान् पवित्रं करोतु ।

**यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा ।**

**ब्रह्म तेन पुनीहि नः ॥ १० ॥ ऋ.मं.९.सू.६७.मं.२३**

**पदपाठः-** यत् । ते । पवित्रम् । अर्चिषि । अग्ने । विऽततम् । अन्तः । आ ।

ब्रह्म । तेन । पुनीहि । नः ॥ १० ॥

**सरलार्थः-** हे पवमानगुणविशिष्ट अग्ने ! तव पवित्रं शोधकं यत् अस्ति तन्मध्ये यत् सौरविद्युतादि त्रयीरूपं वा पवित्रं प्रसारितं वर्तते तेन पवित्रेण सामर्थ्येन तादृशेन तेजसा वा त्वं पुत्रादिवर्धनकारी भूत्वा अस्माकं शरीरं पुनीहि।

**यत्ते॑ प॒वित्र॑म॒र्चिष्यग्ने॒ तेन॑ पुनीहि नः ।**

**ब्र॒ह्म॒स॒वैः पु॑नीहि नः ॥ ११ ॥ ऋ.मं.९.सू.६७.मं.२४**

**पदपाठः-** यत् । ते॒ । प॒वित्र॑म् । अ॒र्चिवत् । अग्ने॑ । तेन॑ । पु॒नी॒हि॒ । न॒ः ॥

ब्र॒ह्म॒ऽस॒वैः । पु॒नी॒हि॒ । नः ॥ ११ ॥

**सरलार्थः-** हे अग्ने ! पवित्रं शोधकं त्वदीयं यत् तेजो विद्यते तेन तेजसा अस्मान् पूतान् कुरु । किञ्च ब्राह्मणकर्तृकसोमाभिषवैः अस्मान् पवित्रान् कुरु । यतोहि सोमः ब्रह्मस्वरूपो वर्तते ।

**उ॒भाभ्यां॑ देव सवितः प॒वित्रे॑ण स॒वेन॑ च ।**

**मां पु॑नीहि वि॒श्वतः॑ ॥ १२ ॥ ऋ.मं.९.सू.६७.मं.२५**

**पदपाठः-** उ॒भाभ्या॑म् । दे॒व॒ । स॒वि॒त॒रिति॑ । प॒वित्रे॑ण । स॒वेन॑ । च॒ ॥

माम् । पु॒नी॒हि॒ । वि॒श्वतः॑ ॥ १२ ॥

**सरलार्थः-** सर्वस्य प्रेरकः हे सवितृरूप सोम ! त्वं पवित्रेण पापशोधकेन त्वदीयेन तेजसा सोमाभिषवेण च उभाभ्यां विश्वतः सर्वतः मां पवित्रं कुरु ।

**त्रि॒भिष्ट्वं दे॑व सवित॒र्वर्षि॑ष्ठैः सोम॒धाम॑भिः ।**

**अग्ने॒ दक्षैः॑ पुनीहि नः ॥ १३ ॥ ऋ.मं.९.सू.६७.मं.२६**

**पदपाठः-** त्रि॒ऽभिः । त्वम् । दे॒व॒ । स॒वि॒त॒रिति॑ । वर्षि॑ष्ठैः । सो॒म॒ । धाम॑ऽभिः ।

अग्ने॑ । दक्षैः॑ । पु॒नी॒हि॒ । न॒ः ॥ १३ ॥

**सरलार्थः-** सर्वस्य स्वस्वकर्मणि प्रेरयित्री, सर्वदेवस्तुत्य पवमानगुणविशिष्टसोमादिरूप हे अग्निदेव ! त्वं वृद्धतमैः सामर्थ्यवद्भिः त्रिभिः धामभिः अर्थात् अग्नि-वायु-सूर्यात्मकैः त्रिभिः शरीरैः अस्मान् परिशुद्धान् कुरु । अत्र अग्नेः स्वरूपत्रयविषये चर्चा वर्तते ।

**पुनन्तु॑ मा देवजनाः पुनन्तु वस॑वो धिया॑ ।**

**विश्वे॑ देवाः पुनीत॒ मा जात॑वेदः पुनीहि मा ॥ १४ ॥ ऋ.मं.९.सू.६७.मं.२७**

**पदपाठः-** पु॒नन्तु॑ । माम् । दे॒व॒ज॒नाः । पु॒नन्तु॑ । वस॑वः । धि॒या ।

विश्वे॑ । दे॒वाः । पु॒नी॒त॒ । मा॒ । जात॑वेदः । पु॒नी॒हि॒ । मा॒ ॥ १४ ॥

**सरलार्थः-** देवजनाः देवानुगामिनो जनाःमां पुनन्तु । पुनः वस्वादिदेवाः आत्मीयेन कर्मणा पुनन्तु । विश्वेदेवाः मां पुनन्तु। हे जातदेवः ! त्वमपि मां पुनीहि ।

**प्र प्या॑यस्व॒ प्र स्यन्द॑स्व॒ सोम॒ विश्वे॑भिरं॒शुभिः॑ ।**

**दे॒वेभ्य॑ उत्त॒मं ह॒विः ॥ १५ ॥ ऋ.मं.९.सू.६७.मं.२८**

**पदपाठः-** प्र । प्या॒य॒स्व॒ । प्र । स्य॒न्द॒स्व॒ । सोम॑ । विश्वे॑भिः । अं॒शु॒ऽभिः॑ ।

दे॒वेभ्यः॑ । उ॒त्ऽत॒मम् । ह॒विः ॥ १५ ॥

**सरलार्थः-** हे सोम ! त्वम् अस्मान् प्रकर्षेण वर्धय । यतोहि सोमेन देवाः वर्धन्ते जायन्ते च । एतदर्थं देवेभ्यः सकाशात् त्वदीयं सोमरूपम् उत्तमं प्रशस्ततमं हविः कलशं प्रति गच्छति ।

**उप॑ प्रि॒यं पनि॑प्नतं॒ युवा॑नमाहुती॒वृध॑म्।**

**अग॑न्म॒ बिभ्र॑तो॒ नमः॑ ॥ १६ ॥ ऋ.मं.९.सू.६७.मं.२९**

**पदपाठः-** उप॑ । प्रि॒यम् । पनि॑प्नतम् । युवा॑नम् । आ॒हु॒ति॒ऽवृध॑म् ।

अग॑न्म । बिभ्र॑तः । नमः॑ ॥ १६ ॥

**सरलार्थः-** सर्वस्य प्रीणयितारं अत्यन्तं शब्दायमानं तरुणम् आहुतिभिर्वर्धनीयं पवमानं सोमं वयं नमामः । हे हविर्धारयन् सोम ! तव समीपं वयम् उपगच्छेम ।

**अ॒लाय्य॑स्य प॒र॒शुर्न॑नाश॒ तमा प॑वस्व देव सोम ।**

**आ॒खुं चि॑दे॒व दे॑व सोम ॥ १७ ॥ ऋ.मं.९.सू.६७.मं.३०**

**पदपाठः-** अ॒लाय्य॑स्य । प॒र॒शुः । न॒ना॒श । तम् । आ । प॒व॒स्व॒ । दे॒व॒ । सो॒म॒ ।

आखुम् । चित् । एव । देव । सोम ॥ १७ ॥

**सरलार्थः-** हे दीप्यमानसोम ! अस्मदाभिमुख्येन गच्छ । त्वं क्षरणशीलो भव । त्वं शत्रोः शस्त्रविनाशकारी असि। त्वम् अस्माकं शत्रुनाशको भव ।

**यः पा॑वमा॒नीर॒ध्येत्यृषि॑भिः॒ संभृ॑तं॒ रस॑म् ।**

**सर्वं॒ स पू॒तम॑श्नाति स्वदि॒तं मा॑त॒रिश्व॑ना ॥ १८ ॥ ऋ.मं.९.सू.६७.मं.३१**

**पदपाठः-** यः । पावमानीः । अधिऽएति । ऋषिऽभिः । सम्ऽभृतम् । रसम् ।

सर्वम् । सः । पूतम् । अश्नाति । स्वदितम् । मातरिश्वना ॥ १८ ॥

**सरलार्थः-** यः जनः पवनमानदेवतायाः सर्वाऋचः सूक्तद्रष्टृभिर्मधुच्छन्दादिऋषिभिः सम्पादितं वेदरसभूतं सारम् अध्येति । सः जनः सर्वं भोज्यजातं परिशुद्धमेव अश्नाति । पुनश्च पवित्रेण वायुना स्वादूकृतं पापरहितमन्नं भक्षयति ।

**पा॒व॒मा॒नीर्यो अ॒ध्येत्यृषि॑भिः॒ संभृ॑तं॒ रस॑म् ।**

**तस्मै॒ सर॑स्वती दुहे क्षी॒रं स॒र्पिर्मधू॑द॒कम् ॥ १९ ॥ ऋ.मं.९.सू.६७.मं.३२**

**पदपाठः-** पा॒व॒मा॒नीः । यः । अ॒धि॒ऽएति॑ । ऋषि॑ऽभिः । सम्ऽभृ॑तम् । रस॑म् ।

तस्मै॑ । सर॑स्वती । दु॒हे॒ । क्षी॒रम् । स॒र्पिः । मधु॑ । उ॒द॒कम् ॥ १९ ॥

**सरलार्थः-** यःवैदिकजनः मधुच्छन्दादिभिः ऋषिभिः सम्पादितानां वेदसाररूपाणां पवमानदेवताकानाम् ऋचाम् अध्ययनं करोति तस्मै पवमानाध्ययनं कुर्वते जनाय रसस्वती वाग्देवता यज्ञसाधनभूतं पयःघृतं, मधु, उदकं च स्वयमेव दोहनं कृत्वा ददाति ।

## शब्दार्थाः

**धावति** – सर्वतो भावेन गच्छति, **वर्म** – वरणीयं कुलायं, **गाहते** – प्रविशति, **कनिक्रदत्** – अत्यन्तं शब्दं कुर्वन्, **द्रोणाः** – द्रोणकलशान्, **सुतः** – अभिषुतः, **अर्षति** – गच्छति, **असर्जि** – पृथक् पृथक् पात्रेषु विभक्तो भवति, **तक्तः** – गमनशीलः, **मन्दयन्** – मादयिता भवन्, **मधुमत्तमः** – अतिशयेन मधुररसरूपेण, **पवस्व** – इन्द्रार्थमागच्छ, **वाजयन्त** – शत्रुधनानि बलानि वा स्वामिन इच्छन्त, **देववीतये** – देवानां पानाय, **मन्दिन्तमाः** – अतिशयेन मादयितारः, **शुक्राः** – दीप्यमानाः, **असृक्षत** – असृजन, **सुवीर्यम्** – शोभनवीर्योपेतं, **दधत्** – विदधत्, **गाहते** – द्रोणकलशं प्रविशति, **रक्षोहा** – रक्षसां पापानां वा हन्ता, **अन्ति** – अन्तिके, **दूरके** – अतिदूरदेशे, **विन्दति** – लभते प्राप्नोति वा, **जहि** – नाशय, **विचर्षणिः** – सर्वस्य द्रष्टा, **पुनातु** – पापरहितान् करोतु, **अर्चिषि** – सौरविद्युतादितेजसि,

**विततम्** – आविस्तृतम्, **पुनीहि** – पापरहितं कुरु, **ब्रह्मसवैः** – ब्राह्मणकर्तृकसोमाभिषवैः, **सवेन** – सोमाभिषवेण, **वर्षिष्ठैः** – वृद्धतमैः, **दक्षैः** – सामर्थ्यवद्भिः, **धामभिः** – शरीरैः, **जातवेदः** – अग्निः, **प्यायस्व** – अस्मान् प्रकर्षेण वर्धय, **स्यन्दस्व** – कलशादीन्, **पनिप्नतम्** – अत्यन्तं शब्दायमान्, **युवानम्** – तरुणम्, **बिभ्रतः** – धारयन्तः, **अलाय्यस्य** – शत्रोः, **परशुः** – आयुधम् (शस्त्रम्) **अश्नाति** – भक्षयति, **मातरिश्वना** – वायुना, **सर्पिः** – घृतम्, **नानश** – नाशयतु ।

## स्वाध्यायः

**१. निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) संहारकतत्त्वं ........................ इति कथ्यते । (रुद्रतत्त्वम्, विष्णुतत्त्वम्, ब्रह्मतत्त्वम्)

(२) अभिषुताः ते सोमरसाः ........................ इव ध्वनिं कुर्वन्ति । (इन्द्र, वायु, मेघ)

(३) ........................ दुहे क्षीरं सर्पिर्मधूदकम् । (महालक्ष्मी, महाकाली, सरस्वती)

(४) उभाभ्यां देव ........................ पवित्रेण सवेन च । (सवितः, सोमः, वायुः)

(५) विश्वे देवाः पुनीत मा ........................ पुनीहि मा । (वैश्वानरः, जातवेदः, आदित्यः)

**२. निम्नाङ्कितानां प्रश्नानाम् एकैक वाक्येनोत्तराणि लिखत ।**

(१) कः द्रोणकलशं प्रति धावति ?

(२) जातवेदः इत्युक्ते कः ज्ञायते ?

(३) 'पवमान' इतिशब्दस्य कोऽर्थ ?

(४) देवानां पानाय ऋत्विग्भिः किं प्रदीयन्ते ।

(५) 'मातरिश्वा' इति शब्दस्य कोऽर्थ ?

**३. (अ) निम्नाङ्कितमन्त्राणां भावार्थं लिखत ।**

(१) आ कलशेषु धावति श्येनो वर्म वि गाहते । अभि द्रोणा कनिक्रदत् ॥

(२) त्रिभिष्ट्वं देव सवितर्वर्षिष्टैः सोमधामभिः । अग्ने दक्षैः पुनीहि नः ॥

(३) यदन्ति यच्च दूरके भयं विन्दति मामिह । पवमान वि तज्जहि ॥

**(ब) निम्नलिखितमन्त्राणां पूर्तिं विधेया ।**

(१) पुनन्तु मा देवजनाः .................................. जातवेदः पुनीहि मा ॥

(२) पवस्व सोम .................................. मधुमत्तमः ॥

(३) उभाभ्यां देव .................................. पुनीहि विश्वतः ॥

**४. पञ्चवाक्यैः उत्तराणि लिखत ।**

(१) सोमः कथम् अस्मान् पापरहितान् कर्तुं शक्नोति ?

(२) सोमरसः कथं परिष्कृतो भवति ?

(३) सोमरसस्य किमस्ति महत्त्वम् ?

(४) सोमरसस्य के के विशेषगुणाः सन्ति ?

(५) यः ऋषिभिः सम्पादितानां पवमानदेवताकानाम् ऋचाम् अध्ययनं करोति सः किं प्राप्नोते ?

**५. शब्दरूपाणां परिचयं यच्छत ।**

(१) ब्रह्मसवैः

(२) धामभिः

(३) ऋत्विग्भिः

(४) मातरिश्वना

(५) शत्रोः

**६. क्रियापदानां परिचयं लिखत ।**

(१) बिभ्रतः

(२) अर्षति

(३) विन्दति

(४) उपगच्छेम

(५) अश्नाति

**७. (अ) सन्धिविच्छेदं कुरुत ।**

(१) मन्दयन्निन्द्राय

(२) यदन्ति

(३) विश्वेभिरंशुभिः

(४) सोमरसेनापि

(५) यद्धयम्

**(ब) सन्धिमेलनं कुरुत ।**

(१) रसः + असर्जि

(२) परशुः + ननाश

(३) पूतम् + अश्नाति

(४) पावमानीः + यः

**छात्र-प्रवृत्तिः**

- रुद्राभिषेकसमये प्रत्यक्षरूपेण तत्र स्थित्वा मन्त्राणामुच्चारण-प्रयोगविध्यादिकम् अवलोकनीयम्

**विशिष्टज्ञानम्**

प्रतिसंवत्सरं सोमः पशुः प्रत्ययनं तथा ।
कर्त्तव्याग्रयणेष्टिश्च चातुर्मास्यानि चैव हि ॥ (याज्ञ. स्मृति-१/१२५)

- त्रैवर्णिको गृहस्थः प्रतिसंवत्सरं नूतनसंवत्सरे नवसस्योत्पत्तावाग्रयणाख्ययेष्ट्या, ऋत्वन्ते चातुर्मास्याख्ययागैः, उत्तरायण-दक्षिणायनयोरादौ निरूढपशुबन्धाख्ययागेन, संवत्सरसमाप्तिदशायां वसन्तकाले सोमरससाध्यैः अग्निष्टोमादियागैश्च यजेतेति ।

●

| ७ | मेधासूक्तम् ( ऋग्वेदीयम् ) |
|---|---|

## प्रस्तावना

ऋग्वेदस्य परिशिष्टभागे अस्य मेघासूक्तस्य वर्णनं दृश्यते । अस्मिन् सूक्ते एकादश मन्त्राः सन्ति । ऋग्वेदमतिरिच्य कृष्णयजुर्वेदीयमहानारायणोपनिषदि, अथर्ववेदे, तैत्तिरीयारण्यके शुकलयजुर्वेद च मेधाजननपरकमन्त्राः दृश्यन्ते । मेधाशक्तिमुत्पादनाय के के उपायाः अवलम्बनीयाः तस्मिन् विषये विविधेषु शास्त्रेषु चर्च्चा वर्तते । आचार्य याज्ञवल्क्यः याज्ञवल्यशिक्षायां मेधाशक्त्युत्पादनाय सैन्धवलवणमिश्रिता शीतलोदेकेन सह त्रिफलां स्वीकर्तुं शिष्यमुपदिशति -

**त्रिफलां लवणाक्तां वै भक्षयेच्छिष्यकः सदा ।**

**क्षीणमेधाजनन्येषा स्वरवर्ण करी तथा ॥**

अथर्ववेदस्य शौनकशाखायाः प्रथमसूक्ते 'ये त्रिषप्ताः' इति मन्त्रः श्रूयते । अस्य सूक्तस्य मेधाजननकर्मसु विनियोगः वर्तते । यदाह कौशिकः - 'पूर्वस्य मेधाजननानि' अत्र पूर्वशब्देन 'ये त्रिषप्ताः' इति सूक्तस्य ग्रहणं भवति । अनेन सूक्तेन मेधाकामस्य यानि कार्याणि तानि सन्ति- उदुम्बर-पलाश-कर्कन्धु-समिदाधानम्, ब्रीहि-यव-तिलानाम् आवपनम्, क्षीरौदनपुरोडाशरसानां भक्षणम्, उपाध्यायाय मैक्षदानम्, सुप्तस्योपाध्यायस्य कर्णानुमन्त्रणम्, उपाध्यायोपसदनकाले जपः, आज्यमिश्रधानाहोमः, तिलमिश्रधाना हुत्वा तच्छेषभक्षणम्, उपाध्यायय दण्डाजिनधाना प्रदातुं धानानुमन्त्रणम्, तद्वदेव धानहोमः, शुकसारिभारद्वाजानां पक्षिणां जिह्वाबन्धनम् । एतानि कर्माणि मेधाजननफलसाकत्वेन वर्णितत्वाद् विकल्पेन अनुष्ठेयानि । कर्मभूयस्त्वात् फलभूयस्त्वम् इति न्यायात् समुच्चयेन वा अनुष्ठेयानि । अथवा उपनयनदिवसेऽपि मेधाकामस्य ब्रह्मचारिणः मेघासूक्तेन आज्यहोमः कार्यः । अस्मिन् सूक्ते कस्मिन् स्थले 'मेधां च देहि मे' पुनश्च कुत्र 'मेधां धाता ददातु ते' इति श्रूयते । अत्र विहितानि मेधाजनादीनि कर्माणि फलार्थी स्वयमेव यदि अनुतिष्ठेत् तदा मे इति अस्मच्छब्दस्य मुख्य एवार्थः सम्भवति ।

---

**मे॒धां मह्य॒मङ्गि॑रसो मे॒धां स॒प्त ऋष॑यो ददुः ।**

**मे॒धामिन्द्र॑श्चा॒ग्निश्च॑ मे॒धां धाता द॑दातु ते ॥ १ ॥**

**पदपाठः-** मेधाम् । मह्यम् । अङ्गिरसः । मेधाम् । सप्त । ऋषयः । ददुः ।
मेधाम् । इन्द्रः । च । अग्निः । च । मेधाम् । धाता । ददातु । ते ॥

**सरलार्थः-** मेधाम् मह्यम् अङ्गिरसो ददातु । मेधा सप्त ऋषयः प्रयच्छन्तु । मेधाम् इन्द्रश्चाग्निश्च ददातु । तव कृते धाता मेधां ददातु ॥

**मे॒धां ते॒ वरु॑णो रा॒जा मे॒धां दे॒वी सर॑स्वती ।**

**मे॒धां ते॑ अ॒श्विनौ॑ दे॒वा वा ध॑त्ता॒ं पुष्क॑रस्त्रजा ॥ २ ॥**

**पदपाठः-** मेधाम् । ते । वरुणः । राजा । मेधाम् । देवी । सरस्वती ।
मेधाम् । ते । अश्विनौ । देवावा । धत्ताम् । पुष्करस्त्रजा ॥

**सरलार्थः-** मेधाम् ते तव वरुणो राजा, मेधां देवी सरस्वती च । अश्विनौ अश्विनीकुमारौ देवौ ते तव मेधां धारणवर्तीं बुद्धिम् आधत्तां कुरुताम् । किम्भूतौ ? पुष्करस्त्रजौ पुष्करं कमलं तन्मयी स्रक् माला ययोस्तौ पुष्करस्त्रजौ पद्ममालिनौ ।

**या मे॒धा अ॑प्स॒रस्सु॑ गन्ध॒र्वेषु॑ च॒ यन्मन॑ः ।**

**दैवी॒ या मानु॑षी मे॒धा सा मा॒मा वि॑शतादि॒माम् ॥ ३ ॥**

**पदपाठः-** या । मेधा । अप्सरसु । गन्धर्वेषु । च । यत् । मनः ।

दैवी । या । मानुषी । मेधा । सा । विशताद् । इमाम् ॥

**सरलार्थः-** या मेधा या धारणवती बुद्धिः अप्सरसु देवलोकस्त्रीषु गन्धर्वेषु देवविशेषेषु यत् (ते) मनः यच्चित्तम् तद् दैवी या मेधा या (च) मानुषी मेधा सा इमाम् मम मतिं विशताद् आगच्छतु इति भावः ।

**यन्मे॒ नोक्तं त॒द्रम॑तां॒ शके॑यं॒ यद॑नुब्रु॒वे ।**

**निश॑मतं॒ नि श॑मामहै॒ मयि॑ व्र॒तं स॒ह व्र॒तेषु॑ भूयास॒ं ब्रह्म॑णा॒ सं ग॑मेमहि ॥ ४ ॥**

**पदपाठः-** यत् । मे । न । उक्तम् । तत् । रमताम् । शकेयम्। यत् । अनुब्रुवे ।

निशामतम् । निशामहै । मयि । व्रतम् । सह । व्रतेषु । भूयासम् । ब्रह्मणा । सम् । गमेमहि॥

**सरलार्थः-** यत् यत् किमप्यभिष्टम् मे मम नोक्तम् न याचितम् न निवेदितं वा तत् तदनुक्तमपि मयि तिष्ठतु इति भावः, शकेयम् सक्षमो भूयासम् यत् अनुब्रुवे यदनुब्रवणं करोमि निशामतम् निशामकम् मनसः तत् मयि निशामहै प्रार्थनया शमयामः व्रतम् कर्म यज्ञकर्म वा सह सार्धम् भूयासम् भवेम । अनेन प्रकारेण ब्रह्मणा वेदेन कर्मणा ब्रह्मणा वा सह सार्धम् गमेमहि । अनेन व्रतकर्मणा सह ब्रह्मतत्त्वमपि प्राप्नुयाम इत्यर्थः।

**श॑रीरं मे॒ विच॑क्षणं॒ वाङ्मे मे॒धुम॒द् दुहा॑म् ।**

**अ॑वृद्धम॒हम॒सौ सूर्यो॒ ब्रह्म॑णा॒नी स्थ॑ः श्रु॒तं मे॒ मा प्र हा॑सीः ॥ ५ ॥**

**पादपाठः-** शरीरम् । मे । विचक्षणम् । वाक् । मे । मधुमत् । दुहाम् ।

अवृद्धम् । अहम् । असौ । सूर्यः । ब्रह्मणानी । स्थः । श्रुतम् । मे । मा । प्र । हासीः ॥

**सरलार्थः-** शरीरम् मम सम्पूर्णशरीरम् पाञ्चभौतिकम् मे मम विचक्षणम् सामर्थ्ययुक्तं कर्मणि कुशलम् इत्यर्थः, वाक् वाणी मे मम मधुमद् माधुर्योपेता दुहाम् कामनापूरणयुक्ता कामप्रदानसमर्था वा अहं अहमात्मस्वरूपः अवृद्धम् जरारहितः हे असौ सूर्य ! ब्रह्मणानी ब्रह्ममार्गः है परमात्मन् स्थः भव । श्रुतम् अधिगतं श्रुतिज्ञानं मे मम मा न प्रहासीः त्यजेत् अर्थात् सदासर्वदा मम पार्श्वे वेदोक्तज्ञानं तिष्ठतु इति भावः ।

**मे॒धां देवीं मन॑सा॒ रेज॑मानां गन्ध॒र्वजु॑ष्टां॒ प्रति॑ नो जुषस्व ।**

**मह्यं॒ मेधां॑ व॒द मह्यं॒ श्रिय॑ं वद मेधा॒वी भू॑यासम॒जरा॑जरिष्णु ॥ ६ ॥**

**पदपाठः-** मेधाम् । देवीम् । मनसा । रेजमानाम् । गन्धर्वः । जुष्टाम् । प्रति । नः । जुषस्व ।

मह्यम् । मेधाम् । वद । मह्यम् । श्रियम् । वद । मेधावी । भूयासम् । अजराः। जरिष्णु ॥

**सरलार्थः-** (अहम्) मेधां देवीम् प्रज्ञादेवीम्, रेजमानाम् गतिशीलां चैतन्यरूपां वा, गन्धर्वजुष्टां या गन्धर्वसेविताऽस्ति ताम् स्तौमीति भावः । सा त्वं हे मेधादेवी ! नः अस्माकं जुषस्व सेवस्व । अतः मह्यम् मेधां वद मेधां देही, श्रीयं वद लक्ष्मीं देही, येनाहं अजरम् जरारहितः, अजरिष्णुः जरावस्थामनीषारहितः मेधावी भूयासम् भवेम इति भावः ।

**सद॑स॒स्पति॒मद्भु॑तं प्रि॒यमिन्द्र॑स्य॒ काम्य॑म् । स॒निं मे॒धाम॑यासिषम् ॥ ७॥**

**ऋ.१.१८.६,वा.य.३२.१३**

**पदपाठः-** सदसः । पतिम् । अद्भुतम् । प्रियम् । इन्द्रस्य । काम्यम् । सनिम् । मेधाम् । अयासिषम् ॥

**सरलार्थः-** सीदति अस्मिन् अव्याकृते कारणे सर्वं जगत् इति सदः, तस्य पतिं पालकम् अन्तर्यामिणम् अयासिषम् अहं प्राप्तवान् अस्मि । कीदृशं सदसस्पतिम् ? अद्भुतम् आश्चर्यरूपम्, मनसा अपि अचिन्त्यम्, रचनारूपस्य

जगतः अनायासेन निर्मातृत्वम् अद्भुततरम् । इन्द्रस्य देवराजस्यापिप्रियम् । सः अपि अन्तर्यामिणं कदा प्राप्स्यामि इत्येवम् आशास्ते । अत एव सर्वैः अन्यैः काम्यम् अपेक्षणीयम् । सनिं कर्मफलस्य दातारम्, मेधां श्रुताधीतग्रन्थधारणशाक्तिं प्रयच्छन्तम् इति ।

**यां मे॒धां दे॒वग॑णाः पि॒तर॑श्चो॒पास॑ते ।**

**तया॑ मामद्य मे॒धया॑ग्ने मेधा॒विनं॑ कुरु ॥ ८ ॥ वा.य.३२.१४**

**पदपाठः-** याम् । मेधाम् । देवगणाः । पितरः । च । उप । आसते ।

तया । माम् । अद्य । मेधया । अग्ने । मेधाविनम् । कुरु ॥

**सरलार्थः-** हे अग्ने ! अग्निप्रकान्तर्यामिन् देवगणाः देवसमूहाः पितरश्च यां मेधाम् उपासते प्रार्थयन्ते, तया अद्य इदानीं मां मेधाविनं कुरु ।

**मेधा॒व्य॑हं सु॒मनाः॑ सु॒प्रती॑कः श्र॒द्धाम॑नाः स॒त्यम॑तिः सु॒शेवः॑ ।**

**म॒हाय॒शा धा॒रयि॒ष्णुः॒ प्रव॒क्ता भू॒यास॑मस्मै श॒रया॑ प्रयो॒गो ॥ ९ ॥**

**पदपाठः-** मेधावी । अहम् । सुमनाः । सुप्रतीकः । श्रद्धामनाः । सत्यमतिः । सुशेवः ।

महायशा । धारयिष्णुः । प्रवक्ताः । भूयासम् । अस्मै । शरया । प्रयोगे ॥

**सरलार्थः-** अहम् मेधावी प्रज्ञावान् ज्ञानदारणसमर्थः, सुमनाः शोभनमनस्कः, सुप्रतीकः शोभनाननः, श्रद्धामनाः श्रद्धालुः, सत्यमतिः सत्यनिष्ठमतिः, सुशेवः सात्विकधनोपेतः, महायशाः महायशस्वी, धारयिष्णुः ज्ञानधारणकामः, प्रवक्ताः प्रवाचकः, अस्मै शिष्याय अथवा तृतीयार्थे चतुर्थी (अनया) शरया शरप्रयोगे शररूपयज्ञप्रयोगे वा भूयासम् भवेम ।

**ना॒शयि॒त्री प॑लाश॒स्यारुष॑सौ पथि॒काम॑सु ।**

**अथो॑ त॒तस्य॒ यक्ष्मा॑णमपापा॑ रोग॒नाशि॑नी ॥ १० ॥**

**पदपाठः-** नाशयित्री । पलाशस्य । अरुषसौ । पथिकाम् । असु ।

अथः । ततस्य । यक्ष्माणम् । अपापा । रोगनाशिनी ॥

**सरलार्थः-** नाशयित्री विनाशयित्री, पलाशस्य पलाशवृक्षस्य अरुषसौ कल्याणवृतौ सत्यां, पथिकाम् मार्गप्रशस्तकरीम् मोक्षमार्गप्रसस्तकरी, अथ एवञ्च तस्य विसृतस्य, यक्षाणम् यक्ष्मारोगस्य, अपापा पापरहिता, रोगनाशिनी रोगविनाशिनी अस्तीति भावः ।

**ब्र॒ह्म॒वृ॒क्ष पलाश॒ त्वं श्र॒द्धां मे॑धां च॒ देहि॑ मे ।**

**वृक्षा॒धि॒प न॑मस्ते॒ऽस्तु अ॒त्र त्वं॑ सं॑नि॒धौ भव ॥ ११ ॥**

**पदपाठः-** ब्रह्मवृक्षः । पलाशः । त्वम् । श्रद्धाम् । मेधाम् । च । देहि । मे ।

वृक्षाधिपः । नमस्ते । अस्तु । अत्र । त्वम् । संनिधौ । भव ॥

**सरलार्थः-** हे पलाश वृक्ष ! त्वम् ब्रह्मवृक्षः वेदवृक्षः वेदोक्तवृक्षः परब्रह्मवृक्ष इति वा असि । अतः मयि श्रद्धाम् श्रद्धागुणं गुर्वादिषु, मेधां प्रज्ञां, च देहि प्रयच्छ । हे वृक्षाधिपः ! हे सर्ववृक्षश्रेष्ठः मुख्यो वा, नमस्ते नमस्कारः अस्तु । अतस्त्वम् अत्र लोके यज्ञे स्तुतिस्थले वा त्वम् मम सनिधौ भव मम पार्श्वे स्थिरो भव इति भावः ।

## शब्दार्थाः

**मेधां** - धारणवतीं बुद्धिम्, **पुष्करं** - कमलम्, **स्त्रक्** - माला, **मनः** - चित्तम्, **शकेयम्** - सक्षमो भूयासम्, **निशामहै** - प्रार्थनया शमयामः, **व्रतम्** - कर्म यज्ञकर्म वा, **मधुमद्** - माधुर्योपेता, **अवृद्धम्** - जरारहितः, **रेजमानाम्** - गतिशीलां चैतन्यरूपां वा, **जुषस्व** - सेवस्व, **सदसस्पतिम्** - सीदति अस्मिन् अव्याकृते कारणे सर्वं जगत् इति सदः, तस्य पतिं पालकम् अन्तर्यामिणम्, **सनिम्** - कर्मफलस्य दातारम्, **सुमनाः** - शोभनमनस्कः, **सुप्रतीकः** - शोभनाननः, **सुशेवः** - सात्विकधनोपेतः, **धारयिष्णुः** - ज्ञानधारणकामः, **पथिकाम्** - मार्गप्रशस्तकरीम्, **अपापा** - पापरहिता, **ब्रह्मवृक्षः** - वेदवृक्षः ।

## स्वाध्यायः

**१. निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) ........................ सप्त ऋषयः प्रयच्छन्तु । (द्रविणम्, मेधाम्, विद्याम्)

(२) वाक् मे ........................ दुहाम् । (मधुमद्, मेधाम्, सत्यम्)

(३) असौ ........................ ब्रह्मणानी स्थः । (चन्द्रः, वाक्, सूर्यः)

(४) ब्रह्मवृक्ष ........................ त्वं श्रद्धां मेधां च देहि मे । (पलाश, अश्वत्थ, खादिर)

(५) मेधां देवीं ........................ रेजमानाम् । (कर्मणा, मनसा, वचसा)

**२. निम्नाङ्कितानां प्रश्नानाम् एकैक वाक्येनोत्तराणि लिखत ।**

(१) ऋग्वेदमतिरिच्य अन्यत्र कुत्र मेधाजननपरकमन्त्राः दृश्यन्ते ?

(२) 'ये त्रिषप्ताः' इति मन्त्रः कुत्र श्रूयते ?

(३) पुष्करस्त्रजौ इति शब्दस्य कोऽर्थः ?

(४) कः ब्रह्मवृक्षरूपेण स्तूयते ?

(५) मेधादेवी कीदृशी वर्तते ?

**३. (अ) निम्नाङ्कितमन्त्राणां भावार्थं लिखत ।**

(१) मेधां ते वरुणो राजा मेधां देवी सरस्वती ।
मेधां ते अश्विनौ देवा वा धत्तां पुष्करस्त्रजा ॥

(२) सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् ।
सनिं मेधामयासिषम् ॥

(३) मेधाव्यहं सुमनाः सुप्रतीकः श्रद्धामनाः सत्यमतिः सुशेवः ।
महायशा धारयिष्णुः प्रवक्ता भूयासमस्मै शरया प्रयोगे ॥

**(ब) निम्नलिखितमन्त्राणां पूर्तिं विधेया ।**

(१) मेधां मह्यमङ्गिरसो ................................. धाता ददातु ते ॥

(२) ब्रह्मवृक्ष पलाश त्वं ................................. संनिधौ भव ॥

(३) यां मेधां देवगणाः ................................. मेधाविनं कुरु ॥

**४. पञ्चवाक्यैः उत्तराणि लिखत ।**

(१) मेधाशक्तिमुत्पादनाय के के उपायाः अवलम्बनीयाः ?

(२) पलाशवृक्षस्य किमस्ति महत्त्वम् ?

(३) मेधावी पुरुषस्य कानि लक्षणानि ?

(४) मेधादेव्याः किमस्ति महत्त्वम् ?

(५) मेधाशक्तिमुत्पादनाय के के देवा उपासनीयाः क्त

**५. शब्दरूपाणां परिचयं यच्छत ।**

(१) उपनिषदि

(२) शाखायाः

(३) अश्विनीकुमारौ

(४) सदसः

(५) मनसा

**६. क्रियापदानां परिचयं लिखत ।**

(१) उपासते

(२) भूयासम्

(३) कुरुताम्

(४) आह

(५) त्यजेत्

**७. (अ) सन्धिविच्छेदं कुरुत ।**

(१) नोक्तम्

(२) विशतादिमाम्

(३) पितरश्चोपासते

(४) नमस्तेऽस्तु

(५) पलाशस्यारुषसौ

**(ब) सन्धिमेलनं कुरुत ।**

(१) अहम् + असौ

(२) तत् + रमताम्

(३) वाक् + मे

(४) सदसः + पतिम्

(५) मेधावी + अहम्

**छात्र-प्रवृत्तिः**

- शास्त्रोक्तमेधाजननोपायाः अवलम्बनीयाः

**विशिष्टज्ञानम्**

मन्त्रम् उच्चारयन्नैव मन्त्रार्थत्वेन संस्मरेत् ।
शेषिणं तन्मना भूत्वा स्याद् एतद् अनुमन्त्रणम् ।
एतदेवामिन्त्रस्य लक्षणं चेक्षणाधिकम् ॥

- मेधाकामस्य ब्रह्मचारीणां कृते मन्त्रमुच्चारणं मन्त्रार्थस्मरणं अनुमन्त्रणादिकं वा लाभदायकं भवति ।

●

# ८ | शुक्लयजुर्वेदे-षष्ठोऽध्यायः १

## प्रस्तावना

भारतीयासंस्कृतिः वैदिकसंस्कृतिः । तस्यां यज्ञयागादिनां बहु महत्वमस्ति । वैदिककाले विविधानां श्रौतयज्ञानाम् उपासनां क्रियतेस्म । चतुर्षु वेदेषु यजुर्वेदे विविधानां श्रौतयज्ञानां निरूपणं कृतमस्ति । तेषु एकतमः सोमयागः । दर्शपूर्णमासादिनाम् अनुष्ठानानन्तरं सोमेन यजते । अत्र द्रव्यं सोमरसः । सोमो नाम लताविशेषः । तं कस्माच्चित्पुरुषात् क्रीत्वा ततो रसं निष्काश्य तेन च होमः क्रियते । अत एवास्य सोमयाग इति व्यवहारः । इयं तु लता नेदानीं भारते देशे समुपलभ्यते, किन्तु पवित्रे देशविशेषे एव । तानि स्थानानि पूर्वाचार्यैः संगृहीतानि ।

इदानीमस्या अनुपलब्भ्यात् तत्स्थाने पूतीकसंज्ञकं लतान्तरं गृहीत्वा तत्रैव सोमेक्रियमाणान् सर्वानपि संस्काराननुष्ठाय तद्रसेनैव यागः क्रियते । अयं यागः यद्यपि दिनैकसाध्यः, तथापि स्वाङ्गैः सहितः पञ्चभिर्दिनैरनुष्टियते । तत्र ऋत्विजः षोडश । ते च गुणचतुष्टयेन विभक्ताः -

(१) अध्वर्युगणः

(२) ब्रह्मगणः

(३) होतृगणः

(४) उद्गातृगणः

एकैकस्मिन् गणे चत्वारश्चत्वार इति मिलित्वा षोडशऋत्विजः सम्पद्यन्ते ।

प्रस्तुत पाठेऽस्मिन् शुक्लयजुर्वेदस्य माध्यन्दिनी शाखायाः षष्ठाध्यायस्य मन्त्राणां वर्णनं कृतमस्ति । सोमयागस्य चतुर्थे दिवसे उपयुज्यमानानां मन्त्राणां वर्णनमत्र वर्तते । तत्र प्रवर्ग्यादि इष्टयः क्रियन्ते । अरण्याद् काष्ठमानीय यूपनिर्माणं, स्थापनमित्यादि क्रियाः क्रियन्ते । तासां समेषां वर्णनम् अत्रकृतमस्ति अत्र ९ तः ९८ मन्त्राणां वर्णनमस्ति ।

---

**दे॒वस्य॑ त्त्वा सवि॒तुः प्प्र॑स॒वे॒ऽश्विनो॑र्ब्बा॒हुब्भ्या॑मपू॒ष्णणो हस्ता॑ब्भ्याम्।**
**आद॑दे॒ नार्य्य॑सी॒दम॒ह रक्क्ष॑साङ्ग्री॒वाऽअपि॑ कृन्तामि । यवो॑सि**
**य॒वया॒स्म्मद्द्वेषो॑ य॒वयारा॑तीर्दि॒वेत्त्वा॒न्तरि॑क्क्षाय त्त्वा पृथि॒व्व्यै त्त्वा॒**
**शुन्ध॑न्ताँल्लो॒काः पि॑तृषद॑नाः पितृ॒षद॑नमसि ॥ १ ॥**

**पदपाठः-** दे॒वस्य॑ । त्वा॒ । स॒वि॒तुः । प्र॒स॒वऽइति॑प्र स॒वे । अ॒श्विनोः॑ । बा॒हुब्भ्या॒मिति॑बा॒हु भ्या॑म् । पू॒ष्णणः । हस्ता॑ब्भ्याम् । यवः॑ । अ॒सि॒ । य॒वय॑ । अ॒स्मत् । द्वेषः॑ । यवय॑ । अरा॑तीः । दि॒वे । त्वा॒ । अ॒न्तरि॑क्क्षाय। पृथि॒व्यै । शुन्ध॑न्ताम् । लोकाः । पि॒तृ॒षद॑नाः । पि॒तृ॒सद॑ना॒ऽ इति॑पितृ॒सद॑नाः । पि॒तृ॒षद॑नम् । पि॒तृ॒सद॑न॒मितिपितृ सद॑नम् । अ॒सि॒ ॥

**सरलार्थः-** औदुम्बरी मन्त्राः उद्म्बरवृक्षसम्बन्धिनीं शाखां सभामण्डपमध्ये निखनेत् ।

हे अग्ने सवितुः प्रेरणया अश्विनीकुमारयोः बाहुभिः एवं पूष्णः हस्तयोः त्वां गृह्णामि । त्वं स्त्रीरूपा असि। तव साहाय्येन राक्षसानां नाशं करिष्यामि । हे शस्य त्वं यव असि । अस्माकं दौर्भाग्यम् एव शत्रूणां नाशं कुरु । हे औदुम्बरीशाखे ! द्युलोकस्य पवित्रतायै तवाग्र भागं प्रोक्षयामि . अन्तरिक्षस्य पवित्रतायै तव मध्यभागं प्रोक्षयामि एवं पृथिव्याः शुद्धतायै तव मूलं प्रोक्षामि । यत्र पितरः वसन्ति तस्यापि शुद्धिं कुरु । हे कुश ! त्वयि पितरः आसीनः भूत्वा आनन्दं करिष्यन्ति ।

**अग्ग्रेणीरसि स्वावेशऽउन्नेतॄणामेतस्य वित्तादधि त्वा स्थास्यति देवस्त्वा सविता मद्ध्वानक्तु सुपिप्पलाब्भ्यस्त्वौषधीब्भ्यः । द्यामग्ग्रेणास्पृक्षऽआन्तरिक्षम्मद्ध्येनाप्प्राः पृथिवीमुपरेणादृꣳहीः ॥२॥**

**पदपाठः-** अग्ग्रेणीः । अग्ग्रेनीरित्यग्ग्रे नीः । असि । स्वावेशऽइतिसु आवेशः । उन्नेतॄणामित्युत् नेतॄणाम् । एतस्य । वित्तात् । अधि । त्वा । स्थास्यति । देवः । त्वा । सविता । मद्ध्वा । अनक्कतु । सुपिप्पलाब्भ्यऽइतिसु पिप्पलाब्भ्यः । त्वा । ओषधीब्भ्यः ॥ द्याम् । अग्ग्रेण . अस्पृक्क्षः । आ । अन्तरिक्क्षम् । मद्ध्येन । अप्प्रा । पृथिवीम् । उपरेण । अदृꣳहीः

**सरलार्थः-** हे यूपशकल ! त्वम् अग्रे भव । तवोपरि द्वितीयं भागं स्थापियिष्यामः । सर्व प्रेरकः सवितादेवः त्वां मधुघृताभ्याम् आसिञ्चेत् । हे चषाल । शुभौषधिभिः त्वां यूपखण्डोपरि स्थापनं करोमि । हे यूप, भवता त्रिभिः भागैः त्रयाणां लोकानां स्पर्शकृतमस्ति ।

**या ते धामान्युश्मसि गमद्ध्यै यत्र गावो भूरिशृङ्गाऽअयासः । अत्राह तदुरुगायस्य व्विष्णोः परमम्पदमव भारि भूरि । ब्रह्मवनि त्त्वा क्क्षत्रवनि रायस्प्पोषवनि पर्य्यूहामि । ब्रह्म दृꣳह क्क्षत्रन्दृꣳहायुर्दृꣳह प्प्रजान्दृꣳह ॥ ३॥**

**पदपाठः-** या । ते । धामानि । उश्मसि । गमद्ध्यै । यत्र । गावः । भूरिशृङ्गाऽइतिभूरि शृङ्गाः । अयासः॥ अत्र । अह । तत् । उरुगायस्येत्युरु गायस्य । व्विष्णोः । परमम् । पदम् । अव । भारि । भूरि

**सरलार्थः-** हे यूप ! त्वया यानि धामानि गन्तुं वयं कामयामहे यत्र भवगतः सूर्यस्य प्रकाशवन्तः रश्मयः विस्तरन्ति। तत्रैव उत्तमगतिप्रदातुः भगवतः विष्णोः परमपदं प्रकाश्यते । हे यूप ! त्वं ब्रह्मक्षत्रियवैश्यैः स्तुति कृतोऽस्ति तेभ्यः क्रमेण विद्याप्रदाता पराक्रमप्रदाता, धनप्रदाता भव । यजमानेभ्यः आयुष्यप्रदाता भव तथा तेषां बालकानां वृद्धिकर्ता भव ।

**व्विष्णोः कर्म्माणि पश्श्यत यतो व्व्रतानि पस्प्पशे । इन्द्रस्य युज्ज्यः सखा ॥ ४ ॥**

**पदपाठः-** व्विष्णोः । कर्म्माणि । पश्यत । यतः । व्व्रतानि । पस्प्पशे ॥ इन्द्रस्य । युज्जयः । सखा

**सरलार्थः-** हे ऋत्विजः विष्णोः यज्ञाधिष्ठातुः कर्माणि सृष्टिसंहारविरचितानि यूपं पश्यत । यद्वा विष्णोः यज्ञस्य कर्माणि व्रतानि आधानपशुसोमादीनि कर्माणि निबद्धद्धानि सन्ति । विष्णुः इन्द्रस्य परमसखा मन्यते ।

**तद्विष्णोः परमम्पदꣳ सदा पश्श्यन्ति सूरयः । दिवीव चक्क्षुराततम्**

**पदपाठः-** तत् । व्विष्णोः । परमम् । पदम् । सदा । पश्यन्ति । सूरयः ॥ दिववेतिदिवि इव । चक्क्षुः। आततमित्या ततम्

**सरलार्थः-** वेदान्तपारगाः विद्वांसः तत्परमं पदं स्वरूपं सदा पश्यन्ति, यथा चक्षुषा अन्तरिक्षे स्थितानां नक्षत्रादिनां वयं दर्शनं कुर्मः ।

**परिवीरसि परि त्त्वा दैवीर्व्विशो व्व्ययन्ताम्परीमँय्यजमानꣳ रायो मनुष्ष्याणाम्। दिवः सूनुरस्येष ते पृथिव्व्याँल्लोकऽआरण्ण्यस्ते पशुः ॥ ६ ॥**

**पदपाठः-** परिवीरितिपरि व्वीः । असि । परि । त्वा । दैवीः । व्विशः । व्व्यन्ताम् । परि । इमम् । यजमानम् । रायः । मनुष्ष्याणाम् ॥ दिवः । सूनुः । असि । एषः । ते । पृथिव्व्याम् । लोकः। आरण्ण्यः । ते । पशुः ॥

**सरलार्थः-** त्रिभिर्गुणैरवयवैरूपेता त्रिव्यामभिता कुशसम्बन्धिनी या रशना रज्जुस्तया नाभिप्रमाणे यूपप्रदेशे आवृति त्रयं यथा भवति तथा यूपमावेष्टयेत् ।

हे यूप ! त्वं रज्वा परिवेष्टितोऽस्ति । देवसंबन्धिन्य: प्रजा: मरुद्गणादय: त्वां परितो वेष्टयन्तु । हे स्वरो ! त्वं द्युलोकस्य पुत्रोऽसि । हे यूप पृथिव्याम् एतद् तवाश्रयस्थानमस्ति । अरण्यापशव: तव भागमस्ति।

**उपावीरस्युपं देवान्दैवीर्व्विशः प्प्रागुंरुशिजो व्वह्नितमान् । देवं त्त्वष्टुर्व्वसुं रम हव्या तें स्वदन्ताम् ॥ ७॥**

**पदपाठः-** उपावीरिस्युंप अवीः । असि । उपं । देवान् । देवीः। विशः । प्र । अगुः । उशिजः । व्वहिन्नतमानितिवदिन्नं तमान् । देवं । त्वष्ट्टः । व्वसुं । रम । हव्या । ते । स्वदन्ताम्

**सरलार्थः-** हे तृणविशेष ! त्वं समीपे स्थित्वा रक्षणकर्ता असि । त्वं पशो: द्वितीय सखा अस्ति । गृहीतेन तृणेन पुरस्तात् प्रत्यञ्च स्थितं पशुं स्पर्शं कृतमस्ति । एता विश: यत्पशव: ते यजमानं स्वर्गं प्रति कर्मणि अङ्गभावमुपगच्छन्ति: । हे त्वष्ट ! त्वं यजमानाय धनं देहि । हे पशव: ! तव हव्या देवां हवींषि आस्वादयन्तु। स्वादूनि भवन्तु ।

**रेवंती रमंद्ध्वम्बृहंस्प्पते धारया व्वसूंनि ।**

**ऋतस्यं त्त्वा देवहवि पाशेंन प्प्रतिंमुञ्चामि धर्षा मानुंषः ॥ ८॥**

**पदपाठः-** रेवंतीः । रमंद्ध्वम् । वृहंस्प्पते । धारयं । व्वसूंनि ॥ ऋतस्यं । त्वा । देवहविरितिंदेव हविः । पाशेंन। प्रतिं । मुञ्चामि । धर्षं । मानुंषः ॥ अग्नीपोमांबम्भ्याम् । जुष्टंम् । नि । युनज्मि ॥ अद्भ्यऽइत्त्यत् भ्यः । त्वा । ओषंधीब्भ्यः ॥

**सरलार्थः-** हे रेवन्त्य: ! क्षीराविधनवन्त: पशव: यूयं यजमानगृहे संक्रीडध्वम् । हे बृहस्पते ! त्वं यजमानगृहस्थ पशून धारय । हे देवानां हविरूप पशो । यज्ञार्थं तव बन्धनं करोमि । अनेन मन्त्रेण कुशकृतया रज्वा नागपाशं कृत्वा शृङ्गयोरन्तराले पशुं बध्नाति । एवं पशुं संबोध्य शमित्रे समर्पयति ।

**देवस्यं त्त्वा सवितुः प्प्रंसवेऽश्श्विनोर्ब्बाहुब्भ्याम्पूष्णणो हस्तांब्भ्याम् । अग्नीषोमांब्भ्याञ्जुष्टन्नियुंनज्मि । अद्भ्यस्त्त्वौषंधीब्भ्योनुं त्त्वा माता मंन्यतामनुं पितानु ब्भ्राता सगब्भ्योनु सखा सयूंत्थ्यः । अग्नीषोमांब्भ्यान्त्वा जुष्टम्प्रोक्क्षांमि ॥९॥**

**पदपाठः-** देवस्यं । त्वा । सवितुः । प्रसव ऽइतिंप्र सवे । अश्विनोंः । बाहुब्भ्यामितिंबाहुभ्यांम् । पूष्णणः । हस्तांब्भ्याम् । अग्नीषोमांब्भ्याम् । जुष्टंम् । नि । युनज्मि । अद्भ्यऽइत्यत् भ्यः । त्वा । ओषंधीब्भ्यः ॥

**सरलार्थः-** हे पशो ! सवितुराज्ञया वर्तमाने अश्विभ्यां बाहवो: एवं पूष्ण: हस्तयो: अग्निसोमयो: प्रीत्यै यूपेन सह बध्नामि । हे पशो ! त्वं अद्भ्य: एवं दर्भादि औषधीभ्य: प्रोक्षणं करोसि । हे पशो देवहवि: अस्मिन् कर्मणि मातापितरौ भ्रातर: तथा मित्राणि सर्वे अनुमोदितार: भवन्तु । अग्निसोमयो: प्रीत्यै तव प्रोक्षणं करोमि।

**अपाम्पेरुरस्यापों देवीः स्वंदन्तु स्वात्तञ्चित्तसद्देंवहविः । सन्तें प्प्राणो व्वातेंन गच्छताꣳ समङ्गांनि यजंत्रैः सँय्यज्ञपंतिराशिषां ॥ १० ॥**

**पदपाठः-** अपाम् । पेरुः । असि । आपंः। देवीः । स्वदन्तु । स्वात्तम् । चित् । सत् । देवहविरितिंदेव हविः॥ सम् । ते । प्राणः । व्वातेंन । गच्छताम् । अङ्गांनि । यजंत्रेः । यज्ञसपंतिरितिंयज्ञ पंतिः । आशिषेत्त्या शिषां ॥

**सरलार्थः-** हे पशो ! त्वं जलानां पानशीलोऽसि । त्वम् आपोदेवी आस्वादयतु ! यतो हि देवानां हविः पशुलक्षणं स्वात्तमास्वादितं सत् शोभनं देवयोग्यं भूया । पशोः प्रोक्षणेन सर्वं मेध्यं करोसि । हे पशो ! तव प्राणो वायुना सह सदा सन्नद्धाः भवन्तु । तथा त्वं यज्ञीयानुशासनस्य पालनकर्मणि समर्थो भव । यज्ञपतिः यजमानआशिषा यज्ञफलेन संगच्छताम् ।

**घृतेनाक्तौपशूँस्त्रायेथाᳪं रेवति यजमाने प्प्रियन्धाऽआविश ।**
**उरोरन्तरिक्षात्सजूर्देवेन व्वातेनास्य हविषस्त्मना यज समस्य तन्वा भव ।**
**व्वर्षो व्वर्षीयसि यज्ञे यज्ञपतिन्धाः स्वाहा देवेभ्यो देवेभ्यः स्वाहा ॥११॥**

**पदपाठः-** घृतेन । अक्तौ । पशून् । त्रायेथाम् । रेवति । यजमाने । प्रियम् । धाः । आ । विश ॥ उरोः । अनन्तरिक्क्षात् । देवेन । व्वातेन । अस्य । हविषः । त्मना । यज । सम् । अस्य । तन्वा । भव ॥ व्वर्षोऽइतिवर्षो । व्वर्षीयसि । यज्ञे । यज्ञपतिमितियज्ञ पतिम् । धाः । स्वाहा । देवेभ्यः । देवेभ्यः । स्वाहा ॥

**सरलार्थः-** हे स्वरुशासौ, युवां घृतेनाक्तौ सन्तौ पशुं पालयेथाम् । हे रेवति वातेन देवेन सह समानप्रीतिर्भूत्वा विस्तीर्णात् अन्तरिक्षात् यजमानं रक्ष । हे रेवति यजमानरूपेण आत्मना यज । सर्वसुखप्रदायकेऽस्मिन् महायज्ञे हविष्यान्नैः हविः प्रददातु । हे तृण ! विस्तीर्णतरे यज्ञे यजमानं धेहि । देवेभ्यः स्वाहा ।

**माहिर्भूर्म्मा पृदाकुर्न्नमस्तऽआतानानर्व्वा प्प्रेहि ।**

**घृतस्य कुल्ल्याऽउपऽऋतस्य पत्थ्याऽअनु ॥१२॥**

**पदपाठः-** मा । अहिः । भूः । मा । पृदाकुः । नमः । ते आतानेत्त्या तान । अनर्व्वा । प्र । इहि ॥ घृतस्य । कुल्ल्याः । उप । ऋतस्य । पत्थ्याः । अनु

**सरलार्थः-** हे रज्जो ! त्वं सर्पाकारा मा भूयाः । अजगराकारामपि मा भूः । प्रक्षालनजलकुम्भगृहीतायै यजमान पत्नीं प्रति प्रस्थाता मन्त्रं वाचयति हे विस्तीर्ण यज्ञे ! तुभ्यं नमस्करोमि । शत्रूभिः रहितोभूत्वा त्वं कार्यस्य पूर्णतां यावत् स्थिरो भव । यज्ञे प्राप्तघृतस्य कुल्याः अनुलक्ष्य उपगच्छ ।

**देवीरापः शुद्धा व्वोढ्वᳬ सुपरिविष्टा व्वयम्परिवेष्टारो भूयासम्म ॥१३॥**

**पदपाठः-** देवीः । आपः । शुद्धाः । व्वोढ्वम् । सुपरिविष्टाऽइतिसु परिविष्टाः । देवेषु । सुपरिविष्टाऽइतिसु परिविष्टाः । व्वुयम् । परियेष्टारऽइतिपरि व्वेष्टारः । भूयास्म ॥

**सरलार्थः-** हे आपः एनं पशुं शुद्धिकृत्य देवान् प्रतिनयतु । वयमपि देवेषु स्थित्वा तैः एव देवैः तर्पितः सन्तः तेषामेव देवानां परिवेषणकर्तारः भूयास्म ।

**व्वाचन्ते शुन्धामि प्प्राणन्ते शुन्धामि चक्क्षुस्ते शुन्धामि श्श्रोत्रन्ते शुन्धामि**
**नाभिन्ते शुन्धामि मेढ्ढ्रन्ते शुन्धामि पायुन्ते शुन्धामि चरित्राँस्ते शुन्धामि ॥१४॥**

**पदपाठः-** व्वाचम् । ते । शुन्धामि । प्राणम् । चक्क्षुः । श्रोत्रम् । नाभिम् । मेड्ढ्रम् । पायुम् । चरित्रान्॥

**सरलार्थः-** यजमानपत्नी पशुसमीपम् उपविश्य मृतपशोः प्राणमुखादीन्यष्टौ प्राणान प्रतिमन्त्रम् अद्भिः शोधयति ।

हे पशो अहं तव वाचं, प्राणेन्द्रियं, चक्षुः, श्रोत्रं, नाभिं, लिङ्गं, गुदम्, पादाः एवं त्वदीयानि सर्वेन्द्रियाणि शुन्धामि ।

**मनस्तऽआप्प्यायताँव्वाक्तऽआप्प्यायताम्प्राणस्तऽआप्प्यायताञ्चक्क्षुस्तऽआप्प्यायताᳪं**
**श्रोत्रन्तऽआप्प्यायताम्। यत्ते क्क्रूरँय्यदास्थितन्तत्तऽआप्प्यायतान्निष्ट्यायतान्तत्ते**
**शुद्ध्यतु शमहोब्भ्यः । ओषधे त्रायस्व स्वधिते मैनᳬ हिᳬसीः ॥१६॥**

**पदपाठः-** मनं । ते । आ । प्यायताम् । व्वाक् । प्राण । चक्क्षुं । श्रोत्रंम् ॥ यत् । ते क्रुरम् । यत् । आस्थितमित्या स्थितम् । तत् । ते । आ । प्यायताम्। नि । स्त्यायताम् । तत् । ते । शुद्ध्यतु । शम् । अहोंब्भ्यऽइत्त्यहंःभ्यः ॥

**सरलार्थः-** हे पशो ! तव मनः प्रफुल्लतां यान्तु । वाक्त इति मुखं प्राणस्त इति नासिके, चक्षुस्त इति चक्षुषी, श्रोत्रं त इति कर्णौ एतानि मुखादीनि तव शाम्यन्तु । हे पशो यत्ते क्रुरमस्माभिः कृतं यच्च छेदादिकं कर्तुम् उपस्थितं तत्सर्वं ते शाम्यन्तु । तत् सर्वं तव शुद्धं भवतु । हे पशो तव कल्याणमस्तु । हे ओषधे एनं पशुं रक्ष । मा हिंसीः ।

**रक्क्षसाम्भागोसि निरंस्तꣳ रक्क्षंऽइदमहꣳ रक्क्षोमि तिष्ट्ठामीदमहꣳ रक्क्षोवंबाधंऽइदमहꣳ रक्क्षोंधमन्तमों नयामि। घृतेनं द्यावापृथिवी प्प्रोर्ण्णुवाथाँव्वायो व्वे स्तोकानांमग्ग्निराज्ज्यंस्य व्वेतु स्वाहा स्वाहांकृतेऽऊर्द्ध्वनंभसम्मारुतङ्गंच्छतम् ॥१६॥**

**पदपाठः-** निरंस्तमितिनि अंस्तम् । रक्क्षंः । इदम् । अहम् । रक्क्षंः । अभि । तिष्ठामि । अवं । बाधे । अधमम् । तमंः । नयामि ॥ घृतेनं । द्यावापृथिवीऽइतिंद्यावापृथिवी । प्र । ऊर्ण्णुवाथाम् । व्वायोऽइतिवायों। व्वेः । स्तोकानांम् । अग्ग्निः । आज्ज्यंस्य । व्वेतु । स्वाहां । स्वाहांकृतेऽइतिस्वाहां कृते । ऊर्द्ध्वनंभसमित्त्यूर्द्ध्व नंभसम् । मारुतम् । गच्छतम् ॥

**सरलार्थः-** हे लोहिताक्त तृण त्वं रक्षसां भागोऽसि । लोहिताक्तं तृणम् दुःस्वभावात् गर्ते क्षिपामि । यज्ञस्थानाद् राक्षसान् दूरी करोमि तान् पीडयामि । हे द्यावापृथिवी, युवां घृतेनोदकेन आत्मानम् आच्छादयेथाम् । वामहस्तधृतं तृणाग्रम् आवहनीये क्षिपेत् । हे वपाश्रयण्यौ युवां स्वाहाकारेणाहुतिभावमुपगते सत्यौ वायुं प्राप्नुताम् ।

**इदमांपः प्प्रवंहतावद्यञ्च मलंञ्च यत् । यच्चांमभिदुद्रोहानृतँय्यच्चं शेपेऽअंभीरुणंम् । आपों मा तस्म्मादेनंसः पवंमानश्च मुञ्चतु ॥१७॥**

**पदपाठः-** इदम् । आपः । प्र । व्वहत । अवद्द्यम् । च । मलंम् । च । यत् ॥ यत् । च । अभिदुद्रोहेत्त्यंभि दुद्रोहं । अनृंतम् । यत् । च । शेपे । अभीरुणंम् ॥ आपंः । मा । तस्म्मात् । एनंसः । पवंमानः। च । मुञ्चतु ॥

**सरलार्थः-** सर्वे ऋत्विजः चात्वालसमीपे अद्भिः आत्मानम् अभ्युक्षयन्ति । हे आपः इदं पशुसंज्ञापननिमितं पापं प्रवहत। अवदनीयं च यत् अभिशापादि मलं च तत् अपनयत । आपः मां तस्मात् पापात् मुञ्चतु । सोमः वायुर्वा मां मुञ्चतु ।

**सन्ते मनो मनंसा सम्प्राणः प्प्राणेनं गच्छताम् । रेडंस्यग्ग्निष्ट्वावां श्श्रीणात्त्वापंस्त्वा समंरिणन्वातंस्यत्त्वा द्ध्राज्ज्यै पूष्णो रꣳहंयांऽऊष्म्मणों व्व्यथिषत्त्प्रयुंतन्द्वेषंः ॥१८॥**

**पदपाठः-** सम् । ते । मनंः । मनंसा । सम् । प्राणः । प्राणेनं । गच्छताम् ॥ रेट् । असि । अग्ग्निः । त्वा । श्रीणातु । आपंः । त्वा । सम् । अरिणन् । व्वातंस्य । त्वा । ध्राज्ज्यै । पूष्णः । रꣳह्यै। ऊष्मणं ः । व्व्यथिषत् । प्रयुंतमितिप्र युंतम् । द्वेषः ॥

**सरलार्थः-** हे पशुहृदय, तव मन एवं प्राणः देवानां मनसा सङ्गाच्छताम् । हे वसे ! त्वम् अल्पम् असि । अग्निः त्वां श्रीणातु । त्वं जलतत्वं शुद्धं करोतु । वायोः गति एवं सौर ऊर्जा सिद्धा भवतु । तव सर्व विकाराः नष्टाः भवन्तु । वसाहोमेन दौर्भाग्यात् मुक्तिरस्तु ।

## शब्दार्थाः

**दिवः** – स्वर्गः, **द्वेषः** – दौर्भाग्यम्, **अरातीः** – अदानानि, **शकल** – खण्डमात्रम्, **चषाल** – यूपकाष्ठः (यज्ञे पशुबन्धनाय काष्ठ वा लोहमयपदार्थः), **यूपः** – यागस्तम्भः, **उश्मसि** – कामयामहे, **युज्यः** – मित्रम्, सखा, **सूनुः** – पुत्रः, **उशिजः** – मेधाविनः, **पाशः** – कुशमयरज्जुः, **सगर्भ्यः** – भ्राता, **चरित्राः** – पादाः, **एनसः** – पापः, **त्रायेथाम्** – पालयेथाम्, **उरः** – विस्तीर्णः, **तन्वा** – शरीरेण, **सजूः** – समानप्रीतिः, **हे वर्षो** – हे तृण, **धाः** – धेहि, **माहिर्भूः** – रज्जुः, **पृदाकुः** – अजगरः, **ऋतस्य** – यज्ञस्य, **वाठ्वम्** – वहतयज्ञम्, **वेष्टारः** – परिवेषणकर्तारः, **मेढ्रः** – शिश्नः, **पायुः** – गुदः, **प्रोर्णुवाथाम्** – आच्छादयेथाम्, **ध्राज्यै** – गत्यै ।

## स्वाध्यायः

१. **निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) विष्णोः ........................ पश्यत यतो व्रतानि पश्पशे । (कार्याणि, कर्माणि, धर्माणि)

(२) अस्मिन् पाठे ........................ यागस्य वर्णनमस्ति । (सोम, राजसूय, अश्वमेध)

(३) यज्ञे जलकुम्भ ........................ धृतः । (यजमानपत्नीना, ऋत्विजेन, आचार्येण)

(४) विद्वांसः ........................ पारगाः सन्ति । (मीमांसा, वेदान्त, दर्शन)

(५) सन्ते प्राणो ........................ गच्छताम् । (दुग्धेन, वातेन, जलेन)

२. **निम्नाङ्कितानां प्रश्नानाम् एकैक वाक्येनोत्तराणि लिखत ।**

(१) शस्य केषां नाशं करोति?

(२) 'चषाल' शब्दस्य कोऽर्थः?

(३) यूपः क्षत्रियेभ्यः किं ददाति?

(४) इन्द्रस्य परमसखा कोऽस्ति?

(५) पशोः प्रोक्षणं कैः द्रव्यैः भवति?

३. **(अ) निम्नाङ्कितमन्त्राणां भावार्थं लिखत ।**

(१) व्विष्णोः꣡ कर्म्माणि पश्च्यत यतो व्व्रतानि पस्पशे ।
इन्द्रस्य युज्ज्यः सखा ॥

(२) तद्विष्णोः꣡ परमम्पद ꣳ सदा पश्च्यन्ति सूरयः꣡ ।
दिवीव चक्षुराततम् ॥

(३) उपावीरस्युप देवान्दैवीर्व्विशः꣡ प्रागुरुशिजो वहिनतमान् ।
देव त्त्वष्टर्व्वसु रम हव्या ते स्वदन्ताम् ॥

**(ब) निम्नलिखितमन्त्राणां पूर्ति विधेया ।**

(१) या ते धामान्युश्मसि ..................................

(२) परिवीरसि परि त्त्वा ..................................

(३) रेवती रमद्ध्वम्बृहस्वते ..................................

४. **पञ्चवाक्यैः उत्तराणि लिखत ।**

(१) यूपस्थापनं विस्तारेण लिखत ।

(२) पशूनां शुद्धिकरणं कयारीत्या भवति? विवेच्यतम् ।

(३) यूपः अस्मान् किं किं ददाति?

(४) घृतेनाक्तौ इति मन्त्रे कृता रक्षणप्रार्थना विवेच्यताम् ।

(५) अस्मिन् पाठे कृत सोमयागस्य वर्णनं संक्षेपेण लिखत ।

**५. शब्दरूपाणां परिचयं यच्छत ।**

(१) पूष्णः

(२) त्वष्टः

(३) वसूनि

(४) घृतेनाक्तौ

(५) इदम्

**६. क्रियापदानां परिचयं लिखत ।**

(१) कृन्तामि

(२) उश्मसि

(३) स्वदन्ताम्

(४) श्रीणातु

(५) भव

**७. (अ) सन्धिविच्छेदं कुरुत ।**

(१) धामान्युश्मसि

(२) यज्ञपतिराशिषा

(३) अत्राह

(४) तमोनयामि

(५) नाभिन्ते

**(ब) सन्धिमेलनं कुरुत ।**

(१) यवः + असि

(२) सूनुः + असि + एषते

(३) पेरुः + असि + आपः

(४) सजूः : + देवेन

(५) श्रीणातु + आपः + त्वा

**छात्र-प्रवृत्तिः**

- छात्राः सोमयागनियमाः ।
  कण्ठस्थीकरणं कुर्युः ।
  छात्राः सोमयागनियमानां सूचिनिर्माणं कुर्युः ।

**विशिष्टज्ञानम्**

- सूर्य्यऽआत्माजगतस्तस्थुषश्च ।
  सूर्यः जगतः आत्मरूप स्थितो वर्तते ।

●

| ९ | शुक्लयजुर्वेदे-षष्ठोऽध्यायः २ |
|---|---|

**प्रस्तावना**

यज्ञस्वरूपं कात्यायनश्रोतसूत्रे महर्षिकात्यायनेन प्रतिपादितं यथा - ''अथ यज्ञं व्याख्यास्यामः'' (का.श्रो.सू. १/२/२)

तत्र तैः द्रव्याणामुल्लेखो कृतमस्ति । दधि-सोम-व्रीहि-यवादि । देवताः - अग्नीन्द्रादि इति याग स्वरूपम् । यज्ञीयद्रव्यविषये स्मार्तोल्लासे प्रतिपादितमस्ति यथा-

**तैलं दधि पयः सोमो यवागूरोदनं घृतम् ।**

**तण्डुलाः फलमापश्च दशद्रव्याण्यकामतः ।**

पूर्वप्रकरणात् प्रारब्धते सोमयागे प्रस्तुतपाठोऽयं द्वितीयोभागः । पुरोडाशनिर्माणं, पशुबन्धनं,पशुअङ्गानां मार्जनं पवित्रीकरणम् इत्यादिक्रियाः समागच्छन्ति । अस्मिन् पाठे शुक्लयजुर्वेदमाध्यन्दिनीयशाखायाः षष्ठाध्यायस्य १९ तः ३७ मन्त्राः उद्धृताः सन्ति ।

---

**घृतङ्घृतपावानः पिबत व्वसाँव्वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा ।**
**दिशः प्प्रदिशऽआदिशो व्विदिशऽउद्दिशो दिग्गभ्यः स्वाहा ॥१९॥**

**पदपाठः-** घृतम् । घृतपावानऽइतिघृत पावानः । पिबत । व्वसाम् । व्वसापावानऽइतिवसा पावानः । पिबत । अन्तरिक्क्षस्य । हविः । असि । स्वाहा ॥ दिशः । प्रदिशऽइतिप्प्र दिशः । आदिशऽइत्या दिशः । व्विदिशऽइतिवि दिशः । उद्दिशऽइत्युत् दिशः । दिग्गभ्यऽइतिदिक् भ्यः । स्वाहा ॥

**सरलार्थः-** हे घृतपावानः यूयं घृतं पिब । हे वसायाः पातारौ देवाः वसारूपमिदं हविः पिबत । हे वसे, त्वमन्तरिक्षस्य हविरसि सुहुतमस्तु । दिशः प्रादिग्भ्यः स्वाहा, प्रदिशो-दक्षिणदिग्भ्यः स्वाहा, आदिशः पश्चिमदिग्भ्यः स्वाहा, विदिश उत्तरदिग्भ्यः स्वाहा, उद्दिश उर्ध्वदिग्भ्यः स्वाहा दिग्भ्यः सर्वाभ्यो दिग्भ्यः स्वाहा ।

**ऐन्द्रः प्प्राणोऽअङ्गेऽअङ्गे निदीद्ध्यदैन्द्रऽउदानोऽअङ्गेऽअङ्गे निधीतः । देवत्त्वष्टर्ब्भूरि ते सꣳ समेतु सलक्ष्मा यद्विषुरूपम्भवाति । देवत्रा यन्तमवसे सखायोनु त्त्वा माता पितरो मदन्तु ॥२०॥**

**पदपाठः-** ऐन्द्रः । प्राणः । अङ्गेऽअङ्गऽइत्यङ्गे अङ्गे । नि । दीद्ध्यत् । ऐन्द्रः । उदानऽइत्युत् आनः । अङ्गेऽअङ्गऽइत्यङ्गे अङ्गे । निधीतऽइतिनि धीतः ॥ देव । त्वष्टः । भूरि । ते सꣳसमितिसम् सम्। एतु । सलक्क्ष्मेतिस लेक्क्षम । यत् । विषुरूपमितिबिषु कपम् । भवाति । देवत्वेतिदेव त्वा । यन्तम्। अवसे । सखायः । अनु । त्वा । माता । पितरः । मदन्तु ॥

**सरलार्थः-** इन्द्रसम्बन्धी उदानवायुः पशोः सर्वाङ्गेषु निधीतः । एवं पश्वङ्गेषु प्राणं दत्वा त्वष्टारमाह - हे त्वष्टा ! यत् पशोरङ्गाजातं समानलक्षणं छेदनेन विषुरूपं सर्वतो नानारूपं भवति । हे पशौ प्राणैः अङ्गैः च अनेन मन्त्रेण दृढीकृतं देवान् प्रति गच्छन्तं त्वां मित्रभूता इतरे पशवो मातापितरश्च अनुमदन्तु ।

**समुद्रङ्गच्छ स्वाहान्तरिक्षङ्गच्छ स्वाहा देवꣳ सवितारङ्गच्छ स्वाहा मित्रावरुणौ गच्छ स्वाहाहोरात्रे गच्छ स्वाहा च्छन्दाꣳसि गच्छ स्वाहा द्यावापृथिवी गच्छ स्वाहा य्यज्ञङ्गच्छ स्वाहा सोमङ्गच्छस्वाहा दिव्व्यन्नभो गच्छ स्वाहाग्ग्निँव्वैश्श्वानरङ्गच्छ स्वाहा मनो मे हार्दि य्यच्छ दिवन्ते धूमो गच्छतु स्वुर्ज्ज्योतिः पृथिवीम्भस्मनापृण स्वाहा ॥२१॥**

**पदपाठः-** समुद्रम् । गच्छ । स्वाहा । अन्तरिक्क्षम् । देवम् । सवितारम् । मित्रावरुणौ । अहोरात्रेऽइत्त्यहोराते। छन्दांछंसि । द्यावापृथिवीऽइतिद्द्यावापृथिवी । यज्ञम् । सोमम् । दिव्व्यम् । नभः । अग्ग्निम् । व्वैश्श्वानरम् । मनः । मे । हार्दि । यच्छ । दिवम् । ते । धूमः । गच्छतु । स्वः । ज्योतिः। पृथिवीम् । भस्म्मना । आ । पृण । स्वाहा ॥

**सरलार्थः-** हे हविगुडायवरूप त्वं समुद्रादिनामकान्देवान्प्रति गच्छ । स्थूल सूक्ष्मम् एवं सिन्धुपर्यन्तं पृथ्वी, अन्तरिक्षम् एवं द्युलोकपर्यन्तं सर्वत्र निवसतु । हे हविः त्वं सवितृ, वरुणः, सोम, वैश्वानरः, अहोरात्रम् एवं छन्दोयज्ञादि समस्त देवशक्तिकृते तृप्ति प्रदानं करोतु । वायुभूत-उर्जया द्युलोक एवं भस्महेतोः पृथिवीं परिपूर्णां करोतु। अस्मान् सत्कर्माणि प्रददातु ।

**मापो मौषधीर्हिंसीर्द्धाम्म्नो राजँस्ततो व्वरुण नो मुञ्च । यदाहुरग्घ्याऽइति व्वरुणेति शपामहे ततो व्वरुण नो मुञ्च । सुमित्रिया नऽआपऽओषधयः सन्तुदुर्म्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यञ्च व्वयन्द्विष्म्मः ॥२२॥**

**पदपाठः-** मा । अपः । मा । ओषधीः । हिंसीः । धाम्म्नोधाम्म्नऽइतिधाम्म्नःधाम्म्नः । राजन् । ततः । व्वरुण । नः । मुञ्च ॥ यत् । आहुः । अग्घ्याः । इति । वरुण । इति । शपामहे ॥ सुमित्रियाऽइतिसु मित्रियाः । नः । आपः । ओषधय । सन्तु । दुर्म्मित्रियाऽइतिदुः मित्रियाः । तस्मै । सन्तु ॥

**सरलार्थः-** हे हृदयशूल त्वं जलानि औषधीः च मा हिंसी । जलं रक्षतु । हे वरुण भवतः प्रवाह अस्माकं मित्राणि प्रददातु । अहिंसायुक्ताः, गोहत्यादिरहिताः भवेम औषध्यपि सुमित्राणि भवन्तु । यः अस्मान् प्रति द्वेषं करोति वयं यं प्रति द्वेषं कुर्मः हे वरुण आप एवं औषध्यः तेषां कृते दुःखदायिन्यः भवेयुः ।

**हविष्म्मतीरिमाऽआपो हविष्म्माँ॥ऽआविवासति ।**

**हविष्म्मान्देवोऽअद्धवरो हविष्म्माँ॥ऽअस्तु सूर्य्यः ॥२३॥**

**पदपाठः-** हविष्म्मतीः । इमाः । आपः । हविष्म्मान् । आ । व्विवासति ॥ हविष्म्मान् । देवः । अद्धरः। हविष्म्मान् । अस्तु । सूर्य्यः ॥

**सरलार्थः-** यदा रविः अस्तं याति तत् पूर्वं यजमानेन नद्या एकदेशात् वसतीवरी संज्ञानाम् अपां ग्रहणं कार्यम् । सूर्य अस्तं गते कूपाद् जलग्रहणं कार्यम् । हविषा सुयक्तो यजमानः अपः वसतीवरीः परिचरति । सूर्योऽपि यजमानस्य फलदानाय तृप्त्यर्थं च हविः सम्पन्नोऽस्तु ।

**अग्ग्रेर्व्वोपन्नगृहस्य सदसि सादयामीन्द्राग्ग्न्योर्ब्भागधेयी स्त्थ मित्त्रावरुणयोर्ब्भागधेयी स्त्थ व्विश्श्वेषान्देवानाम्भागधेयी स्त्थ । अमूर्य्याऽउप सूर्य्ये याभिर्व्वा सूर्य्यः सह॥ ता नो हिन्वन्त्वद्धवरम् ॥२४॥**

**पदपाठः-** अग्ग्रेः । व्वः । अपन्नगृहस्येत्त्यपन्न गृहस्य । सदसि । सादयामि । इन्द्राग्ग्न्योः । भागधेयीरितिभाग धेयीः । स्त्थ । मित्त्रावरुणयोः । व्विश्श्वेषाम् । देवानाम् । अमूः । याः । उप । सूर्य्ये । याभिः। व्वा । सूर्य्यः । सह ॥ ताः । नः । हिन्वन्तु । अद्धरम् ॥

**सरलार्थः-** हे वसतीवर्यः अहं त्वां अनष्टे गृहे दक्षिणाग्नि मण्डपे स्थापयामि । ततः त्वां शालादक्षिणद्वारेण नीत्वा उत्तरवेद्याः दक्षिण श्रोणौ निदधाति । इन्द्राग्नि देवतयोः भागरूपा भवथ । उत्तरवेद्याः उत्तरश्रोणौ वसतीवरीं निदधाति । हे वसतीवरी संज्ञका आपः यूपं मित्रावरुणयोः देवतयोः भागरूपा भवथ । उत्तर वेदिश्रोणेः सकाशाद् वसतीवीरीम् आदाय आग्नीध्रीयस्य पश्चाद् निदधाति । याभिश्चाद्भिः सह सूर्यो याति । ता आपः अस्माकं यज्ञं तर्पयन्तु ।

**हृदे त्त्वा मनसे त्त्वा दिवे त्त्वा सूर्य्याय त्त्वा ।**

**ऊर्द्ध्वमिममंद्ध्वरन्दिवि देवेषु होत्रा यच्छ ॥२५॥**

**पदपाठः-** हृदे । त्वा । मनसे। दिवे । सूर्य्याय ॥ ऊर्द्धम् । इमम् । अद्धरम्। दिवि । देवेषु होत्राः। यच्छ॥

**सरलार्थः-** हे सोम, निश्चयात्मिकायै बुद्धयै मनः अन्तकरणं सूर्य एवं द्युलोकतृप्तिहेतोः त्वां प्रार्थयामि मदीयं यज्ञम् उर्ध्वमुत्कृष्टं कृत्वा दिविद्युलोके वर्तमानेषु देवेषु वषट्कारवादिनः सप्तहोतृकान् यच्छ ।

**सोमं राजन्विश्श्वास्त्वम्प्रजाऽउपावरोह व्विश्श्वास्त्वाम्प्रजाऽउपावरोहन्तु ।**
**शृणोत्त्वग्निः समिधा हवम्मे शृण्णवन्त्वापो धिषणाश्च देवीः । श्रोता ग्ग्रावाणो**
**व्विदुषो न यज्ञं शृणोतु देवः सविता हवम्मे स्वाहा ॥२६॥**

**पदपाठः-** सोम। राजन् । व्विश्श्वाः । त्वम् । प्रजाऽइतिप्प्र जाः । उपावरोइेत्त्युप अवरोह । व्विश्श्वाः । त्वाम्। प्रजाऽइतिप्प्र जाः । उपावरोहन्तित्त्युप अवरोहन्तु ॥ शृणोतु । अग्ग्रिः । समिधेतिसम् इधा । हवम् । मे । शृण्वन्तु । आपः । धिषणाः । च । देवीः ॥ श्रोत । ग्रावाणः । व्विदुषः । नः यज्ञम्। शृणोतु । देवः । सविता । हवम् । मे । स्वाहा ॥

**सरलार्थः-** हे सोम विश्वस्य सर्वाः प्रजाः त्वां प्रत्युत्थानाभिः प्राप्नुवन्तु । अग्निः समित्पूर्विकया आहुत्या मदीयम् आवाहनं श्रुणोतु । आपो समाहवानं शृण्वन्तु । धिषणादेवीः वाचोदेव्यश्च मे आह्वानं शृण्वन्तु । हे ग्रावाणः अभिषवार्थमिहोपस्थिता यूयं मम हवं शृणुत । विद्वांसोयज्ञमिव यथा विद्वांसः प्रत्यक्षतो यज्ञं शृण्वन्ति तथा यूयं हवं शृणुत । तथा सवितादेवः मे हवं शृणोतु ।

**देवीरापोऽअपान्नपाद्यो वंऽऊर्म्मिर्हविष्य्यऽइन्द्रियावान्मन्दिन्तमः ।**

**तन्देवेब्भ्यो देवत्रा दत्त शुक्क्रपेब्भ्यो येषाम्भाग स्त्थ स्वाहा ॥२७॥**

**पदपाठः-** देवीः । आपः । अपाम् । नपात् । यः । व्वः । ऊर्म्मिः । हविष्य्यः । इन्द्रियावान् । इन्द्रियवानितीन्द्रिय व्वान् । मदिन्तमऽइतिमदिन् तमः ॥ तम् । देवेब्भ्यः । देवत्रेतिदेव त्रा । दत्त । शुक्क्रपेब्भ्यऽइतिशुक्क्र पेब्भ्यः । येषाम् । भागः । स्थ । स्वाहा ॥

**सरलार्थः-** हे आपोदेवीः तव अपत्यरूपोयोऽयममूभ्यः कल्लोलसदृशो भोगमोक्षप्राप्तिसामर्थ्यरूपो देवेभ्यो देवभाववद्धयः साधकेभ्यः तं प्रयच्छत । सर्वेषां देवानां पर्जन्यस्य एवं वीर्यस्य रक्षाहेतवे समर्पितमस्तु । इदम् आज्यं युस्मभ्यं सुहुतमस्तु ।

**कार्षिरसि समुद्रस्य त्त्वा क्षित्त्याऽउन्नयामि ।**

**समापोऽअद्भिरग्ग्मत समोषधीभिरोषधीः ॥२८॥**

**पदपाठः-** कार्षिः । असि । समुद्रस्य । त्वा । अक्क्षित्त्यै । उत् । नयामि ॥ सम् । आपः । अद्भिरित्त्यत् भिः । अग्ग्मत । सम् । ओषधीभिः । ओषधीः ॥

**सरलार्थः-** (अप्सु हुतमाज्यं मैत्रावरुण चमसेन दूरी करोति ।)

हे आज्यपदार्थ, त्वम् आकृष्टम् असि । हे वसतीवरी जलं ! बृहत्त् वृद्धिहेतोः समुद्रात् बहिः ग्रहणं करोमि। मैत्रवरुणचमसस्था अद्भिः एवं वसतीवरीभिः सह संगच्छन्ताम् । तथा ओषधीः ओषधीभिः सह व्रीहियवादिभिः सह संगच्छन्ताम् ।

**यमग्ग्ने पृत्त्सु मर्त्त्यमवा व्वाजेषु यञ्जुनाः । स यन्ता शश्श्वतीरिषः स्वाहा ॥२९॥**

**पदपाठः-** यम् । अग्ग्ने । पृत्स्वितिपृत् सु । मर्त्त्यम् । अवाः । व्वाजेषु । यम् । जुनाः ॥ सः । यन्ता । शश्श्वतीः । इषः । स्वाहा ॥

**सरलार्थः-** (अग्निष्टोमसंस्थे क्रतौ प्रचरणीपात्रलिप्तमाज्य शेषं जुहुयात्)

हे अग्ने, संग्रामेषु यं मनुष्यं त्वं रक्षसि एवं अन्नप्राप्तिहेतोः यं मनुष्यं त्वं प्रेरयति । स एव मनुष्यः नित्यान्नं प्राप्स्यति ।

**दे॒वस्य॑ त्वा सवि॒तु प्र॑स॒वे॒ऽश्विनो॑र्ब्बा॒हुब्भ्या॑म्पू॒ष्णणो हस्ता॑ब्भ्याम् । आद॑दे॒ रावा॑सि गभी॒रमि॒मम॑द्ध्वरङ्कृ॒धीन्द्रा॑य सु॒षू॒त॑मम् । उ॒त्त॒मेन॑ प॒विनो॒र्ज्ज॑स्वन्त॒म्मधु॑मन्त॒म्पय॑स्वन्तन्नि॒ग्ग्रा॒ब्भ्या॒ स्त्थ दे॒व॒श्श्रु॒त॑स्त॒र्प्पय॑त मा॒ मनो॑ मे॒ ॥३०॥**

**पदपाठः-** रावा॑ । अ॒सि॒ । ग॒भी॒रम् । इ॒मम् । अ॒द्ध्व॒रम् । कृ॒धि॒ । इन्द्रा॑य । सु॒षू॒त॑मम् । सु॒सू॒त॑ममि॒ति॑सु॒ सू॒त॑मम्। उ॒त्त॒मेने॒त्त्यु॑त् त॒मेन॑ । प॒विना॑ । ऊर्ज्ज॑स्वन्तम् । मधु॑मन्त॒मिति॒मधु॒ मन्तम् । पय॑स्वन्तम् । नि॒ग्ग्रा॒ब्भ्या॒ऽइति॑नि ग्रा॒ब्भ्या॒ः । स्थ॒ । दे॒व॒श्रु॒त॒ऽइति॑देव श्रु॒त॑ः । त॒र्प्पय॑त । मा॒ ॥

**सरलार्थः-** हे अभिषवसाधनपाषाण ! त्वम् आहुतिनां दक्षिणानां च दाता भवसि । त्वं मदीयं यज्ञं महान्तं कुरु । अस्मदीये यज्ञे पाषाणेन इन्द्रकृते वृद्धिप्रदः मधुरः एवं पयस्वादुयुक्तसोमरसः सम्यक् रीत्या प्रदत्तोऽस्ति । हे वसतीवरीआपः अस्माभिः नितरां ग्रहीतव्यः यूयं देवैः श्रूयन्ते ताः देवेषु प्रख्याताः सोमेन सह मिलित्वा मां तर्पयत ।

**मनो॑ मे तर्प्पयत॒ व्वाचं॑म्मे तर्प्पयत प्प्रा॒णम्मे॑ तर्प्पयत॒ चक्क्षु॑र्म्मे तर्प्पयत॒ श्श्रोत्रं॑म्मे तर्प्पयता॒त्मानं॑म्मे तर्प्पयत प्प्र॒जाम्मे॑ तर्प्पयत प॒शून्मे॑ तर्प्पयत ग॒णान्मे॑ तर्प्पयत ग॒णा मे॒ मा व्वितृ॑षन् ॥३१॥**

**पदपाठः-** मन॑ः । मे॒ । त॒र्प्प॒य॒त । व्वाच॑म् । प्रा॒णम्। चक्क्षु॑ः । श्रोत्र॑म् । आ॒त्त्मान॑म् । प्र॒जामिति॑प्प्र॒ जाम् । प॒शून् । ग॒णान् । ग॒णाः । मे॒ । मा । व्वि । तृ॒प॒न् ॥

**सरलार्थः-** हे आपः त्वं मे मनः, वाचं, प्राणं, चक्षुः, श्रोत्रं आत्मानं, शरीरं, प्रजां, गवादीपशून्, मनुष्यसङ्घाश्च तर्पयत। मदीया मनुष्यासङ्घा मयाद्रव्यभ्भदानेन पूरिता अपि सन्तो विगततृष्णा मा भवन्तु ।

**इन्द्रा॑य त्वा॒ व्वसु॑मते रु॒द्रव॑त॒ऽइन्द्रा॑य त्वादि॒त्त्यव॑त॒ऽइन्द्रा॑य त्वाभिमाति॒ग्घ्ने । श्ये॒नाय॑ त्वा सोम॒भृ॒ते॒ग्ग्रये॑ त्वा रायस्प्पोष॒दे ॥३२॥**

**पदपाठः-** इन्द्रा॑य । त्वा॒ । व्वसु॑मत॒ऽइति॒वसु॒ मते । रु॒द्रव॑त॒ऽइति॑रुद्र व्व॑ते । आ॒दि॒त्त्यव॑त॒ऽइत्त्या॑दि॒त्त्य व्व॑ते । अ॒भि॒मा॒ति॒घ्न॒ऽइत्त्य॑भिमाति घ्ने ॥

**सरलार्थः-** (उपांशुसवनं पूर्वोक्तमश्मानमधिषवणचर्मणि निधाय तदुपरि पञ्चमन्त्रैः पञ्चवारभभिषोतण्यसोममुष्टिं प्रक्षिपति।)

हे सोम ! वसुसंज्ञकप्रातः सवनदेवतायुक्ताय, रुद्रनामकमाध्यन्दिनसवनदेवतायुक्ताय, आदित्यवते तृतीयसवन देवतायुक्ताय इन्द्राय अश्मना उपरि मुष्ट्या प्रक्षिपति । सोमाहरणकर्त्रे श्येनपक्षिरूपायै गायत्र्यै हे सोम ! त्वां प्रक्षिपामि । धनपुष्टिदात्रे अग्नये हे सोम ! त्वां प्रक्षिपामि ।

**यत्ते॑ सोम दि॒वि ज्ज्योति॒र्र्यत्त्पृ॑थि॒व्व्याँय्यदु॒रावन्त॒रिक्क्षे ।**

**तेना॒स्म्मै यज॑मानायो॒रु रा॒ये कृ॒द्ध्यधि॑ दा॒त्रे व्वो॑च॒ः ॥३३॥**

**पदपाठः-** यत् । ते॒ । सो॒म् । दि॒वि । ज्योति॑ः । पृ॒थि॒व्व्याम् । उ॒रौ । अ॒न्तरि॑क्क्षे । तेन॑ । अ॒स्म्मै । यज॑मानाय। उ॒रु । रा॒ये । कृ॒धि॒ । अधि॑ । दा॒त्ते । व्वो॒च॒ः ॥

**सरलार्थः-** (मितस्योपांशुसवने पञ्चवारं प्रक्षिप्तस्य सोमस्य स्पर्शं कुर्यात् ।)

हे सोम द्युलोके तवज्योतिस्तेजः यच्चपृथिव्यां ज्योति विस्तीर्णे अन्तरिक्षे यज्ज्योतिः तेन ज्योतिषा अस्मै यजमानाय धनसम्पन्नं कुरु । हे साम ! फलदाय इन्द्राय ब्रूहि यत् अधिकाधिकोऽयं यजमानः धनवान् भवेत्।

**श्वात्रा स्थं व्वृत्रतुरो राधोंगूर्त्ताऽअमृतंस्य पत्नीं: । ता देंवीद्दंवत्रेमँय्यज्ञन्नंयतोपंहूता: सोमंस्य पिबत ॥३४॥**

**पदपाठः-** श्वात्रा: । स्थ। व्वृत्रतुरऽइतिंवृत्र तुरं÷ । राधोंगूर्त्ताऽइतिराधं÷ गूर्त्ता । अमृतंस्य । पत्नीं: ॥ ता: । देवी: । देवत्तेतिंदेव त्रा । इमम् । यज्ञम् । नयत । उपंहूताऽइत्त्युपं हूता । सोमंस्य । पिबत ॥

**सरलार्थः-** हे आप: यूयं एवं विध: भवथ, क्षिप्रकार्यकारिण्य: शिवा, वृत्रं दैत्यं हिंसन्ति वृत्रतुर: सोमस्य पत्नी तास्तथाविद्या यूयमिमं यज्ञं देवान् प्रति नयत अनुज्ञाता: भूत्वा सोमं पिबत ।

**मा भेर्म्मा सँव्विंक्क्था ऊर्ज्जंन्धत्त्स्व धिषंणे व्वीडडी सती व्वींडयेथामूर्ज्जंन्दधाथाम्। पाप्मा हतो न सोमं ÷॥३५॥**

**पदपाठः-** ऊर्ज्जंम् । धत्त्स्व । धिषंणेऽइतिधिषंणे । व्वीड्ड्वीऽइतिंवीड्ड्वी। सतीऽइतिंसती । व्वीडयेथाम् । ऊर्ज्जम्। दधाथाम् । पाप्मा । हत: । न । सोमं÷ ॥

**सरलार्थः-** हे सोम त्वं मा भैषी: कम्पनं मा कुरु यतो देवतर्पणे अहं त्वांम् अभिषुणोमि अत ऊर्जं धत्स्व रसं धेहि। हे द्यावापृथिव्यै, युवां दृढं कुरुतम् किं च रसं धत्तम् । अनेन वज्रसंस्तुतेन अश्मना यजमानस्य शत्रु हतो न तु सोम: ।

**प्रागपागुदंगधराक्क्सर्व्वतंस्त्वा दिशऽआधांवन्तु । अम्ब निष्प्पंर समरीर्व्विदाम् ॥३६॥**

**पदपाठः-** प्राक् । अपांक् । अदंक् । अधराक् । सर्व्वतं÷ । त्वा । दिशं÷ । आ । धावन्तु ॥ अम्बं । नि:। पर । सम् । अरी: । व्विदाम् ॥

**सरलार्थः-** हे सोम पूर्व, पश्चिम, दक्षिण, उत्तर एवं सर्वादिश: सर्वत: स्वस्वप्रदेशात् त्वाम् अभिमुखेन गच्छन्तु। हे अम्ब, स्वैर्भागै: सोमं पूरय । नाना दिग्वासिनो जना: सोमं जानन्तु ।

**त्वमङ्ग प्प्रशं॰सिषो देव: शंविष्ट्ठ मर्त्त्यंम् । न त्त्वदन्यो मंघवन्नस्ति मर्ड्डितेन्द्र ब्ब्रवींमि ते व्वचं÷ ॥३७॥**

**पदपाठः-** त्वम् । अङ्ग । प्र । शं॰सिष: । देव: । शविष्ट्ठ । मर्त्त्यंम् । न । त्वत् । अन्य: । मघवन्नितिंमघ व्वन् । अस्ति । मर्ड्डिता । इन्द्रं । ब्रवींमि । ते । वचं÷ ॥

**सरलार्थः-** हे इन्द्र त्वं यजमानस्य प्रशंसां करोसि । हे मघवन् यजमानस्य सुखयिता त्वदन्यो नास्ति अतो हे इन्द्र त्वदीयं वचनं अहं ब्रवीमि ।

## शब्दार्थाः

**वसा** - शुद्धमांस, **अध्न्याः** - अवध्या:, **अध्वरः** - यज्ञ:, **विवासति** - परिचरति, **अपन्नगृहस्य** - अपतितगृहस्य, **हिन्वन्तु** - तर्पयन्तु, **धिषणा** - सोमपात्र, **ग्रावाणः** - पाषाण:, **ऊर्मिः** - अप्संघातकल्लोल:, **वीडुः** - दृढ:, **पाप्या** - शत्रु: ।

## स्वाध्यायः

**१. निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) कार्षिरसि ........................ त्वा क्षित्याऽउन्नयामि । (तडागस्य, समुद्रस्य, निर्झरस्य)

(२) हे वसे, त्वम् ........................ हविरसि । (अन्तरिक्षस्य, द्युलोकस्य, पृथ्वीलोकस्य)

(३) सूर्य अस्तं गते ........................ जलग्रहणं कार्यम् । (नद्यात्, कूपाद्, सरोवरात्)

(४) अप्सुहुतमाज्यं ........................ चमसेन दूरीकरोति । (काष्ठ, लोह, मित्रावरुण)

(५) हे वसतीवर्यः अहं त्वां ........................ मण्डपे स्थापयामि । (आह्वयाग्नि, दक्षिणाग्नि, गार्हयत्याग्नि)

**२. निम्नाङ्कितानां प्रश्नानाम् एकैक वाक्येनोत्तराणि लिखत ।**

(१) रविः अस्तं गते कुतः जलग्रहणं कार्यम्?

(२) के अस्माकं यज्ञं तर्पयन्तु?

(३) अग्निना रक्षितः मनुष्यः किं प्राप्स्यति?

(४) दिग्वासिनोजनाः कं जानन्तु?

(५) इन्द्रः कस्य प्रशंसां करोसि?

**३. (अ) निम्नाङ्कितमन्त्राणां भावार्थं लिखत ।**

(१) हृदेत्त्वा मनसेत्त्वा दिवेत्त्वा सूर्य्याय त्त्वा ।
ऊर्द्ध्वमिममद्ध्वरन्दिवि देवेषु होत्रा यच्छ ॥

(२) कार्षिरसि समुद्रस्य त्त्वा क्षित्त्याऽउन्नयामि ।
समापोऽअद्भिरग्मत समोषधीभिरोषधीः ॥

(३) प्रागपागुदगधराक्सर्व्वतस्त्वादिशऽआधावन्तु ।
अम्बनिष्पर समरीर्व्विदाम् ॥

**(ब) निम्नलिखितमन्त्राणां पूर्ति विधेया ।**

(१) देवीरापोऽअपान्न ..................................

(२) मनो मे तर्प्यत ..................................

(३) त्वमङ्ग प्रशꣳ ..................................

**४. पञ्चवाक्यैः उत्तराणि लिखत ।**

(१) वसायाः आहुति काभ्यः दिग्भ्यः प्रदत्तमस्ति?

(२) 'मापोमौषधी' इति मन्त्रे कृत वरुणप्रार्थना लिखत ।

(३) जलग्रहणं कुतः कयारीत्या च करणीयम्?

(४) अग्नेः स्थापनं केन प्रकारेण भवति?

(५) अद्भ्यः केषां तर्पणं भवति?

**५. शब्दरूपाणां परिचयं यच्छत ।**

(१) ग्रावाणः

(२) देवीः

(३) यूयम्

(४) आत्मानम्

(५) मघवन्

६. **क्रियापदानां परिचयं लिखत ।**

(१) रक्षसि
(२) ब्रवीमि
(३) करोसि
(४) शृण्वन्तु
(५) अस्तु

७. **(अ) सन्धिविच्छेदं कुरुत ।**

(१) त्वष्टर्भूरि
(२) शृणोत्वग्निः
(३) हविरसि
(४) शृण्वन्त्वापो
(५) मड्र्डिर्तेन्द्र

**(ब) सन्धिमेलनं कुरुत ।**

(१) हविष्मतीः + इमाः
(२) यत् + आहुः + अध्न्या
(३) हिन्वन्तु + अध्वरम्
(४) सम् + ओषधीभिः + ओषधीः
(५) तु + अग्निः

**छात्र-प्रवृत्तिः**

- छात्राः श्रौतयज्ञपात्रचित्रनिर्माणं कुर्युः ।

**विशिष्टज्ञानम्**

- पितृदेवमनुष्याणां वेदश्चक्षुः सनातनम् ।
  अशक्यं चाप्रमेयं च वेदशास्त्रमितिस्थितिः ॥
  (मनुस्मृतिः)
- पितृदेवमनुष्याणां सनातन चक्षुरूपाः
  वेदाः स्थिताः, अशक्यं अप्रमेयञ्च
  वेदादेव प्रसिद्ध्यति ॥

●

# १० शुक्लयजुर्वेदे-सप्तमोऽध्यायः १

**प्रस्तावना**

यज्ञस्य प्रकारद्वयम् अस्ति-श्रौतयज्ञः स्मार्तयज्ञश्च । श्रुतिस्तुवेदो विज्ञेयः । (मनु २/२०) वेद प्रतिपादितयज्ञः श्रौतयज्ञः, स्मृतिप्रतिपादितयज्ञः स्मार्तयज्ञः । श्रौतयज्ञे वेदमन्त्राणां प्रयोगो भवति । वेदे सोमयज्ञस्य वर्णनम् अनेन प्रकारेण प्रतिपादितम् अस्ति ।

सप्त सोमसंस्थाः (१) अग्निष्टोमः, (२) अत्यग्निष्टोम, (३) उकृष्यः, (४) षोडशी, (५) वाजपेयः, (६) अतिरात्रः, (७) अप्तोर्यामः ।

एतेषु सप्तयज्ञेषु प्रथमः अग्निष्टोम एव परवर्ती अत्यग्निष्टोमादि षट् संस्थानां प्रकृतिभूत-यज्ञः अस्ति । ''एषः प्रथम सोमः ।'' (का. श्रौ. सू. - १०.९ - २४)

पाठेऽस्मिन् सोमयागसम्बन्धिनां मन्त्राणां वर्णनं वर्णितम् अस्ति ।

---

**व्वाचस्प्पतये पवस्व व्वृष्ण्णोऽअꣳशुब्भ्याङ्गभस्तिपूतः । देवो देवेब्भ्यः पवस्व येषाम्भागोसि ॥१॥**

(शु.यजुः, अ-७, मं-२)

**पदपाठः-** व्वाचः । पतये । पवस्व । व्वृष्ण्णः । अꣳशुब्भ्यामित्त्यꣳशु भ्याम् । गभस्तिपूतऽइतिगभस्ति पूतः ॥ देवः । देवेब्भ्यः । पवस्व । येषाम् । भागः । असि ॥

**सरलार्थः-** मंत्रऽस्मिन् सोमदेवेभ्यः प्रार्थना कृता वर्तते यत्- हे सोम ! त्वं वर्षितुः तव संबन्धिभ्याम् अंशुभ्यां पाणिभ्यां च पूतः सन् वाचनस्पतये प्राणाय पवस्य । येषां देवानां त्वं भागः असि तान् देवान् प्रति हे सोम ! देवः सन् देवेभ्यः अर्थायूपवस्व । (अस्य मंत्रस्य पूर्वपदोच्चारणे सति सोमदेवम् उद्दिश्य प्रथमस्य उपांशुग्रहस्य ग्रहणं भवति, द्वितीयपदोच्चारणे सति सोमदेवम् उद्दिश्य द्वितीयस्य उपांशुग्रहस्य ग्रहणं भवति ।)

**मधुमतीर्न्नऽइषस्कृधि यत्ते सोमादाब्भ्यन्नाम जागृवि तस्म्मै ते सोम सोमाय स्वाहा स्वाहोर्व्वन्तरिक्षमन्वेमि स्वाङ्कृतोसि ॥२॥**

(शु.यजुः, अ-७, मं-२)

**पदपाठः-** मधुमतीरितिमधु मतीः । नः । इषः । कृधि । यत् । ते । सोम । अदाब्भ्यम् । नाम । जागृवि। तस्म्मै । ते । सोम । सोमाय । स्वाहा ॥

**सरलार्थः-** पूर्वमन्त्रस्य अनुसन्धानात्मको मन्त्रोऽयं विद्यते, अस्मिन् अपि सोमदेवस्यैव प्रार्थना कृता वर्तते । अनेन मन्त्रेण सोमदेवम् उद्दिश्य तृतीय उपांशुग्रहस्य ग्रहणं भवति ।

हे सोम ! त्वम् अस्माकम् अन्नानि मधुमतीः कुरु । तव उदाभ्यं जागरणशीलं च यन्नमस्ति तदन्नंभवते सोमाय स्वाहा । इत्यनेन अहं विस्तीर्णम् अन्तरिक्षम् अनुगच्छामि इति ।

**स्वाङ्कृतोसि व्विश्श्वेब्भ्यऽइन्द्रियेब्भ्यो दिव्व्येब्भ्यः पार्त्थिवेब्भ्यो मनस्त्वाष्ट्टु स्वाहा त्त्वा सुभव सूर्य्याय देवेब्भ्यस्त्वा मरीचिपेब्भ्यो देवाꣳशो यस्म्मै त्त्वेडे तत्त्सत्त्यमुपरिप्लुता भङ्गेन हतोसौ फट्टप्राणाय त्त्वा व्यानाय त्त्वा ॥३॥**

(शु.यजुः, अ-७, मं-३)

**पदपाठः-** स्वाङ्कृत॒ऽइति॒स्वाम् कृ॒तः । अ॒सि॒ । वि॒श्वे॑भ्यः । इ॒न्द्रि॒येभ्यः॑ । दि॒व्येभ्यः॑ । पार्थि॑वेभ्यः । मनः॑ । त्वा॒ । अ॒ष्टु॒ । स्वाहा॑ । त्वा॒ । सु॒भ॒वेति॑सु भव । सूर्या॑य । दे॒वेभ्यः॑ । त्वा॒ । म॒री॒चि॒पेभ्य॒ऽइति॑मरीचि॒ पेभ्यः॑ । दे॒व॑ । अ॒ꣳशो॒ऽइत्य॑ꣳशो । यस्मै॑ । त्वा । ई॒डे॒ । तत् । स॒त्यम् । उ॒प॒रि॒प्रु॒तेत्यु॑परि॒ प्रुता॑। भ॒ङ्गेन॑ । ह॒तः । अ॒सौ । फट् । प्रा॒णाय॑ । त्वा॒ । व्या॒नायेति॑बि आ॒नाय॑ । त्वा॒ ॥

**सरलार्थः-** मंत्रऽस्मिन् येषां उपांशुग्रहाणां पूर्वे ग्रहणं कृतं वर्तते तेषां उपांशुग्रहाणां प्रार्थना कृताऽस्ति ।

हे प्राणरूप उपांशुग्रह ! त्वं सर्वेभ्यः इन्द्रियेभ्यः दिव्येभ्यः पार्थिवेभ्य सकाशात् स्वयमेव उत्पन्नः असि। तेषामधीशं मनः त्वां व्याप्नोतु इति एषा आहुतिः । हे उत्तमजन्म ग्रह ! प्राणरूपाय सूर्यार्थं त्वां स्वाहाकारेण जुहोमि । हे लेप ! मरीचिपालकेभ्यः देवेभ्यः त्वां परिधौ मार्ज्मि । हे दीव्यमान सोमांश ! यस्मै वधाय त्वां प्रार्थयामि तत् वधकर्म सत्यमस्तु अर्थात् असौ द्वेष्यः निहतः सन् विशीर्णो भवतु । हे उपांशुपात्र! प्राणदेवतासंतोषार्थं त्वाम् आसादयामि । हे उपांशुसवन ! व्यानदेवताप्रीत्यर्थं त्वाम् आसादयामि इत्यर्थः।

**उ॒प॒या॒मगृ॑हीतोस्य॒न्तर्य्य॑च्छ मघव॒न्पा॒हि सोम॑म् । उ॒रु॒ष्य राय॒ऽएषो॑ यजस्व ॥४॥**

(शु.यजुः, अ-७, मं-४)

**पदपाठः-** उ॒प॒या॒मगृ॑हीत॒ऽइत्यु॑पया॒म गृ॑हीतः । अ॒सि॒ । अ॒न्तः । य॒च्छ॒ । म॒घ॒व॒न्निति॑मध व्व॒न् । पा॒हि । सोम॑म्॥ उ॒रु॒ष्य । राय॑ः । आ । इषः॑ । य॒ज॒स्व॒ ॥

**सरलार्थः-** मन्त्रेऽस्मिन् ग्रहीतस्य उपयामग्रहस्य इन्द्रस्य च प्रार्थना कृता वर्तते ।

हे उपयामग्रह ! त्वं ग्रहीतः असि । हे सोमरस । त्व तादृशोऽस्ति । हे मघवन ! त्वं तादृशं रसम् अन्तर्ग्रहपात्रमध्ये निगृहीष्व । ततः सोमं रक्षस्व । त्वं अस्माकं पशून् रक्ष । त्वं अस्मान् आसमन्तात् इषोऽन्नानि देहि इत्यर्थः ।

**अ॒न्तस्ते॒ द्यावा॑पृथि॒वी द॑धाम्य॒न्तर्द॑धाम्म्यु॒र्व्व॒न्तरि॑क्षम् । स॒जूर्दे॒वेभि॒रव॑रैः॒**
**परै॑श्चान्तर्य्या॒मे म॑घवन्मादयस्व ॥५॥**

(शु.यजुः, अ-७, मं-५)

**पदपाठः-** अ॒न्तरित्य॒न्तः । ते॒ । द्यावा॑पृथि॒वीऽइति॒द्यावा॑ पृथि॒वी । द॒धा॒मि॒ । अ॒न्तः । द॒धा॒मि॒ । उ॒रु । अ॒न्तरि॑क्षम्॥ स॒जूरिति॑स॒ जूः । दे॒वभिः॑ । अव॑रैः । परैः॑ । च॒ । अ॒न्त॒र्य्या॒मऽइत्य॑न्तः य॒मि । म॒घ॒व॒न्निति॑मघ व्व॒न्। मा॒द॒य॒स्व॒ ॥

**सरलार्थः-** हे अन्तर्यामग्रह ! अहं तवान्तः द्यावापृथिव्यौ दधामि, किं च विस्तीर्णमन्तरिक्षं दधामि अर्थात् द्यावापृथिव्योः मध्ये अन्तरिक्षं स्थापयामि । हे मघवन् ! पृथिवीस्थानैः द्युस्थानैश्व समानप्रीतियुक्तः सन् अन्तर्यामे ग्रहे मादयस्व इत्यर्थः ।

**स्वाङ्कृ॑तोसि॒ वि॒श्वे॑भ्यऽइन्द्रि॒येभ्यो॑ दि॒व्येभ्यः॒ पार्त्थि॑वेभ्यो॒ मन॑स्त्वाष्टु॒**
**स्वाहा॑ त्त्वा सुभव॒ सूर्य्या॑य दे॒वेभ्य॑स्त्वा मरीचि॒पेभ्य॑ऽउदा॒नाय॑ त्त्वा ॥६॥**

(शु.यजुः, अ-७, मं-६)

**पदपाठः-** स्वाङ्कृत॒ऽइति॒स्वाम् कृ॒तः । अ॒सि॒ । वि॒श्वे॑भ्यः । इ॒न्द्रि॒येभ्यः॑ । दि॒व्येभ्यः॑ । पार्थि॑वेभ्यः । मनः॑। त्वा॒ । अ॒ष्टु॒ । स्वाहा॑ । त्वा॒ । सु॒भ॒वेति॑सु भव । सूर्या॑य । दे॒वेभ्यः॑ । त्वा॒ । म॒री॒चि॒पेभ्य॒ऽइति॑मरीचि॒ पेभ्यः॑ । उ॒दा॒न॒येत्यु॑त् आ॒नाय॑ । त्वा॒ ॥

**सरलार्थः-** हे इन्द्रवायुग्रह ! त्वं सर्वेभ्यः इन्द्रियेभ्यः दिव्येभ्यः पार्थिवेभ्यश्च सकाशात् स्वयमेव उत्पन्नः असि । तेषाम् इन्द्रियाणामधीशं मनः त्वां व्याप्नोतु । हे सुभव ! प्राणरूपाय सूर्याय त्वां स्वाहाकारणे जुहोमि । हे लेप! मरीचिपालकेभ्यः देवेभ्यः त्वां परिधौ मार्जयामि । हे ग्रह ! उदानसन्तोषार्थं त्वां सादयामि इत्यर्थः ।

**आवांयो भूष शुचिपाऽउपं नः सहस्त्रंन्ते नियुतों विश्श्ववार । उपोंतेऽअन्धो मद्यंमयामि यस्यं देव दधिषे पूर्व्वपेयँव्वायवें त्त्वा ॥७॥**

(शु.यजुः, अ-७, मं-७)

**पदपाठः-** आ । व्वायोऽइतिंवायो । भूष । शुचिपाऽइतिंशुचि पाः । उपं । नः । सहस्त्रंम् । ते । नियुतऽइतिंनि। युतंः । विश्श्ववारेतिंविश्श्व व्वार ॥ उपोऽइत्त्युपों । ते । अन्धंः । मद्द्यंम् । अयामि । यस्यं । देवे। दधिषे । पूर्व्वपेयमितिंपूर्व्व पेयंम् । व्वायवें । त्वा ॥

**सरलार्थः-** मन्त्रेऽस्मिन् वायुदेवतां सोमरसञ्च संबोध्य प्रार्थना कृता वर्तते ।

हे वायो ! त्वम् अस्माकं समीपे आक्रमस्व । हे विश्ववार ! तव सहस्त्रं नियुतम् अस्ति । तैः नियुतैः सह शीघ्रम् अत्र आगच्छ । इदं मदनीयं तृप्तिजनकमन्नः सोमलक्षणमन्नं त्वां समर्पयामि । हे देव-दीप्यमान वायो ! यस्य सोमस्य पूर्वपेयं प्रथमवषट्कारलक्षणं पूर्वपानं त्वं धारयसि । हे सोमरस ! वायुदेवतार्थं त्वां गृह्णामि ।

**इन्द्रंवायूऽइमे सुताऽउपप्प्रयोंभिरागंतम् । इन्द्रंवोवामुशन्ति हि । उपयामगृंहीतोसि व्वायवंऽइन्द्रवायुब्भ्यांन्त्वैष ते योनिंः सजोषोंब्भ्यान्त्वा ॥८॥**

(शु.यजुः, अ-७, मं-८)

**पदपाठः-** इन्द्रंवायूऽइतीन्द्रवायू । इमे । सुताः । उपं । प्रयोंभिरितिप्प्रयंः भिः । आ । गतम् ॥ इन्दंवः । व्वाम्। उशन्तिं । हि ॥ व्वायवें । इन्द्रवायुब्भ्यामितीन्द्रवायु भ्यांम् । त्वा । एषः । ते । योनिंः । सजोषोंब्भ्यामितिंसजोषंः भ्याम् । त्वा ॥

**सरलार्थः-** मंत्रेऽस्मिन् इन्द्रवायोः प्रार्थनाकृता वर्तते - :

हे इन्द्रवायु ! युष्मदर्थम् इमे सोमाः अभिषुताः । युवां शीघ्रैः अश्वैः एतैः सोमरसरूपम् अन्ननिमितैः अत्र आगच्छतम् । यस्मात् सोमाः युवां कामयन्ते तस्माद् आगच्छतम् । हे सोमरस ! त्वम् उपयामेन पात्रेण गृहीतः असि । इन्द्रवायुदेवतार्थं च त्वां गृह्णामि । हे पात्र ! एष श्वरस्य एकदेशः ते योनिः तव स्थानम्। अतः अत्र समानप्रीतिभ्यां इन्द्रवायुभ्यां अर्थे त्वां सादयामि ।

**अयँव्वांम्मित्रावरुणा सुतः सोमंऽऋतावृधा । ममेदिह श्श्रुंतँ हवंम् । उपयामगृंहीतोसि मित्रावरुंणाब्भ्यान्त्वा॥९॥**

(शु.यजुः, अ-७, मं-९)

**पदपाठः-** अयम् । व्वाम् । मित्रावरुणा । सुतः । सोमंः । ऋतावृधा । ऋतवृधेत्त्यृंते व्वृधा ॥ ममं । इत् । इह । श्रुतम् । हवंम् ॥ मित्रावरुंणाब्भ्याम् । त्वा ॥

**सरलार्थः-** मन्त्रेऽस्मिन् मित्रावरुणौ प्रार्थितौ वर्तेते :-

हे मित्रावरुणौ ! युवां ऋतस्य वर्द्धयितारौ स्तः । युवयोः अर्थाय अयं सोमः अभिषुतः तस्माद् अस्मिन् यज्ञे आगच्छतम् । यजमानानां मध्ये ममैव आह्वानं युवां श्रुणुतम् । हे सोमरस ! त्वम् उपयामेन मैत्रावरुणग्रहपात्रेण गृहीतः असि । अतः अहं मित्रावरुणाभ्यामर्थे त्वां गृह्णामि ।

**राया व्वयँ संसवाथ्संसों मदेम हव्व्येनं देवा यवंसेन गावंः । तान्धेनुम्मित्रावरुणा युवन्नों व्विश्श्वाहां धत्तमनंपस्प्फुरन्तीमेष ते योनिंर्ऋतायुब्भ्यांन्त्वा ॥१०॥**

(शु.यजुः, अ-७, मं-१०)

**पदपाठः-** राया । व्वयम् । ससवाठ्ठंसऽइतिसस वाठ्ठंसः । मदेम । हव्व्येन । देवाः । यवसेन । गावः । ताम् । धेनुम् । मित्रावरुणा । युवम् । नः । विश्श्वाहा । धत्तम् । अनपस्फुरन्तीमित्त्यनप स्फुरन्तीम्। ऋतायुब्भ्याम् । ऋतयुब्भ्यामित्त्यृतयु भ्याम् । त्वा ॥

**सरलार्थः-** अनेन मन्त्रेण मैत्रावरुणपात्रे कुशद्वयं व्यवधाय तत्र स्वं सोमरसं क्षीरेण मिश्रीकुर्यात् । ऋत्विजः कामदुधां प्रार्थ्यते -

यथा धेन्वा गृहे सत्या वयं धनेन संपन्नाः स्याम । यथा हविषा संपन्ना देवा हृष्यन्ति यथा च यवसेन गवाह्निक गावः हृष्यन्ति । हे मित्रावरुणौ ! युवां तां धेनुं अस्मभ्यं सर्वदा दत्तम् । हे ग्रह ! एष ते योनिः स्थानम् । ऋतायुभ्यां मित्रावरुणाभ्यामर्थे त्वां सादयामि ।

**या वाङ्कशा मधुमत्त्यश्श्विना सूनृतावती । तया यज्ज्ञम्मिमिक्क्षतम् ।**
**उपयामगृहीतोस्यश्श्विब्भ्यान्त्वैष ते योनिर्म्माद्ध्वीब्भ्यान्त्वा ॥११॥**

(शु.यजुः, अ-७, मं-११)

**पदपाठः-** या । व्वाम् । कशा । मधुमतीतिमधु मती । अश्श्विना । सूनृतावतीतिसूनृता व्वती ॥ तया । यज्ज्ञम्। मिमिक्क्षतम् ॥ अश्श्विब्भ्यामित्त्यश्श्वि भ्याम् । त्वा । माद्ध्वीब्भ्याम् । त्वा ॥

**सरलार्थः-** मन्त्रेऽस्मिन् अश्विनौ प्रति प्रार्थनाकृता वर्तते ।

हे अश्विदेवौ ! तया वाचा अस्मदीयं यज्ञं मिमिक्षतम् । हे ग्रह ! त्वं अश्विभ्यामर्थे उपयामेन गृहीतोऽसि, एष ते योनिः स्थानम् । मधुब्राह्मणाध्येतृभ्याम् अश्विभ्यामर्थे त्वां सादयामि ।

**तम्प्रत्क्नथा पूर्व्वथा व्विश्श्वथेमथा ज्ज्येष्ठतातिम्बर्हिषदठ्ठं स्वर्व्विदम् ।**
**प्रतीचीनँव्वृजनन्दोहसे धुनिमाशुञ्जयन्तमनु यासु व्वर्द्धसे । उपयामगृहीतोसि**
**शण्डाय त्त्वैष ते योनिर्व्वीरताम्पाह्यपमृष्टः शण्डो देवास्त्वा शुक्क्रपाः**
**प्प्रणयन्त्वनाधृष्टासि ॥१२॥**

(शु.यजुः, अ-७, मं-१२)

**पदपाठः-** तम् । प्रत्क्नथेतिप्रत्क्न था । पूर्व्वथेतिपूर्व्व था । व्विश्श्वथेतिविश्श्व था । इमथेतीम था । ज्ज्येष्ठतातिमितिज्ज्येष्ठतातिम्। बर्हिषदम् । बर्हिसदमितिबर्हि सदम् । स्वर्व्विदमितिस्वः व्विदम् । प्रतीचीनम् । व्वृजनम् । दोहसे । धुनिम्। आशुम् । जयन्तम् । अनु । यासु । व्वर्द्धसे ॥ शण्डाय । त्वा । व्वीरताम् । पाहि । अपमृष्टऽइत्त्यप मृष्टः । शण्डः । देवाः । त्वा । शुक्क्रपाऽइतिशुक्क्र पाः । नयन्तु । अनाधृष्टा । असि ॥

**सरलार्थः-** मन्त्रेणानेन शुक्रेन्द्रश्च प्रार्थितम् अस्ति -

हे इन्द्र ! त्वं यासु यज्ञक्रियासु पुनः पुनः सोमपानेन वृद्धिं प्राप्नोषि, यस्त्वं बलवद् यज्ञफलं दोहसे, त्वं बलवान् स्वर्गञ्च असि । हे इन्द्र ! त्वं प्रतिगमनम् अस्मत् प्रतिकूलं वर्जनीयम् आलस्याश्रद्धादिकं दोहसे। हे शुक्रग्रह ! त्वम् उपयामेन गृहीतः असि । शण्डनाम्ने शुक्रपुत्राय त्वां गृहणामि । त्वं यजमानस्य वीरतां शूरत्वं च पाहि । त्वां यजतिस्थानं प्रापयन्तु । हे उत्तरवेदिश्रोणे ! त्वम् अनाधृष्टा अनुपहिंसिता असि।

**सुवीरो व्वीरान्प्रजनयन्परीह्यभिरायस्पोषेण यजमानम् । सञ्जग्गमानो**
**दिवा पृथिव्व्या शुक्क्रः शुक्क्रशोचिषा निरस्तः शण्डः**
**शुक्क्रस्याधिष्ठानमसि ॥१३॥**

(शु.यजुः, अ-७, मं-१३)

**पदपाठः-** सुवीरऽइतिसु व्वीरः । व्वीरान् । प्रजनयन्नितिप्प्र जनयन् । परि । इहि । अभि । रायः । पोषेण।

यज॑मानम् ॥ सञ्जग्मानऽइति॑सम् जग्मा॒नः । दि॒वा । पृ॒थि॒व्या । शु॒क्रः । शु॒क्रशो॑चि॒षेति॑शु॒क्र शो॑चिषा निर॑स्त॒ऽइति॒निः अ॑स्तः । शण्ड॑ः । शु॒क्रस्य॑ । अ॒धि॒ष्ठान॑म् । अ॒धि॒स्थान॒मित्य॑धि॒ स्थान॑म् । अ॒सि॒॥

**सरलार्थः-** हे शुक्रग्रह ! त्वं शोभनवीर्योयेनः सन् यजमानस्य शौर्योपेतान् भृत्यादीन प्रजनयन् धनस्य पुष्ट्या यजमानम् अभिलक्ष्य परितः गच्छ । शुक्रो ग्रहः शुद्धदीप्त्या द्युलोकेन भूलोकेन च संगच्छमानः सन् यूयं बिभर्ति। शण्डनामकः शुक्रपुत्रः यज्ञाद् बहिः निक्षिप्तः । (अनेन अध्वर्युः आहवनीये प्रोक्षितं यूपशकलं क्षिपेत् ।) हे यूपशकल ! त्वं शुक्रग्रहस्थ अधिष्ठानम् असि ।

**अच्छि॑न्नस्य ते देव सोम सुवीर्य्य॑स्य रा॒यस्पोष॑स्य ददि॒तार॑ः स्याम । सा प्र॑थ॒मा सँस्कृ॑तिर्वि॒श्वव॑ारा॒ स प्र॑थ॒मो व्वरु॑णो मि॒त्रोऽअ॒ग्निः ॥१४॥**

(शु.यजुः, अ-७, मं-१४)

**पदपाठः-** अच्छि॑न्नस्य । ते । दे॒व । सो॒म । सुवी॒र्य्य॒स्येति॑सु॒ व्वीर्य्य॑स्य । रा॒यः । पोष॑स्य । द॒दि॒तार॑ । स्या॒म॥ सा । प्र॒थ॒मा । सँस्कृ॑तिः । वि॒श्वव॒ारेति॑विश्व व्वा॑रा । सः । प्र॒थ॒मः । वरु॑णः । मि॒त्रः । अ॒ग्निः॥

**सरलार्थः-** हे दीप्यमान सोम ! वयं तव अनवखण्डितस्य कल्याणप्रभवस्य दातारः भवेम । तव प्रसादात् वयं धनपोषस्य च दातारः भवेम । सर्वैः ऋत्विग्भिः अनृत्विग्भिः च वरणीयः सोमस्य एषः प्रथमः मुख्यः संस्कारः, यस्य प्रथमो मुख्यो भृत्यः वरुणो, मित्रः अग्निश्च वर्तन्ते । देवगणानां यः प्रभुः इत्यर्थः ।

**स प्र॑थ॒मो बृ॒ह॒स्पति॑श्चि॒कि॒त्त्वाँस्तस्मा॒ऽइन्द्रा॑य सु॒तमा जु॑होत॒ स्वाहा॑ । त्र्यम्प॑न्तु होत्रा॒ मदध्वो या॒ः स्वि॑ष्टा॒ या॒ः सुप्री॑ता॒ः सुहु॑ता यत्स्वाहाया॑ड॒ग्नीत् ॥१५॥**

शु.यजुः, अ-७, मं-१५)

**पदपाठः-** सः । प्र॒थ॒मः । बृ॒ह॒स्पति॑ः । चि॒कि॒त्त्वान् । तस्मै॑ । इन्द्रा॑य । सु॒तम् । आ । जु॒हो॒त । स्वाहा॑ । तृ॒म्पन्तु॑ । होत्रा॑ः । मद्ध्व॑ः । याः । स्वि॑ष्टा॒ऽइति॒सु इ॑ष्टाः । याः । सुप्री॑ता॒ऽइति॒सु प्री॑ताः । सु॒हु॑ता॒ऽइति॒सु हु॑ताः । यत् । स्वाहा॑ । अया॑ट् । अ॒ग्नीत् ॥

**सरलार्थः-** स प्रसिद्धः चेतनावान् उत्कृष्टधीः बृहस्पतिः इन्द्रस्य प्रथमो मुख्यो मन्त्री । हे ऋत्विजः ! तादृशाय इन्द्राय अभिषुतं सोमं स्वाहाकारेण होमं कुरुत । ताः मधुस्वादस्य होमस्य स्विष्टाः छन्दोभिमानिन्यः देवताः तृप्ताः भवन्तु । (अध्वर्युः होतृसमीपे प्रत्यङ्मुखः निष्ठेत् । अग्निना यागः कृत इति होताः कथयति ।)

**अ॒यँव्वे॒नश्चो॑दय॒त्पृश्नि॑गर्भा॒ ज्योति॑र्जरायू॒ रज॑सो वि॒माने॑ । इ॒मम॒पाꣳ स॒ङ्ग॒मे सूर्य्य॑स्य॒ शिशु॒न्न विप्रा॑ म॒तिभी॑रिहन्ति । उ॒प॒या॒मगृ॑हीतोसि॒ मर्क्का॑य त्त्वा ॥१६॥**

(शु.यजुः, अ-७, मं-१६)

**पदपाठः-** अ॒यम् । व्वे॒नः । चो॒द॒य॒त् । पृश्नि॑गर्भा॒ऽइति॒पृश्नि॑ गर्भा । ज्योति॑र्जरायु॒रिति॒ज्ज्योति॑ः जरायु । रज॑सः। वि॒मान॒ऽइति॑धि माने॑ ॥ इ॒मम् । अ॒पाम् । स॒ङ्गम॒ऽइति॑सम् ग॒मे । सूर्य्य॑स्य । शिशु॑म् । न । विप्रा॑ः। म॒तिभि॒रिति॑म॒तिभि॑ः । रि॒ह॒न्ति॒ ॥ मर्क्का॑य । त्वा॒ ॥

**सरलार्थः-** अनेन मन्त्रेण मन्थिग्रहं गृहणीयात् । मन्त्रेऽस्मिन् अधिदैवं चन्द्रात्मना स्तूयते :-

अयं कानीश्चन्द्र उदकस्य निर्माणकाले ग्रीष्मान्ते प्राप्ते अपः प्रेश्यति, अर्थात् आदित्यः द्युलोको वा गर्भोऽवस्थानं अपः वर्षति । इदानीमधियज्ञं लतात्मना सोमः स्तूयते । मेधाविनो ब्राह्मणा इमं सोमं शिशुमिव मतिभिः स्तुवन्ति । अपां सूर्यस्य संगमे निमित्ते उदकं सूर्यसमागमनिमितं वृष्टिगर्भनिष्पत्यर्थं विप्रा इमं सोमं स्तुवन्ति, यथा बालं कस्यचिद्वस्तुनो लाभाय यथा कश्चित्स्तौति । ईदृश-हे सोम ! त्वमुपयामेन ग्रहपात्रेण गृहीतः असि । मर्कः नाम्नः शुक्रपुत्रः यः असुराणां पुरोहितः अस्ति, तस्मै त्वां गृह्णामि ।

**मनो न येषु हवनेषु तिग्मँविपः शच्च्या व्वनुथो द्रवन्ता। आ यः शर्य्याभिस्तुविनृम्म्णोऽअस्याश्श्रीणीतादिशङ्गभस्तावेष ते योनिः प्प्रजाः पाह्यपमृष्टो मक्को देवास्त्वा मन्थिपाः प्प्रणयन्त्वनाधृष्टासि ॥१७॥**

(शु.यजुः, अ-७, मं-१७)

**पदपाठः-** मनः । न । येषु । हवनेषु । तिग्ग्मम् । व्विपः । शच्च्या । व्वनुथः । द्रवन्ता ॥ आ । यः । शर्य्याभिः । तुविनृम्म्णऽइतितुवि नृम्म्णः । अस्य । अश्श्रीणीत । आदिशमित्त्या दिशम् । गभस्तौ । प्रजाऽइतिप्र जाः । पाहि । अपमृष्टऽइत्यप मृष्टः । मक्कः । देवाः । त्वा । मन्थिपाऽइतिमन्थि पाः । प्र। नयन्तु । अनाधृष्टा । असि ॥

**सरलार्थः-** (मंत्रेणानेन मन्थिग्रहं यवपिष्टैः मिश्रीकुर्यात् ।)

यौ मेधाविनौ अध्वर्युप्रतिप्रस्थातारौ गच्छन्तौ हवनेषु तेषु एव कर्तव्येषु होमेषु प्रचरन्तौ । यः अध्वर्युः शर्याभिः पाणौ स्थितस्य अस्य मन्थिग्रहस्य समन्तान् सक्तुभिः मिश्रयति । यद्यपि अत्र अध्वर्युप्रतिप्रस्थातारौ समानकर्माणौ तथापि यः सक्तुभिः श्रपणं करोति स एव प्रधान इत्याशयः । हे मन्थिग्रह ! तव एष योनिः प्रदेशः। त्वं प्रजाः यजमानसंबन्धिनीः वा पाहि । मर्को नाम्नः असुराणां पुरोहितः हविर्धानात् निष्क्रामतः । हे मन्थिग्रह ! मन्थिपाः देवाः त्वां यजति स्थानं प्रापयन्तु ।

**सुप्प्रजाः प्प्रजाः प्प्रजनयन्परीह्यभि रायस्प्पोषेण यजमानम् । सञ्जग्ग्मानो दिवा पृथिव्व्या मन्थी मन्थिशोचिषा निरस्तो मक्को मन्थिनोधिष्ठ्ठानमसि ॥१८॥**

(शु.यजुः, अ-७, मं-१८)

**पदपाठः-** सुप्प्रजाऽइतिसु प्रजाः । प्रजाऽइतिप्र जाः । प्रजनयन्नितिप्र जनयन् । परि । इहि । अभि । रायः। पोषेण । यजमानम् । सञ्जग्ग्मानऽइतिसम् जग्ग्मानः । दिवा । पृथिव्व्या । मन्थी । मन्थिशोचिषेतिमन्थि शोचिषा । निरस्तऽइतिनिः अस्तः । मक्कः । मन्थिनः । अधिष्ठ्ठानम् । अधिस्थानमित्त्यधि स्थानम्। असि ॥

**सरलार्थः-** अनेन मन्त्रेण प्रतिप्रस्थानः उत्तरं यूपदेशं गच्छति, मन्थिदैवतश्च प्रार्थयति ।

हे मन्थिग्रह ! त्वं यजमानसम्बन्धिनोः प्रजाः उत्पादयन् सन् धनस्य पुष्ट्या सह यजमानसन्मुखं आगच्छ। मन्थी नाम ग्रहो द्युलोकभूलोकाभ्यां संगच्छमानः सन् मन्थिनः स्वस्यैव दीप्त्या यूपं बिभर्ति । (प्रतिप्रस्थाता अप्रोक्षितं यूपशकलं निरस्येत् ) मर्कनाम्नः असुराणां पुरोहितः यज्ञात् निराकृतः । (प्रतिप्रस्थाता प्रोक्षितं यूपशकलम् आहवनीये प्रक्षिपेत् ।) शकलदैवत्ताश्च प्रार्थयेत् हे यूपशकल ! त्वं मन्थिग्रहस्य अधिकरणम् असि ।

**ये देवासो दिव्व्येकादश स्त्थ पृथिव्व्यामद्ध्येकादश सत्थ । अप्प्सुक्षितो महिनैकादश स्त्थ ते देवासो यज्ज्ञमिमञ्जुषद्ध्वम् ॥१९॥**

(शु.यजुः, अ-७, मं-१९)

**पदपाठः-** ये । देवासः । दिवि । एकादश । स्थ । पृथिव्व्याम् । अधि । एकादश । स्थ ॥ अप्प्सुक्क्षितऽइत्त्यप्प्सु क्षितः । महिना । एकादश । स्थ । ते । देवासः । यज्ज्ञम् । इमम् । जुषद्ध्वम् ॥

**सरलार्थः-** ये देवाः द्युलोके स्व-स्व माहात्म्येन एकादशसंख्यकाः, पृथिवी-उपरि अपि स्वस्वमहिम्ना एकादशसंख्याकाः तथा च अप्सुनाम अन्तरिक्षेऽपि ये स्वमहिम्ना एकादशसंख्यकाः निवसन्ति, तादृशाः हे देवाः ! ते त्रिविधा यूयम इमं यज्ञं सेवध्वम् ।

**उ॒प॒या॒मगृ॑हीतोस्याग्र॒य॒णो॑ऽसि॒ स्वा॒ग्रयणः । पा॒हि य॒ज्ञम्पा॒हि य॒ज्ञप॑तिं॒विष्णु॒स्त्वामि॑न्द्रि॒येण॑ पातु विष्ण्णुन्त्वम्पा॑ह्य॒भि सव॑नानि पाहि ॥२०॥**

(शु.यजु:, अ-७, मं-२०)

**पदपाठः-** आ॒ग्र॒य॒णः । अ॒सि॒ । स्वा॑ग्रयण॒ऽइतिसु आ॑ग्रयणः ॥ पा॒हि । य॒ज्ञम् । पा॒हि । य॒ज्ञप॑ति॒मिति॑य॒ज्ञ प॑तिम् । विष्णु॑ः । त्वाम् । इ॒न्द्रि॒येण॑ । पा॒तु । विष्ण्णु॑म् । त्वम् । पा॒हि । अ॒भि । सव॑नानि । पा॒हि ॥

**सरलार्थः-** मन्त्रेऽस्मिन् आग्रयणग्रहस्य प्रार्थना कृता वर्तते -

हे आग्रयणग्रह ! त्वमुपयामेन पात्रेण स्वीकृत: असि । त्वं आग्रं स्वाग्रं श्रैष्ठयं प्रापयति । तादृश: त्वं यज्ञं रक्ष । यजमानम् अपि रक्ष । यज्ञस्य अधिष्ठाता विष्णु: स्वसामर्थ्येन त्वां पातु । त्वम् अपि तादृशं विष्णुं रक्ष । त्वं अस्माकं प्रातरादीनि सवनानि सर्वत: रक्ष ।

**सोम॑ः पवते॒ सोम॑ः पवते॒स्मै ब्रह्म्म॑णे॒स्मै क्ष॒त्रायास्मै सु॒न्वते य॒ज॑मानाय पवत॒ऽष॒ऊ॒र्जे प॑वते॒द्भ्यऽओष॑धीब्भ्य पवते॒ द्यावा॑पृथि॒वीब्भ्या॑म्पवते सुभू॒ताय॑ पवते॒ विश्श्वे॑ब्भ्यस्त्वा देवेब्भ्य॑ऽए॒ष ते॒ योनि॒र्विश्श्वे॑ब्भ्यस्त्वा दे॒वेब्भ्य॑ः ॥२१॥**

(शु.यजु:, अ-७, मं-२१)

**पदपाठः-** सोम॑ः । प॒व॒ते॒ । सोम॑ः । प॒व॒ते॒ । अ॒स्मै । ब्रह्म्म॑णे । क्ष॒त्राय॑ । सु॒न्वते । यज॑मानाय । इ॒षे । ऊ॒र्जे । अ॒द्भ्यऽइत्य॒त् भ्यः । ओष॑धीब्भ्यः । द्यावा॑पृथि॑वीब्भ्याम् । सुभू॒तायेति॑सु भू॒ताय॑ । विश्श्वे॑ब्भ्यः । त्वा॒ । दे॒वेब्भ्य॑ः ॥

**सरलार्थः-** हिङ्कारत्रयं कृत्वा मन्त्रोऽयं जयेत् -

सोमो ग्रहपात्रेषु स्वकीये कर्मणि गच्छति । स: सोम: ब्राह्मणजातिप्रीत्यर्थं, क्षत्रियजातिप्रीत्यर्थं, यजमानाय कामप्राप्त्यर्थं, अन्न-क्षीरादीनां उपसेचनार्थं निष्पत्यर्थं वा पवति, परं च वृष्टिभ्य: व्रीहियवादीनां सिद्धयर्थं, लोकद्वयप्रीणनाय किंवा बहुलेन सर्वेषां साधुभवनाय पवति । हे आग्रयणग्रह ! तादृशं त्वां सर्वदेवताप्रीत्यर्थं गृह्णामि । हे ग्रह ! एष ते योनि: स्थानं सर्वेभ्यो देवेभ्योऽर्थे त्वां सादयामि ।

**उ॒प॒या॒मगृ॑हीतो॒सीन्द्रा॑य त्त्वा बृ॒हद्व॑ते व्वय॑स्वतऽउक्क्था॒व्व्यं॒ङ्गृह्णामि । य॒त्त॑ऽइन्द्र बृ॒हद्व॒य॒स्तस्म्मै॑ त्त्वा॒ व्विष्ण्ण॑वे त्त्वै॒ष ते॒ योनि॑रु॒क्क्थेब्भ्य॑स्त्वा दे॒वेब्भ्य॑स्त्वा देवा॒व्व्यँ॒य्य॒ज्ञस्यायु॑षे गृह्णामि मि॒त्रावरु॑णाब्भ्यान्त्वा ॥२२॥**

(शु.यजु:, अ-७, मं-२२)

**पदपाठः-** इन्द्रा॑य । त्वा॒ । बृ॒हद्व॑त॒ऽइति॑बृ॒हत् व्व॑ते । व्वय॑स्वते । उ॒क्क्था॒व्व्यु॒मित्त्यु॑क्क्थ अ॒व्व्यम् । गृ॒ह्ण॒णा॒मि॒ ॥ यत् । ते॒ । इ॒न्द्र॒ । बृ॒हत् । व्वय॑ः । तस्म्मै॑ । त्वा॒ । व्विष्ण्ण॑वे । त्वा॒ । उ॒क्क्थेब्भ्य॑ः । त्वा॒ । दे॒वेब्भ्ये॑ः । त्वा॒ । दे॒वा॒व्व्यु॒मिति॑दे॒व अ॒व्व्यम् । य॒ज्ञस्य॑ । आयु॑षे । गृ॒ह्ण॒णा॒मि॒ ॥

**सरलार्थः-** अनेन मन्त्रेण उकथ्यं ग्रहं गृह्णीयात्, सोमंउक्थ्यग्रहञ्च प्रार्थयेत् -

हे सोम ! त्वमुपयामेन पात्रेण गृहीत: असि । हे उकृथ्यग्रह ! त्वां बृहत्सामरूपाय सोमान्नरूपाय च इन्द्रार्थं स्वीकरोति । हे इन्द्र ! यत् तव महदन्नं सोमरूपम् अस्ति तत् पानार्थं त्वां प्रार्थये । हे सोम! विष्णुदेवतार्थं त्वां गृह्णामि । हे इन्द्र ! यत् तव महत् ऊर्जितम् यौवनलक्षणं तस्मै सोम, त्वां गृह्णामि। हे सोम ! यद् अस्य इन्द्रस्य बृहदय: तस्मै त्वां गृहणामि । विष्णवे यज्ञाय च त्वां गृहणामि । हे ग्रह!

एष तव योनिः स्थानम् उक्थ्येभ्यः त्वां सादयामि । हे सोम ! देवान् अवति तर्पयति तादृशस्य यज्ञस्य आयुषे त्वां गृह्णामि ।

**मि॒त्रावरु॑णाभ्यान्त्वा देवा॒व्व्यँ॑म्य॒ज्ञस्यायु॑षे गृह्णा॒मीन्द्रा॑य त्त्वा देवा॒व्व्यँ॑म्य॒ज्ञस्यायु॑षे गृह्णा॒मीन्द्रा॒ग्निभ्यां॑न्त्वा देवा॒व्व्यँ॑म्य॒ज्ञस्यायु॑षे गृह्णा॒मीन्द्रा॒वरु॑णाभ्यान्त्वा देवा॒व्व्यँ॑म्य॒ज्ञस्यायु॑षे गृह्णा॒मीन्द्रा॒बृह॒स्पति॑भ्यान्त्वा देवा॒व्व्यँ॑म्य॒ज्ञस्यायु॑षे गृह्णा॒मीन्द्रा॒विष्णु॑भ्यान्त्वा देवा॒व्व्यँ॑म्य॒ज्ञस्यायु॑षे गृह्णामि ॥२३॥**

(शु.यजुः, अ-७, मं-२३)

**पदपाठः-** मि॒त्रावरु॑णाभ्याम् । इन्द्रा॑य । इ॒न्द्रा॒ग्निभ्या॒मिती॑न्द्रा॒ग्नि भ्या॑म् । इन्द्रा॒वरु॑णाभ्याम् । इ॒न्द्रा॒बृह॒स्पति॑भ्या॒मिती॑न्द्रा॒बृह॒स्पति॑ भ्याम् । इ॒न्द्रा॒विष्णु॑भ्या॒मिती॑न्द्रा॒विष्णु॑ भ्याम् ।

**सरलार्थः-** हे सोम ! मित्रावरुणाभ्यामर्थे, इन्द्राय, इन्द्राग्निभ्यामर्थे, इन्द्रावरुणयोरर्थे, इन्द्रबृहस्पतिभ्यामर्थे, इन्द्रविष्णुभ्यामर्थे तथा च देवतर्पकं यज्ञस्य फलपर्यन्तमवस्थानाय च त्वां गृह्णामि ।

**मू॒र्द्धानं॑न्दि॒वोऽअ॑र॒तिम्पृ॑थि॒व्या व्वै॑श्वान॒रमृ॒तऽआजा॒तम॒ग्निम् ।**

**क॒विँ॒ सम्रा॒जमति॑थि॒ञ्जना॑नामा॒सन्ना पात्र॑ञ्जनयन्त दे॒वाः ॥२४॥**

(शु.यजुः, अ-७, मं-२४)

**पदपाठः-** मू॒र्द्धान॑म् । दि॒वः । अ॒र॒तिम् । पृ॒थि॒व्याः । व्वै॒श्वा॒न॒रम् । ऋ॒ते । आ । जा॒तम् । अ॒ग्निम् ॥ क॒विम्। स॒म्राज॒मिति॑ स॒म् राज॑म् । अति॑थिम् । जना॑नाम् । आ॒सन् । आ । पात्र॑म् । ज॒न॒य॒न्त॒ । दे॒वाः ॥

**सरलार्थः-** हे ध्रुवग्रह ! द्युलोकस्य शिरोवद् उन्नतप्रदेशे सूर्यरूपेण भासकम्, पृथिव्याः रतिरहितम्, अरिरहितम् यज्ञे उत्पन्नम्, स्वभक्तान् अनुग्रहीतुम् अभिज्ञम्, सम्यग् दीप्यमानम्, ऐश्वर्ययुक्तम्, यजमानानां अतिथिं वा हविर्भिः सत्कारयोग्यम् ईदृशं वैश्वानररूपं गृह्याग्निम् इन्द्राग्नयो देवाः अजनयन ।

## शब्दार्थाः

**पूतः** - पवित्रः, **पवस्व** - गच्छ, **मधुमतीः** - मधुरसोपेताः, **अदाभ्यम्** - अहिंस्यम् (दभ्नोति-हिंसार्थः), **दिव्येभ्यः** - देवेभ्यः, **पार्थिवेभ्यः** - द्विपदचतुष्पदेभ्यः, पृथिवीभवेभ्यः, **मार्ज्मि** - मार्जयामि, **वीशीर्णः** - विनाशः, शुष्कः, **मघवन्** - धनवन् इन्द्र, **मादयस्व** - तृष्यस्व (मद तृप्तौ), **सुभव** - उत्तमजन्मन ग्रह, **आक्रमस्व** - आगच्छ, **विश्ववार** - सर्वव्यापक, **नियुतः** - वायुवाहनभूतः मृगः, **ऋतस्य** - यज्ञस्य, **ऋतायुः** - मित्रावरुणः, **मिमिक्षतम्** - सेचयतम् (मिह सेचने), **दोहसे** - क्षारयसि, ददासि, **पाहि** - पालय, **प्रजनयन** - उत्पादयन, **अधिष्ठानम्** - अधिकरणम्, **प्रेश्यति** - वर्षयति, **शिशुमिव** - बालमिव, **शर्याभिः** - अङ्गुलीभिः, **निराकृतः** - बहिष्कृतः, निष्कासितः, **दीप्त्या** - तेजसा, **पवति** - गच्छति, **लोकद्वय** - द्युलोकः पृथिवीलोकश्च, **अक्येभ्यः** - अक्यस्थालीस्थः सोमेभ्यः, **ध्रुवग्रह** - ध्रुवसंज्ञक-सोमग्रह, **रतिरहितम्** - संचरणशीलम्, **गृह्याग्निम्** - गार्हयत्याग्निम् ।

## स्वाध्यायः

१. **निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) वाचस्पतये ........................ वृष्णः । (मादयस्व, पवस्व, जुषस्व)

(२) मघवन् पाहि ........................ । (देवम्, यज्ञम्, सोमम्)

(३) ........................ यज्ञं मिमिक्षतम् । (तया, मया, त्वया)

(४) सुप्रजाः ........................ प्रजनयन् । (देवाः, जनाः, प्रजाः)

(५) मूर्द्धानन्दिवोऽ अरतिम् ........................ । (पृथिव्या, दिवा, दिग्भ्यः)

२. **निम्नाङ्कितानां प्रश्नानाम् एकैक वाक्येनोत्तराणि लिखत ।**

(१) मन्थिग्रहस्य ग्रहणं केन मंत्रेण भवति?

(२) ''स्वाङ्गतोसि'' इति मंत्रे केषां प्रार्थना कृता वर्तते?

(३) मित्रावरुणौ कस्य वर्द्धयितारौ स्तः?

(४) ''मघवन्'' इत्यनेन कः ज्ञायते?

(५) गृहयाग्निं शब्देन कस्य ग्रहणं भवति?

३. **(अ) निम्नाङ्कितमन्त्राणां भावार्थं लिखत ।**

(१) ॐ अन्तस्ते द्यावापृथिवी दधाभ्यन्तर्दधाम्म्युर्व्वन्तरिक्षम् ।

सजूर्देवेभिरवरैः परैश्वान्तर्य्यामे मधवन्मादयस्व ॥

(२) ॐ आवायो भूष शुचिपाऽउपनः सहस्रन्ते नियुतो व्विश्ववार ।

उपो तेऽअन्धौ मद्यमयालि यस्य देव दधिषे पूर्व्वपेयंव्वाचवे त्वा ॥

(३) ॐ यावाङ्कशा मधुमत्यश्विना सूनृतावती । तथा यज्ञम्मिमिक्षतम् ।

उपपामगृहीतोस्यश्विभ्यान्त्वैषते योनिर्म्माद्ध्वीभ्यान्त्वा ॥

(४) ॐ सप्रतमो बृहस्पतिश्चिकित्वांस्तस्माऽइन्द्राय सुतमा जुहोत स्वाहा ।

तृम्पन्तु होत्रा मद्धोयाः स्विष्टा याः सुप्रीताः सुहुता यत्स्वाहायाऽग्नीत् ॥

(५) ॐ सोमः पवते सोमः पवतेस्म्मै ब्ब्रह्मणेस्म्मै क्षत्रायास्म्मै सुन्वते यजमानाय पवतऽ इषऽ उर्ज्जे पवतेद्भ्यऽओषधीभ्यः पवते द्यावापृथिवीब्भ्याम्पवते सुभूताय पवते व्विश्वेब्भ्यस्त्वा देवेब्भ्यऽएषते योनिर्व्विश्वेब्भ्यस्त्वा देवेभ्यः ॥

**(ब) निम्नलिखितमन्त्राणां पूर्ति विधेया ।**

(१) वाचस्पतये ................................. ।

(२) उपयामगृहीतोस्यन्तः .................................. ।

(३) इन्द्रवायूऽइमे सुता .................................. ।

(४) तम्प्रत्क्नथा .................................. ।

(५) मूर्द्धानन्दिवः .................................. ।

४. **पञ्चवाक्यैः उत्तराणि लिखत ।**

(१) पाठेऽस्मिन् केषां - केषां प्रार्थना कृता वर्तते?

(२) ऋत्विजः कामदुधां किं प्रार्थयति?

(३) इन्द्रः कीदृशो अस्ति ?

(४) एकादशसंख्यकाः देवाः कुत्र-कुत्र स्थिताः वर्तन्ते ?

(५) सोमः किमर्थं पवति ?

**५. शब्दरूपाणां परिचयं यच्छत ।**

(१) विश्वेभ्यः

(२) पतये

(३) तस्मै

(४) भङ्गेन

(५) प्रयोभिः

**६. क्रियापदानां परिचयं लिखत ।**

(१) दोहसे

(२) मिमिक्षतम्

(३) जुहोत

(४) जुषद्ध्वम्

(५) पवते

**७. (अ) सन्धिविच्छेदं कुरुत ।**

(१) स्वाङ्कृतोसि

(२) ममेदिह

(३) स्वाग्रयणः

(४) त्वैषते

(५) यज्ञस्यायुषे

**(ब) सन्धिमेलनं कुरुत ।**

(१) मनः + त्वा + अष्टु

(२) उरु + अन्तरिक्षम्

(३) परि + इहि + अभि

(४) सु + इष्टाः

(५) गभस्तौ + एषते

**छात्र-प्रवृत्तिः**

- छात्राः सोमयाग विषये आगतानां यज्ञसामग्रीनां चित्राणि चित्रयन्तु ।

**विशिष्टज्ञानम्**

- अन्नं न निन्द्यात् तद् व्रतम् ।

(-तै. उ. - ३/७)

- अन्नस्य निंदानकरणीया तद्व्रतम् ॥

| ११ | शुक्लयजुर्वेदे-सप्तमोऽध्यायः २ |
|---|---|

**प्रस्तावना**

पूर्व-पाठानुसारम् अस्मिन्नपि सोमयाग-मन्त्राः निगदिताः सन्ति । अग्रीम पाठस्य अनुसन्धानात्मको पाठोऽयं विद्यते।

---

**उपयामगृहीतोसि द्ध्रुवोसि द्ध्रुवक्षितिर्द्ध्रुवाणान्ध्रुवतमोच्च्युतानामच्युतक्षित्तमऽएष ते योनिर्व्वैश्वानराय त्त्वा । ध्रुवन्ध्रुवेण मनसा व्वाचा सोममवनयामि । अथान्नऽइन्द्रऽइद्विशोसपत्त्नाः समनसस्क्करत् ॥२५॥**

(शु.यजुः, अ-७, मं-२५)

**पदपाठः-** ध्रुवः । असि । ध्रुवक्क्षितिरिति ध्रुव क्षितिः । ध्रुवाणाम् । ध्रुवतमऽइति ध्रुव तमः । अच्च्युतानाम् । अच्च्युतक्क्षित्तमऽइत्यच्च्युतक्क्षित् तमः । व्वैश्श्वानराय । त्वा ॥ ध्रुवम् । ध्रुवेण । मनसा । व्वाचा । सोमम् । अव । नयामि ॥ अथ । नः । इन्द्रः । इत् । व्विशः । असपत्नाः । समनसऽइति स मनसः । करत् ॥

**सरलार्थः-** हे सोम ! त्वमुपयामेन पात्रेण गृहीतोसि । त्वं वैश्वदेवीशंसनप्रस्थानात् ध्रुवानां मध्ये अतिशयेन स्थिरः असि । च्युतिरहितानां मध्ये अतिशयेन च्युतिरहितो असि । हे ग्रह ! एष ते योनिः स्थानं, वैश्वानराय अग्नये त्वां सादयामि । एकाग्रेण मनसा वाचा च ध्रुवग्रहे अवस्थितं सोमं होतृचमसे अवसिञ्चामि । इन्द्र एव अस्माकं प्रजाः शत्रुशून्याः तथा स्थिरमनस्काः धृतियुक्ताः च कुरुत ।

**यस्त्ते द्रप्प्स स्क्कन्दति यस्त्तेऽअꣳशुग्ग्रावच्च्युतो धिषणयोरुपस्त्थात् ।**

**अद्ध्वर्य्योर्व्वा परि वा यः पवित्रात्तन्ते जुहोमि मनसा व्वषट्कृतꣳ स्वाहा देवानामुत्त्क्रमणमसि ॥२६॥**

(शु.यजुः, अ-७, मं-२६)

**पदपाठः-** यः । ते । द्रप्प्सः । स्कन्दति । यः । ते । अꣳशुः । ग्रावच्च्युतऽइति ग्राव च्युतः । धिषणयो । उपस्त्थादित्युप स्थात् । अद्ध्वर्य्योः । व्वा । परि । व्वा । यः । पवित्त्रात् । तम् । ते । जुहोमि। मनसा । व्वषट्कृतमितिवषट् कृतम् । स्वाहा । देवानाम् । उत्त्क्रमणमित्युत् क्रमणम् । असि ॥

**सरलार्थः-** अनेन मन्त्रेण अभिषवे ग्रहणे च पतितानां सोमबिन्दुनां ग्रहणाशकयत्वात् तत् प्रत्यवाय परिहाराय घृतहोमस्य ''विप्रुड्'' संज्ञक होमः अध्वर्यु आदयो जुह्वति ।

हे सोम ! तव यो द्रप्सः भूमौ अन्यत्र वा पतति, यः तव खण्डः सकाशात् पतितः, यः अधिषवणफलकयोः उत्सङ्गात् स्कन्दति, यः अंशुः अध्वर्योः सकाशात् स्कन्दति अथवा यः अंशुः च मनसा वषट्कृतं संकल्पितं वषट्कारेण स्वाहाकारेण च जुहोमि । (अध्वर्युणा वेदार्थे तृणे गृहीतं तयोः एकं चात्वाले क्षिपेत् ।) अधूना चात्वालदैवतं प्रार्थयति हे चात्वाल ! देवाः त्वत्तः स्वर्गं गच्छन्ति इत्यर्थः ।

**प्राणाय मे व्वर्चोदा व्वर्च्चसे पवस्व व्यानाय मे व्वर्च्चोदा व्वर्च्चसे पवस्वोदानाय मे व्वर्च्चोदा व्वर्च्चसे पवस्व व्वाचे मे व्वर्च्चोदा वर्च्चसे पवस्व क्क्रतूदक्क्षाब्भ्याम्मे व्वर्च्चोदा व्वर्च्चसे पवस्व श्श्रोत्राय मे व्वर्च्चोदा व्वर्च्चसे पवस्व चक्क्षुर्ब्भ्याम्मे व्वर्च्चोदसौ व्वर्च्चसे पवेथामात्त्मने मे ॥२७॥**

**आत्मने॑ मे व्वर्च्चो॒दा व्वर्च्च॑से पवस्वौज॑से मे व्वर्च्चो॒दा व्वर्च्च॑से पवस्वायु॑षे मे व्वर्च्चो॒दा व्वर्च्च॑से पवस्व॒ व्विश्वा॑ब्भ्यो मे प्प्र॒जाब्भ्यो॑ व्वर्च्चो॒दसौ॒ व्वर्च्च॑से पवेथाम् ॥२८॥**

(शु.यजुः, अ-७, मं-२७,२८)

**पदपाठः-** प्राणाय॑ । मे॒ । व्वर्च्चोदाऽइति॑वर्च्चः दाः । व्वर्च्च॑से । प॒वस्व॒ । व्यानायेति॑वि आनाय॑ । उ॒दानायेत्यु॑त् आनाय॑ । व्वाचे । क्रतू॒दक्क्षा॑भ्याम् । श्रोत्रा॑ष्य । चक्क्षु॑र्ब्भ्या॒मिति॒चक्क्षु॑ः भ्याम् । मे॒ । व्व॒र्च्चो॒दसा॒विति॑वर्च्चः दसौ॑ । वर्च्च॑से । प॒वे॒थाम्। आत्त्मने॑ । ओज॑से । आयु॑षे । विश्श्वा॑ब्भ्यः । मे॒ । प्र॒जाब्भ्य॒ऽइति॑प्र॒ जाब्भ्य॑ः॥

**सरलार्थः-** हे उपांशो ! यः त्वं स्वभावत् एव तेजसो दाता सः त्वं मे मम प्राणाय हृदयस्थितवायोः वर्चसे प्रवर्तस्व। व्यानाय मे सर्वशरीरगतवायवे प्रवर्तस्व । हे मैत्रावरुण ! क्रतुः कामः दक्षः तस्य समृद्धिः वर्धयसाधनरूपाय वर्चसे प्रवर्तस्व । हे आश्विन ! श्रोत्रेन्द्रियाय त्वं वर्चसे प्रवर्तस्व । हे शुक्रमन्थिनौ ! मम चक्षुषोः पाटवाय तद्रूपाय वर्चसे युवां प्रवर्तेयाम् ॥२७॥

हे आग्रयणग्रह ! मम जीवस्य स्वास्थ्याय वर्चसे पवस्व । ओजः सर्वेन्द्रियपाटवं बलं वा तद्रूपाय पवस्व। ध्रुवम् आयुर्निर्दुष्टजीवनं वा तद्रूपाय पवस्व । हे यूतभृदाहवनीयौ ! मम प्रजार्थं यद् तेजः तदर्थं युवां पवेथाम् । प्राणव्यानादीनां यद तेजः तदर्थं पवस्व । यदा तं प्राणाय मे ब्रह्मवर्चसाय पवस्व ॥२८॥

**कोऽसि कत॒मो॒ऽसि॒ कस्या॑सि॒ को नामा॑सि । यस्य॑ ते॒ नामाम॑न्महि॒ यन्त्वा॒ सोमे॒नाती॑तृपाम । भूर्भ्भुव॒ः स्व॒ः सुप्प्र॒जाः प्प्र॒जाभि॑ः स्याᳬ सु॒वीरो॒ व्वी॒रैः सु॒पोष॒ः पोषै॑ः ॥२१॥**

(शु.यजुः, अ-७, मं-२९)

**पदपाठः-** कः । अ॒सि॒ । क॒तमः॒ । कस्य॑ ॥ कः । नाम॑ ॥ यस्य॑ । ते॒ । नाम॑ । अम॑न्महि । यम् । त्वा॒। सोमे॑न । अती॑तृपाम ॥

**सरलार्थः-** हे द्रोणकलश ! त्वं प्रजापतिः असि, अतिशयेनप्रजापतिः असि, प्रजापतेः असि तथा च त्वं प्रजापतिनाम असि । वयं तव नाम विजानीमः । पुनः यः द्रोणकलशरूपं त्वां वयं सोमेन तर्पितवन्तः स त्वम् अस्मान् विदितनाम्नः कुरु । हे भूर्भुवः स्वः ! प्रजाभिः अहं शोभनप्रजायुक्तः भवेयम् । वीरैः पुत्रैः सुवीरः स्याम्, धनादिपुष्टिभिः शोभनपोषः भवेयम् ।

**उ॒प॒या॒मगृ॑हीतोऽसि॒ मध॑वे त्त्वोपया॒मगृ॑हीतोऽसि॒ माध॑वाय त्त्वोपया॒मगृ॑हीतोऽसि शु॒क्क्राय॑ त्त्वोपया॒मगृ॑हीतोऽसि॒ शुच॑ये त्त्वोपया॒मगृ॑हीतोऽसि॒ नभसे त्त्वोपया॒मगृ॑हीतोऽसि नभ॒स्या॒य त्त्वोपया॒मगृ॑हीतोऽसी॒षे त्त्वो॑पया॒मगृ॑हीतोऽस्यू॒र्ज्जे त्त्वो॑पया॒मगृ॑हीतोऽसि॒ सह॑से त्त्वोपया॒मगृ॑हीतोऽसि सह॒स्या॒य त्त्वोपया॒मगृ॑हीतोऽसि॒ तप॑से त्त्वोपया॒मगृ॑हीतोऽसि तप॒स्या॒य त्त्वोपया॒मगृ॑हीतोऽस्यᳬहसस्प्प॒तये॑ त्त्वा ॥३०॥**

(शु.यजुः, अ-७, मं-३०)

**पदपाठः-** मध॑वे । त्वा॒ । माध॑वाय । शु॒क्क्राय॑ । शुच॑ये । नभ॑से । न॒भ॒स्या॒य । इ॒षे । ऊ॒र्ज्जे । सह॑से । स॒ह॒स्या॒य। तप॑से । त॒प॒स्या॒य । अ॒ᳬ॒ह॒स॒स्प्प॒तये॑ । अ॒ᳬ॒ह॒सः॒पतय॒ऽइत्य॑ᳬहसः प॒तये॑ ॥

**सरलार्थः-** हे ऋतुग्रह ! त्वमुपयामेन गृहीतः असि, मधुनाम्ने चैत्रमासाय त्वां गृहणामि । हे पात्र ! त्वमुपयामेन गृहीतः असि, अहं त्वां वैशाखाय, ज्येष्ठाय, आषाढाय, श्रावणाय, भाद्रपदाय, आश्विनाय, कार्तिकाय, मार्गशीर्षाय, पुष्याय, माघाय, फाल्गुनाय च गृह्णामि । हे ग्रह ! त्वमुपयामेन पात्रेण गृहीतोसि, तादृशं त्वां अश्विकमासाधिष्ठात्रे गृह्णामि ।

**इन्द्राग्ग्नीऽआगतꣳ सुतङ्गीर्ब्भिर्न्नभो व्वरेण्यम् । अस्य पातन्धियेषिता ।
उपयामगृहीतोसीन्द्राग्ग्निभ्यान्त्वैष ते योनिरिन्द्राग्ग्निभ्यान्त्वा ॥३१॥**

(शु.यजु:, अ-७, मं-३१)

**पदपाठः-** इन्द्राग्ग्नीऽइतीन्द्राग्ग्नी । आ । गतम् । सुतम् । गीर्ब्भिरितिगीःभिः । नभः । व्वरेण्यम् ॥ अस्य । पातम् । धिया । इषिता ॥ इन्द्राग्ग्निभ्यामितीन्द्राग्ग्नि भ्याम् । त्वा ॥

**सरलार्थः-** हे इन्द्राग्नी ! युवां सुतमभिषुतं सोमं प्रति आगच्छतम् । आदित्यमिव वरणीयं सोममागत्य युवां अस्य सोमस्य सम्बन्धि पानं पिबतम् । यजमानबुद्धया प्रार्थितौ युवां सोमं पिबतम् । हे सोम ! त्वम् उपयामेन ग्रहेण गृहीतोसि । हे ग्रह ! इन्द्राग्निभ्यामर्थे त्वां गृह्णामि । एष तब योनिः स्थानम् । इन्द्राग्निभ्यामर्थे त्वां सादयामि ।

**आघायेऽअग्ग्निमिन्धते स्तृणन्ति बर्हिरानुषक् । येषामिन्द्रो युवा सखा ।
उपयामगृहीतोस्यग्ग्नीन्द्राब्भ्यान्त्वैष ते योनिरग्ग्नीन्द्राब्भ्यान्त्वा ॥३२॥**

(शु.यजु:, अ-७, मं-३२)

**पदपाठः-** आ । घ । ये । अग्ग्निम् । इन्धते । स्तृणन्ति । बर्हिः । आनुषक् ॥ येषाम् । इन्द्रः । युवा । सखा ॥ अग्ग्नीन्द्राब्भ्याम् । त्वा ॥

**सरलार्थः-** ये यजमाना इष्टिपशुसोमचातुर्मास्यैः यजन्ति । ये आनुपूर्व्येण क्रमेण आच्छादयन्ति किंच येषां यज्वनां जरामृत्युरहितः इन्द्रः मित्रवदुपकारकः । हे सोम ! तेषां यज्ञे उपयामेन ग्रहेण त्वं स्वीकृतः असि, अग्नीन्द्रदेवार्थं त्वां गृह्णामि । हे सोम ! एष ते योनिः स्थानम्, अग्नीन्द्राभ्यामर्थे त्वां सादयामि ।

**ओमासश्चर्षणीधृतो व्विश्श्वे देवासऽआगत । दाश्श्वाꣳसो दाशुषः सुतम्।
उपयामगृहीतोसि विश्श्वेब्भ्यस्त्वा देवेब्भ्यऽएष ते योनिर्व्विश्श्वेब्भ्यस्त्वा देवेब्भ्यः ॥३३॥**

(शु.यजु:, अ-७, मं-३३)

**पदपाठः-** ओमास । चर्षणीधृतः । चर्षणिधृतऽइतिचर्षणि धृतः । व्विश्श्वेऽ । देवासः । आ । गत ॥ दाश्श्वाꣳसः । दाशुषः । सुतम् ॥

**सरलार्थः-** रक्षितारः तथा च मनुष्याणां धर्ता हे विश्वेदेवाः ! सुतमभिषुतं सोमं दत्तवतो यजमानस्य कामान् पूरयन्तः यद्वा सोमं पातुं यूयं आगच्छत । हे सोम ! त्वमुपयामेन स्वीकृतोसि । विश्वेभ्यो देवेभ्यः अर्थाय त्वां गृह्णामि । एष ते योनिः स्थानम्, विश्वेभ्यो देवेभ्यः अर्थाय त्वां सादयामि ।

**विश्श्वे देवासऽआगत शृणुता मऽइमꣳ हवम् । एदम्बर्हिर्न्निषीदत ।
उपयामगृहीतोसि व्विश्श्वेब्भ्यस्त्वा देवेब्भ्यऽएष ते योनिर्व्विश्श्वेब्भ्यस्त्वा देवेब्भ्यः ॥३४॥**

(शु.यजु:, अ-७, मं-३४)

**पदपाठः-** शृणुत । मे । इमम् । हवम् ॥ आ । इदम् । बर्हिः । नि । सीदत ॥

**सरलार्थः-** हे विश्वेदेवाः ! यूयमागत अस्मद् यज्ञं प्रतिआगच्छत । आगत्य च मम इमम् आह्वानं श्रुणुत । श्रुत्वा इदं मदीयं बर्हिष उपरि उपविशत । हे सोम ! त्वमुपयामेन स्वीकृतोसि, एष ते योनिः स्थानम् । विश्वेभ्यो देवेभ्यः अर्थाय त्वां गृह्णामि सादयामि च ।

**इन्द्र॑ मरुत्त्वऽइ॒ह पा॑हि॒ सोमँ॒म्यथा॑ शार्य्या॒तेऽअपि॑बः सु॒तस्य॑ । तव॒ प्रणी॑ती तव॑ शूर॒ शर्म्म॒न्नावि॑वासन्ति क॒वय॑÷ सु॒यज्ञाः । उ॒प॒या॒मगृ॑हीतो॒सीन्द्रा॑य त्त्वा म॒रुत्त्व॑तऽए॒ष ते॒ योनि॒रिन्द्रा॑य त्त्वा म॒रुत्त्व॑ते ॥३५॥**

(शु.यजुः, अ-७, मं-३५)

**पदपाठः-** इन्द्र॑ । म॒रुत्त्वः॑ । इ॒ह । पा॒हि॒ । सोम॑म् । यथा॑ । शा॒र्य्या॒ते । अपि॑बः । सु॒तस्य॑ ॥ तव॑ । प्रणी॑ती। प्रनी॒ततति॒प्र नीती । तव॑ । शू॒र॒ । शर्म्म॑न् । आ । वि॒वा॒स॒न्ति॒ । क॒वय॑÷ । सु॒य॒ज्ञाऽइति॑सु य॒ज्ञाः॥ इन्द्रा॑य । त्वा॒ । म॒रुत्त्व॑ते ॥

**सरलार्थः-** मरुद्भिः सहित हे इन्द्र ! इह अस्मदीये यज्ञे सोमं पिब । यथा शर्यातिः नाम कश्चिद् राजा तस्य सम्बन्धिनी यज्ञे, अभिषुतस्य सोमस्य अंशम् अपिबः तद्वद् इह पिब । हे शूर ! तव प्रणयनेन अनुज्ञया च कल्याणयज्ञाः क्रान्तदर्शनाः तव सुखनिमित्ते यज्ञगृहे त्वां परिचरन्ति । हे सोम ! त्वमुपयामेन गृहीतोसि, इन्द्राय त्वां गृह्णामि। एष ते योनिः स्थानम्, इन्द्राय त्वां सादयामि ।

**म॒रुत्त्व॑न्तँ॒व्वृष॒भँ॒व्वा॑वृधा॒नमक॑वारिन्दि॒व्व्यँ शा॒समिन्द्र॑म् । वि॒श्वा॒साह॒मव॑से नूत॑नायो॒ग्ग्रँ स॑हो॒दामि॒ह तँ हु॑वेम । उ॒प॒या॒मगृ॑हीतो॒सीन्द्रा॑य त्त्वा म॒रुत्त्व॑तऽए॒ष ते॒ योनि॒रिन्द्रा॑य त्त्वा म॒रुत्त्व॑ते ।**

**उ॒प॒या॒मगृ॑हीतोसि म॒रुता॒न्त्वौज॑से ॥३६॥**

(शु.यजुः, अ-७, मं-३६)

**पदपाठः-** म॒रुत्त्व॑न्तम् । वृ॒ष॒भम् । वा॒वृ॒धा॒नम् । व॒वृ॒धा॒नमिति॑ववृधानम् । अक॑वारिमित्यक॑व अरिम् । दि॒व्यम्। शा॒सम् । इन्द्र॑म् । वि॒श्वा॒साह॑म् । वि॒श्व॒सह॒मिति॑विश्व सह॑म् । अव॑से । नूत॑नाय । उ॒ग्रम् । स॒हो॒दामिति॑ सह॒ः दाम् । इ॒ह । तम् । हु॒वे॒म ॥ म॒रुता॑म् । त्वा॒ । ओज॑से ॥

**सरलार्थः-** मरुद्गणोपेतं जलस्य वर्षितारम्, उकुत्सितं, द्युलोकस्थम्, शासितारं, विश्वासाहम्, उद्‌गूर्णवज्रम् तथा च बलप्रदम् इन्द्रम् अस्मिन नूतने अस्मदीये यज्ञे वयं इह आह्वयामः । हे मरुत्वतीय ! देवानां बलाय त्वां गृह्णामि, त्वमुपयामेन गृहीतोसि ।

**स॒जोषा॑ऽइन्द्र॒ सग॑णो म॒रुद्भिः॒ सोम॑म्पिब व्वृत्र॒हा शू॑र वि॒द्वान् । ज॒हि शत्रूँ॒रप॒ मृधो॑ नुद॒स्वाथाभ॑यङ्कृणुहि वि॒श्वतो॑ नः । उ॒प॒या॒मगृ॑हीतो॒सीन्द्रा॑य त्त्वा म॒रुत्त्व॑तऽए॒ष ते॒ योनि॒रिन्द्रा॑य त्त्वा म॒रुत्त्व॑ते ॥३७॥**

(शु.यजुः, अ-७, मं-३७)

**पदपाठः-** स॒जोषा॒ऽइति॑स॒ जोषा॑ः । इन्द्र॒ । सग॑ण॒ऽइति॒स ग॑णः । म॒रुद्भि॒रिति॒मरुत् भिः॑÷ । सोम॑म् । पि॒ब । वृ॒त्र॒हेति॑वृत्र हा । शू॒र॒ । वि॒द्वान् ॥ ज॒हि । शत्रू॑न् । अप॑ । मृध॑÷ । नु॒द॒स्व॒ । अथ॑ । अभ॑यम् । कृ॒णु॒हि । वि॒श्वत॑÷। न॒ः ॥

**सरलार्थः-** हे शूर इन्द्र ! मरुद्भिः सह संतुष्टः तथाच मरुद्गणसहितः त्वं सोमं पिब । अनेन सोमपानेन त्वं वृत्रादीन मारय । ये हतावशिष्टाः शत्रवः तान् संग्रामात् पलायनार्थं प्रेरयस्व तथाच रिपुनाशं कृत्वा अस्माकं सर्वतः अभयं कुरु ।

**म॒रुत्त्वाँ॑ऽइन्द्र वृष॒भो रणा॑य पिबा॒ सोम॑मनुष्व॒धम्मदा॑य । आसि॑ञ्चस्व ज॒ठरे॒ मद्ध्व॑ऽऊ॒र्म्मिन्त्वँ राजा॑सि प्र॒तिप॑त्सुता॒नाम् । उ॒प॒या॒मगृ॑हीतो॒सीन्द्रा॑य त्त्वा म॒रुत्त्व॑तऽए॒ष ते॒ योनि॒रिन्द्रा॑य त्त्वा म॒रुत्त्व॑ते ॥३८॥**

(शु.यजुः, अ-७, मं-३८)

**पदपाठः-** मरुत्वान् । इन्द्र । वृषभ । रणाय । पिब । सोमम् । अनुष्वधम् । अनुस्वधमित्यनु स्वधम् । मदाय। आ । सिञ्चस्व । जठरे । मद्ध्वः । ऊर्म्मिम् । त्वम् । राजा । असि । प्रतिपदितिप्रति पत् । सुतानाम्॥

**सरलार्थः-** मरुद्भिः युक्त हे इन्द्र ! त्वं सङ्ग्रामाय तथा च ऊर्मि-कल्लोलार्थं पुरोडाशयुक्तं सोमं जठरे आसिञ्चस्व। हे इन्द्र ! त्वं प्रभृतिषु तिथिषु सोमानां ईश्वरोसि, त्वदर्थं एव सर्वासु तिथिषु सोमः अभिषूयत । एष ते उपयामः ।

**महाँ२॥ऽइन्द्रो नृवदाचर्षणिप्प्राऽउत द्विबर्हाऽअमिनः सहोभिः ।**
**अस्मद्रयग्वावृधे व्वीर्य्यायोरुः पृथुः सुकृतः कर्तृभिर्ब्भूत् । उपयामगृहीतोसि**
**महेन्द्राय त्त्वैष ते योनिर्म्महेन्द्राय त्त्वा ॥३९॥**

(शु.यजुः, अ-७, मं-३९)

**पदपाठः-** महान् । इन्द्रः । नृवदितिनृ व्वत् । आ । चर्षणिप्प्राइतिचर्षणि प्राः । उत । द्विबर्हाऽइतिद्वि बर्हाः। अमिनः । सहोभिरितिसहः भिः ॥ अस्मद्रयक् । व्वावृधे । व्ववृधऽइतिववृधे । व्वीर्य्याय । उरुः। पृथुः । सुकृतऽइतिसु कृतः । कर्त्तृभिरितिकर्त्तृ भिः । भन् । महेन्द्रायेतिमहा इन्द्राय । त्वा ॥

**सरलार्थः-** महाप्रभवः, मनुष्यवत् आहूयमान, मनुष्यान् अभीष्टकामैः पूरयिता, उपमारहितः, अप्रक्षिप्तः, अस्मद अभिमुखः तथा च वर्धमान इन्द्रः यशसा विपुल बलेन विस्तृतः यजमानैः पूजितः भवतु । हे ग्रह ! त्वमुपयामेन गृहीतोसि, महेन्द्राय त्वां गृह्णामि । एष ते योनिः स्थानम्, महेन्द्राय त्वां सादयामि ।

**महाँ२॥ऽइन्द्रो यऽओजसा पर्ज्जन्यो व्वृष्टिमाँ२॥ऽइव । स्तोमैर्व्वत्सस्य**
**व्वावृधे । उपयामगृहीतोसि महेन्द्राय त्त्वैष ते योनिर्म्महेन्द्राय त्त्वा ॥४०॥**

(शु.यजुः, अ-७, मं-४०)

**पदपाठः-** यः । ओजसा । पर्ज्जन्यः । व्वृष्टिमाँ२॥इव । व्वृष्टिमानिवेतिवृष्टिमान् इव । स्तोमैः । व्वत्सस्य। व्वावधे । व्ववृधऽइतिववृधे ॥

**सरलार्थः-** यः पर्जन्य इव तेजसा महान् इन्द्रः वसनशीलस्य यजमानस्य स्तोत्रैः वर्धते, यथा वर्षन् मेधो धारावलेन महान वर्धते । हे सोम ! त्वम् उपयामेन गृहीतोसि, महेन्द्राय त्वां गृह्णामि । एष ते योनिः स्थानम्, महेन्द्राय त्वां सादयामि ।

**उदुत्त्यञ्जातवेदसन्देवँव्वहन्ति केतवः । दृशे व्विश्श्वाय सूर्य्यꣳ स्वाहा ॥४१॥**

(शु.यजुः, अ-७, मं-४१)

**पदपाठः-** उत् । ऊँऽइत्यूँ । त्यम् । जातवेदमिमितिजात व्वेदसम् । देवम् । व्वहन्ति । केतवः॥ दृशे । व्विश्श्वाय। सूर्य्यम् । स्वाहा ॥

**सरलार्थः-** जातवेदसं विश्वस्य दर्शनाय रश्मयः तं प्रसिद्धं सूर्यदेवम् उद्वहन्ति, तस्मै सूर्याय सुहुतम् अस्तु ।

**चित्रन्देवानामुदगादनीकञ्चक्क्षुर्म्मित्रस्य व्वरुणस्याग्ग्नेः ।**

**आप्प्रा द्यावापृथिवीऽअन्तरिक्क्षꣳ सूर्य्यऽआत्त्मा जगतस्त्तस्थुषश्श्च स्वाहा ॥४२॥**

(शु.यजुः, अ-७, मं-४२)

**पदपाठः-** चित्रम् । देवानाम् । उत् । अगात् । अनीकम् । चक्क्षुः । मित्रस्य । व्वरुणस्य । अग्ग्नेः ॥ आ। अप्प्राः । द्यावापृथिवीऽइतिद्यावापृथिवी । अन्तरिक्क्षम् । सूर्य्यः । आत्त्मा । जगत । तस्थुषः । च । स्वाहा ॥

**सरलार्थः-** देवानां द्योतकः किरणपुञ्जरूपः सूर्यः उदयं प्राप्तः । सः मित्रस्य, वरुणस्य, अग्नेः च चक्षुरूपोसि । सः सूर्यः स्वतेजसा उद्गतः सन् द्यावापृथिवी चान्तरिक्षम् आपूरयति । सः जगतः जङ्गमस्य स्थावरस्य च आत्मान्तर्यामी । तस्मै सूर्याय सुहुतमस्तु ।

**अग्ग्ने नय॑ सुपथा॑ रा॒येऽअ॒स्मान्विश्श्वा॑नि देव व्व॒युना॑नि व्वि॒द्वान् ।**
**युयो॒द्ध्यु॒स्मज्जु॑हुरा॒णमेनो॒ भूयि॑ष्ट्ठान्ते॒ नम॑ऽउक्क्तिँव्विधेम॒ स्वाहा॑ ॥४३॥**

(शु.यजुः, अ-७, मं-४३)

**पदपाठः-** अग्ग्ने । नय॑ । सु॒पथेति॑सु॒ पथा॑ । रा॒ये । अ॒स्मान् । विश्श्वा॑नि । दे॒व । व्व॒युना॑नि । व्वि॒द्वान् ॥ यु॒यो॒धि । अ॒स्मत् । जु॒हु॒रा॒णम् । एन॑ः । भूयि॑ष्ट्ठाम् । ते । नम॑ऽउक्क्तिमिति॒नम॑ः उक्क्तिम् । व्वि॒धे॒म॒॥

**सरलार्थः-** हे अग्ने ! विश्वानि सर्वाणि ज्ञानानि जानानः त्वम् अस्मान् अनुष्ठातृन् धनाय यज्ञफलाय वा शोभनमार्गेण प्रापय । त्वं अस्मतः अनुष्ठातृभ्यः पापं पृथक् कुरु । वयं तव बहुलतमां हविषां वचनं करवाम, यदा नमस्कारविषयामुक्तिं संपादयाम ।

**अ॒यन्नो॑ऽअ॒ग्ग्निर्व्वरि॑वस्क्कृणोत्त्व॒यम्मृध॑ः पु॒रऽए॑तु प्प्रभि॒न्दन् ।**
**अयँव्वाजा॑ञ्जयतु॒ व्वाज॑साताव॒यꣳ शत्रू॑ञ्जयतु॒ जर्हृ॑षाण॒ꣳ स्वाहा॑ ॥४४॥**

(शु.यजुः, अ-७, मं-४४)

**पदपाठः-** अ॒यम् । न॒ꣳ । अ॒ग्ग्निꣳ । द्वरि॑वꣳ । कृ॒णो॒तु । अ॒यम् । मृध॑ः । पु॒रꣳ । ए॒तु । प्र॒भि॒न्दन्निति॑प्र भि॒न्दन्॥ अ॒यम् । व्वाजा॑न् । ज॒य॒तु । व्वाज॑साता॒विति॒वाज॑ सातौ । अ॒यम् । शत्रू॑न् । ज॒य॒तु । जर्हृ॑षाणꣳ । स्वाहा॑॥

**सरलार्थः-** अयमग्निः अस्माकं धनम् उत्पादयतु । अयमेव अग्निः संग्रामात प्रभिन्दन् विदारयन् सन् अस्माकम् अग्रतो यातु । अयमेव अग्निः वाजानां संभजने शत्रुसम्बन्धीनि अन्नानि अस्मभ्यं जयतु । ततः अयमेव अग्निः हृष्यन् शत्रून् जयतु । तुभ्यं सहुतमस्तु ।

**रू॒पेण॑ वो रू॒पम॒ब्भ्यागा॑न्तु॒थो वो॑ व्वि॒श्श्ववे॑दा॒ व्विभ॑जतु ।**
**ऋ॒तस्य॑ प॒था प्प्रेत॑ च॒न्द्रद॑क्क्षिणा॒ व्विस्व॒ꣳ पश्श्य॒ व्व्यु॒न्तरि॑क्क्षँय्यत॑स्व सद॒स्यै॑ः ॥४५॥**

(शु.यजुः, अ-७, मं-४५)

**पदपाठः-** रू॒पेण॑ । व्व॒ꣳ। रू॒पम् । अ॒भि । आ । अ॒गाम् । तु॒थꣳ । व्व॒ꣳ । विश्श्ववे॑दा॒ऽइति॑वि॒श्श्व व्वे॑दाꣳ । व्वि। भ॒ज॒तु ॥ ऋ॒तस्य॑ । प॒था । प्र । इ॒त॒ । च॒न्द्रद॑क्क्षिणा॒ऽइति॑च॒न्द्र द॑क्क्षिणाꣳ । व्वि । स्व॒रि॒ति॒स्व॒ः । यश्य॑ । व्वि । अ॒न्तरि॑क्क्षम् । यत॑स्व । स॒द॒स्यै॑ः ॥

**सरलार्थः-** अनेन मन्त्रेण दक्षिणारूपी गौः अभिमन्त्रयते । हे दक्षिणारूपा गौः ! अहं मूर्त्या युष्माकं रूपम् अभ्यागतोऽस्मि। सर्वज्ञः ब्रह्मरूपप्रजापतिः युष्मान् ऋत्विग्भ्यो यथायोग्यं विभजतु । हे चन्द्रदक्षिणा ! यूयम् एतत् यज्ञस्य मार्गेण प्रगच्छत । हे दक्षिणाः ! अहं स्वर्गं, अन्तरिक्षं पितृयानमार्गं च विलोकयामि । हे दक्षिणे ! यथा ऋत्विजो धनैः संपूर्याधिका भवेयुः तथा त्वया यतितव्यम् ।

**ब्रा॒ह्म॒णम॒द्य व्वि॑देयम्पितृ॒मन्त॑म्पैतृ॒मत्त्यमृषि॑मार्षे॒यꣳ सुधातु॑दक्क्षिणम् ।**
**अ॒स्मद्रा॑ता देव॒त्रा ग॑च्छत प्प्रदा॒तार॒माविशत ॥४६॥**

(शु.यजुः, अ-७, मं-४६)

**पदपाठः-** ब्रा॒ह्म॒म॒णम् । अ॒द्य । व्वि॒दे॒यम् । पि॒तृ॒मन्त॒मिति॑पि॒तृ मन्त॑म् । पै॒तृ॒मत्त्य॒मिति॑पै॒तृ म॒त्यम् । ऋषि॑म् । आ॒र्षे॒यम्। सु॒धा॒तु॑दक्क्षि॒ण॒मिति॑सु॒धा॒तु॑ दि॒क्क्षिणम् ॥ अ॒स्मद्रा॑ता॒ऽइत्त्य॒स्मत् रा॑ताꣳ । दे॒व॒त्रेति॑दे॒व॒ त्रा । ग॒च्छ॒त॒ । प्र॒दा॒ता॒र॒मिति॑प्र॒ दा॒तार॑म् । आ । व्वि॒श॒त॒ ॥

**सरलार्थः-** हे ब्राह्मणदेवता ! अहम् अद्य अस्मिन् दिने पैतृमत्यं, मन्त्राणां व्याख्यातारम्, आर्षेयं, सुवर्णदक्षिणम्, आग्नीध्रम ऋत्विजं प्राप्नुयाम । हे दक्षिणाः ! यूयम् अस्माभिः दताः सन् देवान प्रति गच्छत, तेषां तृप्तिं कृत्वा पुनः यज्ञफलरूपेण दातारं यजमानं वा प्राविशत ।

**अ॒ग्न्ग्रये॑ त्वा॒ मह्यँ॒व्वरु॑णो ददातु॒ सो॒मृत॒त्त्वम॑शीयायु॑र्द्दा॒त्रऽए॑धि॒ मयो॒ मह्य॑म्प्रतिग्ग्रही॒त्रे रु॒द्राय॑ त्त्वा॒ मह्यँ॒व्वरु॑णो ददातु॒ सो॒मृत॒त्त्वम॑शीय प्प्रा॒णो दा॒त्रऽए॑धि॒ व्वयो॒ मह्य॑म्प्रतिग्ग्रहीत्रे बृ॒ह॒स्पत॑ये त्त्वा॒ मह्यँ॒व्वरु॑णो ददातु॒ सो॒मतत्त्वम॑शीय॒ त्त्वग्ग्दा॒त्रऽए॑धि॒ मयो॒ मह्य॑म्प्रतिग्ग्रहीत्रे य॒माय त्त्वा॒ मह्यँ॒व्वरु॑णो ददातु॒ सो॒मृत॒त्त्वम॑शीय॒ हयो॑ दा॒त्रऽए॑धि॒ व्वयो॒ मह्य॑म्प्रतिग्ग्रही॒त्रे ॥४७॥**

(शु.यजुः, अ-७, मं-४७)

**पदपाठः-** अ॒ग्न्ग्रये॑ । त्वा॒ । मह्य॑म् । व्वरु॑णः । द॒दा॒तु॒ । सः । अ॒मृ॒त॒त्त्वमित्य॑मृ॒त त्वम् । अ॒शी॒य॒ । आयु॑ः। दा॒त्रे । ए॒धि॒ । मय॑ः । मह्य॑म् । प्र॒ति॒ग्र॒ही॒त्तऽइति॒प्प्रति ग्र॒ही॒त्ते । रु॒द्राय॑ । प्रा॒णः । व्वय॑ः । बृ॒ह॒स्पत॑ये। त्वक् । मय॑ः । य॒माय॑ । हय॑ः । व्वय॑ः ॥

**सरलार्थः-** हे हिरण्य ! पूर्वं वरुणः मह्यम् अग्नये त्वां दतम् । अनेन विधिना गृहणानः स अहम् अमृतत्वम् आरोग्यं व्याप्नुयाम् । हे हिरण्य ! त्वं दात्रे मह्यं प्रतिग्रहकर्त्रे च सुखदाता आयुर्दाता वा भव । है गौः ! त्वं दात्रे प्राणरूपा भव । मह्यं प्रतिग्रहीत्रे दुग्धदध्यादिरूपेणम् अन्नं संतति द्वारा पशुश्च भव । हे वासः ! त्वां वरुणः बृहस्पतिरूपाय मह्यं ददातु, स अहम् अमृतत्वं प्राप्नुयाम् । अनेन त्वं दात्रे त्वगिन्द्रियसुखकारी भव । प्रतिग्रहीत्रे मह्यं मयः सुखं च भव । हे अश्व ! त्वां वरुणः यमरूपाय मह्यं ददातु । सः यमरूपः अहम् अश्वं गृहणानः अमृतत्वं प्राप्नुयाम । हे अश्व ! त्वं दात्रे अश्वो भव, मह्यं प्रतिग्रहीत्रे पशुः वा संततिद्वारा दुग्धदध्यादिरूपस्य अन्नस्य च दाता भव ।

**कोऽदा॒त्कस्म्मा॑ऽअदा॒त्कामो॑दा॒त्कामा॑यादात् ।**
**कामो॑ दा॒ता काम॑ः प्प्रतिग्ग्रही॒ता कामै॒तत्ते॑ ॥४८॥**

(शु.यजुः, अ-७, मं-४८)

**पदपाठः-** कः । अ॒दा॒त् । कस्म्मै । काम॑ः । कामा॑य । काम॑ः । दा॒ता । काम॑ः । प्र॒ति॒ग्र॒ही॒तेति॒प्प्रति ग्र॒ही॒ता। काम॑ । ए॒तत् । ते॒ ॥

**सरलार्थः-** कः नरः दत्तवान् ? कस्मै नराय दत्तवान् ? इति प्रश्नद्वयस्य उत्तरमाह - कामः दत्तवान्, कामाय एव दत्तवान्, न त्वं दाता, न अहं प्रतिग्रहीता । त्वत् कामाभिमानी देवता मत् कामाभिमानिने दत्तवान् । एवं च काम एव दाता काम एव प्रतिग्रहीता न अन्यः । अतः हे काम ! दातृप्रतिग्रहीतृत्वात् एतद् तव द्रव्यम् इत्यर्थः ।

## शब्दार्थाः

**द्रप्सः** - रसैकदेशः, **स्कन्दति** - पतति, **भूर्भुवः स्वः** - अग्निवायुसूर्याः, **बर्हिष** - दर्भासन-नाम, **शूर** - इन्द्रनाम, **विश्वासाहं** - सर्वस्य अभिभवितारम्, **मरुत्वतीय** - सोमः, **वृत्रादीन्** - शत्रून्, **अप्रक्षिप्तः** - अनुपहिंसितः, **ग्रह** - सोमरसः, **जातवेदसं** - जातं वेदो ज्ञानं धनं वा यस्मात् तम्, **विभजतु** - ददातु, **चन्द्रदक्षिणा** - सुवर्णदक्षिणा (चन्द्रमिति हिरण्यनाम), **दक्षिणाः** - गाः स्वरूपी दक्षिणा, धन-गवादि दक्षिणा, **यतितव्यम्** - यत्नं कुरु, **पैतृमत्यः** - सर्वथा यस्य पितामहादयः श्रोत्रियाः सः, **आर्षेयं** - ऋषिषु विख्यातम्, **व्याप्नुयाम्** - प्राप्नुयाम्, **दात्रे** - यजमानाय, **वासः** - वस्त्ररूप देवता ।

## स्वाध्यायः

**१. निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) यस्ते द्रप्स ........................ । (स्कन्दति, प्रेश्यति, जुहोति)

(२) कोसि ........................ कस्यासि । (कीदृशोसि, कतमोसि, को नामासि)

(३) ........................ गीर्भिन्नभो वेरव्यम् । (देवम्, पुत्रम्, सुतम्)

(४) येषामिन्द्रो युवा ........................ । (सखा, बन्धु, शत्रु)

(५) सोमम्पिब ........................ शूर विद्वान । (मित्रहा, विश्वाहा, वृत्रहा)

**२. निम्नाङ्कितानां प्रश्नानाम् एकैक वाक्येनोत्तराणि लिखत ।**

(१) उपयामेन पात्रेण कस्य ग्रहणं भवति ?

(२) ''विप्रुड्'' संज्ञक होमः कः जुह्वति ?

(३) द्रोणकलशः कस्य स्वरूपम् अस्ति ?

(४) केषां कृते इन्द्रः मित्रवदुपकारकः ?

(५) इन्द्रः पुरोडाशयुक्तं सोमं जठरे किमर्थम् आसिञ्चयति ?

**३. (अ) निम्नाङ्कितमन्त्राणां भावार्थं लिखत ।**

(१) ॐ कोसि कतमोसि कस्यासि को नामासि । यस्य ते नामामन्महि यन्त्वासोमेनातीतृपाम । भूर्भुवः स्वः सुप्प्रजाः प्प्रजाभिः स्याꣳ सुवीरो व्वीरैःसुपोषः पोषैः ॥

(२) ॐ आधायेऽ अग्निमिन्धते स्तृणन्ति बर्हिरानुषक् । येषामिन्द्रो युवा सखा । उपयामगृहीतोस्यग्नीन्द्राब्भ्यान्त्वैषते योनिरग्नीन्द्राब्भ्यान्त्वा ॥

(३) ॐ विश्वे देवासऽआगत श्रृगुता मऽइमꣳ हवम् । एदम्बर्हिर्न्निषीदत । उपयामगृहीतोसि व्विश्श्वेब्भ्यस्त्वा देवेभ्यऽएषते योनिर्व्विश्श्वेब्भ्यस्त्वा देवेभ्यः ॥

(४) ॐ महाँ॥इन्द्रो यऽओजसा पर्ज्जन्यो व्वृष्टिमाँ॥इव । स्तोमैर्व्वत्सस्य व्वावृधे । उपयामगृहीतोसि महेन्द्राय त्वैषते योनिर्म्महेन्द्राय त्त्वा ॥

(५) ॐ अग्ने नय सुपथा रायेऽअस्म्मान्विश्वानि देव व्ययुनानि व्विद्वान् । युयोद्ध्यस्म्मज्जुहुराणमेनो भूयिष्ठान्ते नमद्धउक्तिर्म्मव्विदेम स्वाहा ॥

**(ब) निम्नलिखितमन्त्राणां पूर्ति विधेया ।**

(१) इन्द्राग्नीऽ ................................. ।

(२) सजोषाऽइन्द्र ................................. ।

(३) उदुत्यञ्जातवेदसम् ................................. ।

(४) चित्रन्देवानाम् ................................. ।

(५) कोदात् ................................. ।

**४. पञ्चवाक्यैः उत्तराणि लिखत ।**

(१) पाठानुसारं इन्द्रस्य स्वरूपं वर्णयत ?

(२) आत्मान्तर्यामी सूर्यः कीदृशः ?

(३) अग्नि: यजमानेभ्य: किं - किं प्रयच्छति?

(४) दक्षिणारूपां गां किं प्रार्थितम् अस्ति?

(५) यजमान: ब्राह्मणेभ्य: कीदृश: ऋत्विज: प्रापयति?

५. **शब्दरूपाणां परिचयं यच्छत ।**

(१) सोमेन

(२) नभसे

(३) गीर्भि:

(४) शर्मन

(५) इन्द्रम्

६. **क्रियापदानां परिचयं लिखत ।**

(१) कुरु

(२) पाहि

(३) स्कन्दति

(४) पवस्व

(५) तृपाम:

७. **(अ) सन्धिविच्छेदं कुरुत ।**

(१) एदम्बर्हि:

(२) नूतनायोग्रम्

(३) अस्मद्राता

(४) योनिरिन्द्राय

(५) वरुणस्याग्ने:

**(ब) सन्धिमेलनं कुरुत ।**

(१) ध्रुव: + असि

(२) नाम + अमन्महि

(३) धिया + इषिता

(४) अग्निम् + इन्धते

(५) वीर्याय + उरु:

**छात्र-प्रवृत्ति:**

- छात्रा: पदपाठानन्तरं क्रमपाठस्य च तुलनात्मकरूपं कोष्टकं निर्मापयेयु: ।

**विशिष्टज्ञानम्**

- यज्ञानां तपसां चैव, शुभानां चैव कर्मणाम् ।
  वेद एव द्विजातीनां, नि:श्रेयसकरम् परम् ॥

**द्विजातीनां कृते वेद एव**

- सर्वेषांयज्ञानाम्, तपसां शुभानां च कर्मणां
  द्विजातीनां कृते वेद: एव निश्रेयसकर: ।

●

# १२ सामवेदे-आग्नेयकाण्डम्

## प्रथमखण्डम्

**प्रस्तावना**

अग्नितत्त्वे स्रष्टृतत्त्वं,पालकतत्त्वं, विनाशकतत्त्वं चेति उपलभ्यते । सामवेदस्याग्नेयकाण्डे ऋग्वेदे च एतद् सर्वं परिलक्ष्यते । अग्नितत्त्वं यामेव ऊर्जां प्रकाशयति सा व्यक्ता भवति अव्यक्ता च भवति, स्थूला भवति सूक्ष्माचापि भवति। ऊर्जारूप अयमग्निः प्रथमतः अव्यक्तः भवति, सूक्ष्मः भवति, यथावश्यकम् अयं स्थूलः भवति, अयं मूर्तः भवति, अमूर्तः अपि भवति । भूगर्भे भवतु समुद्रे वा अयमग्निः अप्रकाशरूपेण विद्यते । किन्तु घर्षणादिहेतोः तत्र तत्र अग्नितत्त्वस्य प्रकाशः जायते । अग्निः सर्वव्यापकः भवति । अतः 'अग्निरेव सर्वा देवता' इति कथ्यते । तत्तदाश्रयभेदादप्यग्नेर्भेदो वर्ण्यते । अग्निः एकः द्वौ त्रयः चत्वारो वा याजमानायां विप्रतिपत्तौ वैदिकयज्ञेषु त्रीणि स्वरूपाणि अग्नेः दृश्यन्ते । यथा - आहवनीयाग्नि - दक्षिणाग्नि - गार्हपत्याग्निप्रभृतयः । परन्तु लौकिकयज्ञेषु अग्नेः बहुनि नामानि आयान्ति । सर्वेषां जीवानां हृदि जठराग्निरूपेण वनस्पतिषु दावाग्निरूपेण जलेषु वाडवाग्निरूपेण जीवजगतः प्रत्येकेषु द्रव्येषु स्थूलरूपेण सूक्ष्मातिसूक्ष्मरूपेण वा अग्निः विद्यमानः । तत्तु कोऽपि नाङ्गीकर्त्तुं शक्नोति । अयं पाठ्यांशः सामवेदान्तर्गतपूर्वार्चिकस्य आग्नेयकाण्डस्य प्रथमप्रपाठकस्य अस्ति । या प्रथमा दशतीति कथ्यते । एतेषु मन्त्रेषु अग्नेः महत्त्वं प्रतिपादितं वर्तते।

---

२ ३ ३ २ ३ १ २ ३ २ ३ १ २ १ २र ३ १ २
**अग्न आ याहि वीतये गृणानो हव्यदातये । नि होता सत्सि बर्हिषि ।।सा.आ.प्र.ख.मं.।।१ ।।**

ऋषि :- भरद्वाजो बार्हस्पत्यः, देवता-अग्निः, छन्दः-गायत्री, स्वरः-षडजः

**सामगानम्ः-( १-१ )** ओऽ३म् । ओग्ना३ ॥ आयाहिऽ३वो३तोयाऽ२इ । तोयाऽ२३ । गृणानोह । व्यदातोयाऽ२३ । तोयाऽ२३॥ ना३होतायाऽ२३ ॥ त्साऽ२३वा २३४ औहो वा ॥ हीऽ२३४षी ॥१॥

**सामगानम्ः-( १-२ )** अग्न आयाहिवो ॥ तया३ । गृणानोहव्यदाताऽ २३या३ ॥ निहोतासत्सिबर्हाऽ२३३षी ॥ बर्हीऽ२३षाऽ२३४ औहोवा । बर्हीऽ३षीऽ२३४५ ॥

**सामगानम्ः-( १-३ )** अग्न आयाहि । वाऽ५३तया३ ॥ गृणानोहव्यदाऽ१ताऽ३ये॥ निहोताऽ२३४सा ॥ त्साऽ२३३वाऽ३। हाऽ२३४३षाऽ६हो३ ॥

**सरलार्थः-** हे अग्ने ! त्वं चरुपुरोडाशादीनां हविषां भक्षणाय अस्माकं यज्ञं प्रत्यागच्छ । कीदृशः सन् ? अस्माभिः स्तूयमानः । पुनश्च किमर्थम् ? देवेभ्यो हविः प्रदानाय यतोहि देवानां कृते हविषां वहनं देवतानाञ्चावाहनम् अग्नेः कार्यं वर्तते । अतः आगत्य देवानामावाहनाय आस्तीर्णे पवित्रे निषीद।

१ २ ३ २ ३ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ १ २
**त्वमग्ने यज्ञानां होता विश्वेषां हितः । देवेभिर्मानुषे जने ।।सा.आ.प्र.ख.मं.।।२ ।।**

ऋषिः- भरद्वाजो बार्हस्पत्यः, देवता-अग्निः, छन्दः-गायत्री, स्वरः-षडजः

**सामगानम्ः-( २-१ )** त्वमग्ने यज्ञानाम् । त्वमग्ना३ । यज्ञानाꣳहोता । विश्वेषाꣳहाऽ२३ ३ताः ॥ देवाभाऽ२३३मो ॥ नुषेजना । औऽ३होवा । होऽड५३॥ डा॥

**सरलार्थः-** हे अग्ने ! त्वं विश्वेषां यज्ञनाम्, अग्निष्टोम-अत्यग्निष्टोमादीनां यज्ञानां यष्टव्यानां विश्वेषां देवानाम्

आह्वाता । एवं भूतस्त्वं मानुषे मनोरपत्यभूते देवैः देवनशीलैः ऋत्विग्भिः निहितः गार्हपत्य–दक्षिणाग्नि–आहवनीयादिरूपे संस्थापितो भवसि ।

३२ ३१ २ ३ १ २ ३१ २ ३२ ३ १ २ ३१२
**अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् । अस्य यज्ञस्य सुक्रतुम् ।।सा.आ.प्र.ख.मं.।।३।।**

ऋषिः– मेधातिथिः काण्वः, देवता–अग्निः, छन्दः–गायत्री, स्वरः–षडजः

**सामगानम्ः–( ३–१ )** अग्निन्दूताम् ॥ वृणीमहाई । होताराऽ२३०वी । श्ववेदसाम् ॥ अस्ययाऽ२३ज्ञा । आ । औऽ३होवा॥ स्यासुक्रतुम् । ईडाऽ२३भाऽ३४३ । औऽ२३४४३ ॥ डा ॥

**सरलार्थः–** 'अग्निर्वै देवानां दूतम्' इति श्रुतिवचनम् । देवानां दूतकार्ये विनिर्युक्तम् अग्निदेवं वृणीमहे स्तुतिभिर्हविभिः सम्भजामहे । किंभूतमग्निम् ? होतारं साधुदेवानाह्वातारम् विश्ववेदसं विश्वानि वेत्तोति विश्ववेदाः तम् अथवा वेद इति धननाम, विश्वं सर्वं वेदो धनं यस्य, तम् अस्य प्रवर्तमानस्य यज्ञस्य सुक्रतुं निष्पादकत्वेन स्तुयामानम् अग्निदेवं भजामहे ।

३ २ ३ १ २ ३ १ २ ३ १ २ १ २ ३ १ २र
**अग्निर्वृत्राणि जङ्घनद् द्रविणस्युर्विपन्यया । समिद्धः शुक्र आहुतः ।।सा.आ.प्र.ख.मं.।।४।।**

ऋषिः– भरद्वाजो बार्हस्पत्यः, देवता–अग्निः, छन्दः–गायत्री, स्वरः–षडजः

**सामगानम्ः–( ४–१ )** अग्निर्वगा ॥ णाऽ२इजाऽ234औहोवा । घाऽ२३४नात् । द्रविणस्युर्विपन्ययाऽ२ ॥ औ३समिद्धाऽ२३२शू॥ क्रायाहुतः । ईडाऽ२३भाऽ३८३ ॥ औऽ२३४५ ३ ॥ डा॥

**सामगानम्ः–( ४–२ )** अग्निरौहोवा हो३ । वृत्राणी ॥ जाङ्घोऽ३नात् । औहोऽ३वाऽ३ । द्रविणेऽ२३४स्यूः । ओइवोइपन्ययाऽर॥ समायेऽ३ ॥ घाऽ२२शूऽ२३४ औहोवा ॥

**सामगानम्ः–( ४–३ )** ओग्नीः । वृत्राणिहङ्घानात् । औहौहोऽ२३४वा ॥ द्रविणस्युर्निवन्यया औहौहोऽ२३४वा ॥ समिद्धश्शुक्रया । औहौहोऽ२३४वा ॥ होऽडदंतोऽ६हाइ ॥

**सरलार्थः–** हविर्लक्षणरूपं धनमिच्छन्नग्निः अस्माभिः क्रियमाणया स्तुत्या स्तूयमानः सन् वृत्राणि बलेन जगतामावरकाणि रक्षप्रभृतीनि तमांसि वा जघनत् भृशं हन्तु । कीदृशोऽग्निः ? समिद्धः समिदादिभिर्हविर्भिः सम्यग्दीपितः शुक्रः दीप्यमानः अग्निः आहुतः ।

५२ ३ १ २ ३ २ ३१२ ३२ २ ५ २३ १ २र
**प्रेष्ठं वो अतिथिं स्तुषे मित्रमिव प्रियम् । अग्ने रथं न वेद्यम् ।।सा.आ.प्र.ख.मं.।।५।।**

ऋषिः– उशनाः, देवता–अग्निः, छन्दः–गायत्री, स्वरः–षडजः

**सामगानम्ः–( ५–१ )** प्रेष्ठवाः ॥ अताऽ२३इथीम् । स्तौषेमित्रम् । इनप्राऽ२३याम् । अग्नाइराऽ३थाऽ३म् ॥ नावाऽ२३हाऽ३४३इ॥ दाऽ२३४याऽ६हाड् ॥

**सामगानम्ः–( ५–२ )** प्रेष्ठवेः । ओहाड् ॥ अताऽ२३इथीम् । स्तुबाइमित्राऽ६हाइ ॥ इवाऽ२३४याम् । औहोऽ२इ । अग्नेराथाऽ२३म् । नाऽ२३ऽवेऽ३ । दाऽ३४५योऽ६हाइ ॥

**सामगानम्ः–( ५–३ )** प्रेष्ठवोहाऊ ॥ अतिथाइम् । स्तुषेमित्रामिवप्राऽ२३याम् ॥ अग्नायेऽ३ ॥ राऽ२थाऽ२३४औहोवा ॥ नवेदियाऽ२३४५म् ॥

**सरलार्थः-** हे अग्निः ! त्वां स्तौमि । कीदृशमग्निम् ? प्रेष्ठं स्तोतृणामस्माकं धनदानिन प्रियतमम् । अतिथिं सर्वैरतिथिवत् पूज्यम् । मित्रमिव सखायमिव प्रियं स्तोतुः प्रीणनकरम् । रथं न रथमिव (न अत्र उपमार्थे) वेद्यं वेदो धनं धनहितं लाभहेतुम् अर्थात् यथा रथेन धनं लभते तद्वत् स्तोतारोऽनेन धनं लभन्ते, तादृशधनलाभकारणम् ।

**त्वं नो अग्ने महोभिः पाहि विश्वस्या अरातेः । उत द्विषो मर्त्यस्य ।।सा.आ.प्र.ख.मं.।।६ ।।**

ऋषिः- सुदीतिपुरुमीढावाङ्गिरसौ तयोर्वान्यतरः, देवता-अग्निः, छन्दः-गायत्री, स्वरः-षडजः

**सामगानम्ः-( ६-१ )** त्वन्नोया ॥ ग्नेमहोभिः । पाहोइवोऽ३श्वा । स्याअरातेः ॥ उताद्वाऽ२इवाऽरः ॥ मर्त्यस्य । इडाऽ२३भाऽ३४३ । औऽ२३४५ इ ॥ डा ॥

**सामगानम्ः-( ६-२ )** त्वांत्वन्नोअग्नेम । होऽ६भाइः । पाहिविश्वाऔऽ३हो । स्याऔऽ३हो । आरातेः । उताद्वाऽ२षाऽ२ः। मर्ताऽ२याऽ२३४औहोवा ॥ स्याऽ२३४५ ॥

**सरलार्थः-** हे अग्ने ! त्वं न अस्मान् महोभिः पूजाभिः महद्भिर्धनैर्वा पाहि रक्ष । कस्यः पाहि ? विश्वस्याः बहुविधात् अरातेः अदातुः सकाशात् अदानाद्वा पाहि । अर्थात् त्वमेव महद्धनं दत्त्वा अदातेभ्यः द्वेषकर्तुकेभ्यः मानवेभ्यः रक्षां कुरु अस्मभ्यं बलं दत्त्वेति भावः ।

**एह्यूषु ब्रवाणि तेऽग्न इत्थेतरा गिरः । एभिर्वर्धास इन्दुभिः ।।सा.आ.प्र.ख.मं.।।७।।**

ऋषिः- भरद्वाजो बार्हस्पत्यः, देवता-अग्निः, छन्दः-गायत्री, स्वरः-षडजः

**सामगानम्ः-( ७-१ )** एहूषूऽ३ब्रवाणाऽ६इताइ । अग्नइत्थैतरागाऽ२इशः । एभाऽ२इर्वर्द्धा ॥ सयाऽ२३हाऽ३४३इ । दूऽ२३४भोऽ६हाइ ॥

**सामगानम्ः-( ७-१ )** एहूषूब्रवौहोणाइताइ ॥ अग्नइत्थेतराऽ२गीऽ३शः । एभिर्वाऽ२३४र्द्धा ॥ सयाऽ२३हाऽ३४३इ । दऽ२३४भौऽ६हाइ ॥

**सरलार्थः-** हे अग्ने ! एहि आगच्छ ते तुभ्यं त्वदर्थं गिरः स्तुतीः इत्था । अनेन प्रकारेण सुष्ठु ब्रवाणि इत्याशास्यते। ताः स्तुतीः श्रृणु इति शेषः । उ इत्येताः इतराः असुरैः कृताः स्तुतीः श्रृणु इति शेषः । अपि च आगतस्त्वं एभिः एतैः इन्दुभिः सोमैः वर्द्धास वर्द्धस्व ।

**आ ते वत्सो मनो यमत्परमाच्चित्सधस्थात् । अग्ने त्वां कामये गिरा ।।सा.आ.प्र.ख.मं.।।८।।**

ऋषिः- वत्सः काण्वः, देवता-अग्निः, छन्दः-गायत्री, स्वरः-षडजः

**सामगानम्ः-( ८-१ )** आतेवत्साः ॥ मनोयमत् ॥ परमात । चित्सधाऽ२३स्थात् ॥ अग्नइत्वाऽ३०काऽ३ ॥ मयोवा । गाऽ५इरोऽ६हाइ ॥

**सामगानम्ः-( ८-२ )** आतेवन्सोमनोयमत् । ऐयाहाइ ॥ परमात्त्वित्सघस्थादयाऽ२३होइया ॥ अग्नेत्वांकामयऐयाऽ२३होइया॥ गिरा । इडाऽ२३भाऽ३४३ । औऽ२३४५इ । डा ॥

**सरलार्थः-** वत्सेः एतन्नामा ऋषिः ते तव मनः परमाच्चित् उत्कृष्टादपि सदस्थानात् सहस्थानात् द्युलोकात् वा आ गमत् आ गमयति । केन साधनेन ? गिरा स्तुत्या । हे अग्ने ! त्वां कामये, त्वदीयं मनो मय्येव नियच्छामीति प्रार्थये ।

१ २ ३ १ २ ३ १ २र ३ १२ ३ १ २र ३ १ २
**त्वामग्ने पुष्करादध्यथर्वा निरमन्थत । मूर्ध्नो विश्वस्य वाघतः ।।सा.आ.प्र.ख.मं.।।९ ।।**

ऋषिः- भरद्वाजो बार्हस्पत्यः, देवता-अग्निः, छन्दः-गायत्री, स्वरः-षडजः

**सामगानम्ः-( ९-१ )** त्वामग्नेपूष्का ऽ६रादधी ॥ आथर्वा । नाइः । अमा ऽ २न्थाऽ २३४ता ॥ मूऽ २३४द्ध्र्नो ॥ वाऽ २३४इषा॥ स्यवोवा । घोऽतोऽ६हाइ ॥

**सरलार्थः-** हे अग्ने ! अथर्वा एतत् संज्ञ ऋषिः त्वां पुष्करादधि पुष्करे पुष्करपर्णे निरमन्थत अरण्योः सकाशादमयत्। कीदृशात् पुष्करात् ? मूध्नः मूर्द्धवद्धारकात् । विश्वस्य सर्वस्य जगतः वाघतः वाहकात्। पूष्करपर्णे हि प्रजापतिः भूमिमप्रथयत् तत् पुष्करपर्णेऽप्रथयत् इति श्रुतेः । भूमिश्च सर्वजगत आधारभूतेति पुष्करपर्णस्य सर्वजगद्धारकत्वम् । तैत्तिरीयानुसारम् अत्र पुष्करशब्देन पुष्करपर्णमित्यभिधीयते।

२३ १ २ ३१ २ ३ १ २ ३१२ ३२ ३१ २र ३२
**अग्ने विवस्वदा भरास्मभ्यमूतये महे । देवो ह्यसि नो दृसे ।।सा.आ.प्र.ख.मं.।।१० ।।**

ऋषिः- वामदेवः, देवता-अग्निः, छन्दः-गायत्री, स्वरः-षडजः

**सामगानम्ः-( १०-१ )** अग्नेविवस्वदाभरो । वाहाइ ॥ अस्मभ्यमूतऽ३याइमहे । ओं । वाऽ३हाइ ॥ दाइवोऽ२हियाऽ२। ओं । वाऽ३हाइ । ओं । वाऽ३हाऽ३इ ॥ सोऽ२इनाऽ२३४औहोवा । दृशेऽ२ ॥

**सरलार्थः-** हे अग्ने ! त्वम् अस्मभ्यम् महे ऊतये महते रक्षणाय, विवस्वत् स्वर्गादिलोकेषु विशेषेण निवासस्य हेतुमतमिदं कर्म आभर सम्पादय हि यस्मात् त्वं नः अस्माकं दृशे दर्शनार्थं देवः द्योतमानः असि इन्द्रादयो नास्मतभिर्दृश्यन्ते, त्वं गार्हपत्यादिदेशेऽतिद्योतमानः प्रत्येक्षेण दृश्यते तस्मात्वां विशेषेण प्रार्थयामहे ।

## शब्दार्थाः

**वीतये** - हविषां भक्षणाय, **गृणानः** - अस्माभिः स्तूयमानः, **होता** - देवानामाह्वाता, **बर्हिषि** - आस्तिर्णे दर्भे पवित्रे वा, **निषत्सि** - निषीद, **वृणीमहे** - भजामहे, **होतारम्** - साधुदेवानामाह्वातारम्, **क्रतु** - प्रज्ञा यज्ञो वा, **वेद** - धनं ज्ञानं वा, **द्रविणम्** - धनम्, **वृत्राणि** - बलेन जगतामावरकाणि रक्षप्रभृतीनि तमांसि वा, **जघनत्** - भृशं हन्तु, **समिद्धः** - समिदादिभिर्हिविर्भिः सम्यग्दीपितः, **शुक्रः** - दीयमानः, **वर्द्धास** - वर्द्धस्व, **गिरः** - स्तुतीः, **इन्दुभिः** - सोमैः, **सदस्थानात्** - सहस्थानात्, **पुष्करादधि** - पुष्करपर्णे, **निरमन्थत** - अरण्योः सकाशादजमयत्, **वाघतः** - वाहकात्, **महे ऊतये** - महते रक्षणाय, **दृशे** - दर्शनार्थम् ।

## स्वाध्यायः

**१. निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) ........................ सर्वा देवता इति कथ्यते । (सूर्यरेव, अग्निरेव, विष्णुरेव)

(२) त्वमग्ने यज्ञानां ........................ विश्वेषां हितः । (होता, उद्गाता, ब्रह्मा)

(३) देवानां दूतकार्ये विनिर्युक्तम् ........................ वृणीमहे । (वायुदेवम्, इन्द्रदेवम्, अग्निदेवम्)

(४) ........................ विश्वस्य वाघतः । (देवः, धनम्, मूर्ध्नो)

(५) एतैः ........................ वर्द्धस्व । (इन्दुभिः, देविभिः, गुणैः)

**२. निम्नाङ्कितानां प्रश्नानाम् एकैक वाक्येनोत्तराणि लिखत ।**

(१) वैदिकयज्ञेषु कति स्वरूपाणि अग्ने: दृश्यन्ते?

(२) क: देवानां होता?

(३) पुष्करशब्देन किमभिधीयते?

(४) अग्नि: केन द्रव्येण प्रदिप्तो भवति?

(५) 'विश्ववेदसम्' इति शब्दस्य कोऽर्थ:?

**३. (अ) निम्नाङ्कितमन्त्राणां भावार्थं लिखत ।**

(१) त्वामग्ने पुष्करादध्यथर्वा निरमन्थत । मूर्ध्नो विश्वस्य वाघत: ॥

(२) त्वमग्ने यज्ञानां होता विश्वेषां हित: । देवेभिर्मानुषे जने ॥

(३) प्रेष्ठं वो अतिथिं स्तुषे मित्रमिव प्रियम् । अग्ने रथं ने वेद्यम् ॥

**(ब) निम्नलिखितमन्त्राणां पूर्ति विधेया ।**

(१) अग्न आ याहि .................................. सत्सि बर्हिषि ॥

(२) अग्निर्वृत्राणि जङ्घनद् .................................. शुक्र आहुत: ॥

(३) त्वं नो अग्ने महोभि: .................................. द्विषो मर्त्यस्य ॥

**४. पञ्चवाक्यै: उत्तराणि लिखत ।**

(१) अग्ने: कार्यं किं वर्तते ?

(२) अग्नेरुत्पत्ति: कथं भवति ?

(३) अग्निदेव: अस्माकं रक्षणं कथं करोति ?

(४) पुष्करपर्णस्य किमस्ति महत्त्वम् ?

(५) अग्निदेव: यजमानाय किं किं प्रयच्छति ?

**५. शब्दरूपाणां परिचयं यच्छत ।**

(१) यज्ञानाम्

(२) गिर:

(३) सोमै:

(४) विश्वेषाम्

(५) वृत्राणि

**६. क्रियापदानां परिचयं लिखत ।**

(१) पाहि

(२) हन्तु

(३) ब्रवाणि

(४) अभिधीयते

(५) वृणीमहे

७. **(अ) सन्धिविच्छेदं कुरुत ।**

(१) जगद्धारकत्वम्

(२) एतन्नामा

(३) द्रविणस्युर्विपन्यया

(४) उत्कृष्टादपि

(५) महद्भिर्धनैर्वा

**(ब) सन्धिमेलनं कुरुत ।**

(१) मित्रम् + इव

(२) पुष्कतात् + अधि

(३) च + अपि

(४) भूतः + त्वम्

(५) अग्निः + वृत्राणि

**छात्र-प्रवृत्तिः**

- सामवेदोक्तस्वरज्ञानविषये विशेषाध्ययनं करणीयम् ॥

**विशिष्टज्ञानम्**

उदितेऽनुदिते चैव समयाद्युषिते तथा ।
सर्वथा वर्त्तते यज्ञ इतीयं वैदिकी श्रुतिः ॥ मनुस्मृति-२/१५

सायंकाले यदा सूर्यरश्मयो भूभागं परित्यज्य वृक्षाग्रं एव प्रकाशमाना दृश्यन्ते तदा सायं होमाः, प्रातः काले प्राच्यां दिशि यदा रश्मय आविर्भूता भवन्ति तदा प्रातर्होमाश्च सदा सर्वथा अनुष्ठेयाः ।

●

# १३ | अथर्ववेदे रुद्राभिषेक मन्त्राः १

**प्रस्तावना**

वेदानां ज्ञानं विश्वसंस्कृतेः आधारशिला वर्तते । वेदाः न केवलं मानवानां कर्तव्यनिर्देशं कुर्वन्ति । वेदेषु चतुर्षु अथर्ववेदस्य स्थानं महत्वपूर्णं विद्यते । वेदोऽयं वैदिकवाङ्मयशिरोभूषणम् । संस्कृतेः सभ्यतायाश्च विशदं विवेचनम् अथर्ववेदे प्राप्यते ।

**उक्तञ्च सायणाचार्येण**

**व्याख्याय वेदत्रितयमामुष्मिकफलप्रदम् ।**

**ऐहिकामुष्मिकफलं चतुर्थं व्याचिकीर्षति ॥**

पाठोऽयम् अथर्ववेदसंहितायाम् एकादशकाण्डस्य द्वितीयसूक्ते समायाति ।

एतेषां यथाक्रमम् १/७/९-१०/१५ अनुष्टुप् । २ महाबृहती । ३ आर्षी । ४ पुरोकृति त्रिपादाविराट् । ५ पञ्चपदा विराड़जगतीगर्भा शक्वरी । ६ भूरिक् । ८/१९/१३ । विराड़ गायत्री एवं १४ भुरिग्गायत्री इति छन्दांसि । अथर्वा ऋषिः एवं भवशर्वरुद्राः देवताः सन्ति ।

---

**अ॒स्त्रा नील॑शिखण्डेन स॒हस्त्रा॒क्षेण॑ वा॒जिना ।**

**रु॒द्रेणा॑र्धकघा॒तिना॒ ते॒न मा सम॑रामहि ॥७॥**

**पदपाठः-** अ॒स्त्रा॑ । नील॑ऽशिखऽडेन । स॒ह॒स्र॒ऽअ॒क्षेण॑ । वा॒जिना॑ ।

रु॒द्रेण॑ । अ॒र्ध॒क॒ऽघा॒तिना॑ । तेन॑ । मा । सम् । अ॒रा॒म॒हि॒ ॥७॥

**सरलार्थः-** यः अस्त्रधृतः, यस्य नीलवर्णकेशाः, सहस्रसङ्ख्याकानि नेत्राणि सन्ति । यः अश्वारूढः अस्ति । यः क्षणमात्रेण अर्धसेनायाः नाशं करोति । तस्मात् रुद्रात् वयं कदापि प्रहारिताः न भवेम ।

**स नो॑ भ॒वः परि॑ वृणक्तु वि॒श्वत॒ आप॑ इवा॒ग्निः परि॑ वृणक्तु नो भ॒वः।**

**मा नो॒भि मां॑स्त॒ नमो॑ अ॒स्त्वस्मै ॥८॥**

**पदपाठः-** स । न॒ः। भ॒वः । परि॑ । वृ॒ण॒क्तु॒ । वि॒श्वत॑ः । आप॑ःऽइव । अ॒ग्निः । परि॑ । वृ॒ण॒क्तु॒ । न॒ । भ॒वः।

मा । न॒ः । अ॒भि । मां॒स्त॒ । नम॑ः । अ॒स्तु॒ । अ॒स्मै॒ ॥८॥

**सरलार्थः-** यस्य भवनाम्नः देवस्य महिमा स्पष्टः सः रुद्रः यथा अग्निः जलं त्यजति तथैव अस्मान् परित्यजतु उपद्रवेभ्यः रक्षतु, वयं भवाय नमस्कुर्मः सः अस्मान् दुःखं न यच्छेत् ।

**च॒तुर्नमो॑ अ॒ष्ट॒कृत्वो॑ भ॒वाय॒ दश॒ कृत्व॑ःपशुपते॒ नम॑स्ते ।**

**तवे॒मे पञ्च॑ प॒शवो॒ विभ॑क्ता॒ गावो॒ अश्वा॒ः पुरु॑षा अ॒जाव॑यः ॥९॥**

**पदपाठः-** च॒तु । नमः । अ॒ष्ट॒ऽकृत्व॑ः । भ॒वाय॑ । दश॑ । कृत्व॑ः । प॒शु॒ऽप॒ते॒ । नमः । ते॒ ।

तव॑ । इ॒मे । पञ्च॑ । प॒शव॑ः । विऽभक्ताः । गाव॑ः । अश्वा॑ः । पुरु॑षाः । अ॒ज॒ऽअ॒वय॑ः ॥९॥

**सरलार्थः-** चतुर्वारं शर्वाय नमस्कुर्मः, अष्टवारं भवाय नमस्कुर्मः । दशवारं पशुपतये नमस्कारः । किमर्थं नमामः? त्वं विभिन्नपशूनां मनुष्याणां जीवनानाञ्च रक्षणं कुरु ।

**तव चतस्त्र प्रदिशस्तव द्यौस्तवं पृथिवी तवेदमुग्रोवं१न्तरिक्षम् ।**

**तवेदं सर्वमात्मन्वद् यत् प्राणत् पृथिवीमनु ॥१०॥**

**पदपाठः-** तव । चतस्त्रः । प्रऽदिशः । तव । द्योः । तव । पृथिवी । तव । इदम् । उग्र । उरु । अन्तरिक्षम्। तव । इदम् । सर्वम् । आत्मन्ऽवत् । यत् । प्राणत् । पृथिवीम् । अनु ।

**सरलार्थः-** हे रुद्र ! त्वं बलवान असि । त्वमेव दिगीशः, द्यावापृथिव्यन्तरिक्षाणि च सर्वाः दिशः तव वपुः अस्ति। सम्पूर्ण संसारः अपि तवानुज्ञा एव प्रचलति अतः सर्वानुग्रहकर्ता त्वमेव भवते नमस्कारः भवसि ।

**ऊरुःकोशो वसुधानस्तवायं यस्मिन्निमा विश्वाभुर्वनान्यन्तः ।**

**स नो मृड पशुपते नमस्ते परः क्रोष्टारो अभिभाः श्वानः परो**
**यन्त्वघरुदो विकेश्यः ॥११॥**

**पदपाठः-** उरुः । कोशः । वसुऽधानः । तव । अयम् । यस्मिन् । इमा । विश्वा । भुवनानि । अन्तः । सः । नः । मृड । पशुऽपते । नमः । ते । परः । क्रोष्टारः । अभिऽभाः । श्वानः । परः । यन्तु । अघऽरुदः । विऽकेश्यः ॥११॥

**सरलार्थः-** हे पशुपते ! निवासकारणरूपकर्म यत्र क्रियते, सः अण्डकटाहात्मककोषः तवास्ति, अयं कोषः सर्वभूतानां निवासस्थानं वर्तते । त्वत्प्रसादात् मांसभक्षकाः पशवः दूरं गच्छेयुः एवं रोदनं कुर्वत्यः राक्षसाः अन्यत्र व्रजेयुः । त्वम् अस्मान् सुखं यच्छ, वयं तुभ्यं नमस्कुर्मः ।

**धनुर्बिभर्षिहरितं हिरण्ययं सहस्त्रघ्नि शतवधं शिखण्डिन् रुद्रस्येषुश्चरति**
**देवहेतिस्तस्यै नमो यतमस्यां दिशी३तः ॥१२॥**

**पदपाठः-** धनुः । बिभर्षि । हरितम् । हिरण्ययम् । सहस्त्रऽघ्नि । शतऽवधम् । शिखण्डिन् । रुद्रस्य । इषुः । चरति । देवऽहेतिः । तस्यै । नमः । यतमस्याम् । दिशि । इतः ॥१२॥

**सरलार्थः-** हे रुद्र ! प्रलयकाले त्वं विश्वसंहरणार्थं सुवर्णनिर्मितं धनुष्यं धारयसि । तेन धनुषा एकयत्नेन सहस्रसंख्याकान् हन्ति । तव इदं धनुः निर्बाधं सर्वत्र गच्छति । मयूरपिच्छादिनिर्मिताः तव धनुर्भ्यः नमोस्तु ।

**यो३भियातो निलयते त्वां रुद्र निचिकीर्षति ।**

**पश्चादनुप्रयुङ्क्षे तं विद्धस्य पदनीरिव ॥१३॥**

**पदपाठः-** यः । अभिऽयातः । निऽलयते । त्वाम् । रुद्र । निऽचिकीर्पति । पश्चात् । अनुऽप्रयुङ्क्षे । तम् । विद्धस्य । पदनीःऽइव ॥१३॥

**सरलार्थः-** यथा पलायनं कृतवतः शस्त्रहस्तस्य पदचिह्नैः तमन्वेष्टुं शक्नुमः तथैव हे रुद्रः त्वम् अपराधिनम् असज्जनं दण्डयितुं समर्थोऽसि ।

**भवारुद्रौ सयुजा संविदानावुभावुग्रौ चरतो वीर्याऽय ।**

**तभ्यां नमो यतमस्यां दिशी३तः ॥१४॥**

**पदपाठः-** भवारुद्रौ । सऽयुजा । सम्ऽविदानौ । उभौ । उग्रौ । चरतः । वीर्याऽय । ताभ्याम् । नमः । यतमस्याम् । दिशि । इतः ॥१४॥

**सरलार्थः-** भवरुद्रनामकौ द्वौ देवौ मित्रे स्तः । उभौ स्वपराक्रमं प्रकटयन्तौ विचरतः । तौ यस्यां दिशायां भवेताम् वयं तौ नमामः ।

**नम॑स्तेस्त्वाय॒ते नमो॑ अ॒स्तु परा॒य॒ते ।**

**नम॑स्ते रुद्र॒ तिष्ठ॑त॒ आसी॑नायो॒त ते॒ नम॑: ॥१५॥**

**पदपाठः-** नम॑: । ते॒ । अ॒स्तु॒ । आ॒ऽय॒ते । नम॑: । अ॒स्तु॒ । प॒रा॒ऽय॒ते ।

नम॑: । ते॒ । रु॒द्र॒ । तिष्ठ॑ते । आ॒सी॑नाय । उ॒त । ते॒ । नम॑: ॥१५॥

**सरलार्थः-** अस्मान् प्रति यः रुद्रः आगच्छति, यः अस्मत् दूरं प्रतिगच्छति, यो रुद्रः अस्माकं पुरतः विराजते तथा च यः रुद्रः अस्माकं सम्मुखं स्थितः तस्मै रुद्राय वयं नमस्कुर्मः ।

**नम॑: सा॒यं नम॑: प्रा॒तर्नमो॒ रात्र्या॒ नमो॒ दिवा॑ ।**

**भ॒वाय॑ च श॒र्वाय॑ चो॒भाभ्या॑मकरं॒ नम॑: ॥१६॥**

**पदपाठः-** नम॑: । सा॒यम् । नम॑:। प्रा॒तः । नम॑: । रात्र्या॑ । नम॑: । दिवा॑ ।

भ॒वाय॑ । च॒ । श॒र्वाय॑ । च॒ । उ॒भाभ्या॑म् । अ॒क॒र॒म् । नमः ॥१६॥

**सरलार्थः-** हे रुद्र ! सायं काले तुभ्यं नमोस्तु । प्रातः काले च तुभ्यं नमोस्तु । रात्रिसमये तुभ्यं नमोस्तु । दिवससमयेपि तुभ्यं नमोस्तु । भवशर्वाभ्यां रुद्ररूपदेवाभ्यां च वयं नमस्कुर्मः ।

**स॒ह॒स्रा॒क्षम॑तिप॒श्यं पु॒रस्ता॑द् रु॒द्रमस्य॑न्तं बहु॒धा वि॑प॒श्चित॑म् ।**

**मोपा॑राम जि॒ह्वयेय॑मानम् ॥१७॥**

**पदपाठः-** स॒ह॒स्र॒ऽअ॒क्षम् । अ॒ति॒ऽप॒श्यम् । पु॒रस्ता॑त् । रु॒द्रम् । अ॒स्य॑न्तम् । ब॒हु॒ऽधा । वि॒प॒ःऽचित॑म् ।

मा । उप । अ॒रा॒म॒ । जि॒ह्वया॑ । ईय॑मानम् ॥१७॥

**सरलार्थः-** यस्य सहस्रनेत्राणि सन्ति । यः सहस्रबाणान् मोचयति । यः महान् मेधावी अस्ति तथाच यः समस्तसंसारे व्याप्तः अस्ति । तस्य उग्रस्वाभावात्मकरुद्रस्य समीपं वयं न गच्छामः अर्थात् दूरात् एव वयं तस्मै नमस्कुर्मः।

**श्या॒वव॑श्वं कृ॒ष्णमसि॑तं मृ॒णन्तं॑ भी॒मं रथं॑ के॒शिन॑: पा॒दय॑न्तम् ।**

**पूर्वे॒ प्रती॑मो॒ नमो॑ अ॒स्त्वस्मै ॥१८॥**

**पदपाठः-** श्या॒व॒ऽअ॒श्वम् । कृ॒ष्णम् । अ॒सि॑तम् । मृ॒णन्त॑म् । भी॒मम् । रथ॑म् । के॒शिन॑: । पा॒दय॑न्तम् ।

पूर्वे॑ । प्रति॑ । इ॒म॒: । नम॑: । अ॒स्तु॒ । अ॒स्मै॒ ॥१८॥

**सरलार्थः-** कपिशवर्णयुक्ताः अश्वाः, कृष्णपरिच्छद मर्दनकर्त्रे, सम्पूर्ण जगत यस्मात् बिभेति स भीम स्वरूपमहादेवः येन केशिनामक असुरस्य रथः भूमौ निपातितः तथा च येन समस्तसंसारे भयम् उत्पादितम् तं भीमस्वरूपरुद्रम् अस्माकं रक्षकं मत्वा वयं प्रणमामः ।

**मा नोभि स्रा॑ म॒त्यं॑ऽदेवहे॒तिं मा न॑: क्रुधःपशुपते॒ नम॑स्ते ।**

**अ॒न्यत्रा॒स्मद् दि॒व्यां शाखां॒ वि धू॑नु ॥१९॥**

**पदपाठः-** मा । न॒: । अ॒भि । स्रा॒: । म॒त्य॒ऽम् । दे॒व॒ऽहे॒तिम् । मा । न॒: । क्रु॒ध॒: । प॒शु॒ऽप॒ते॒ । नम॑: । ते॒।

अ॒न्यत्र॑ । अ॒स्मत् । दि॒व्याम् । शाखा॑म् । वि । धू॒नु ॥१९॥

**सरलार्थः-** हे रुद्र देवसम्बन्धि आयुधं वज्रात्मकम् अस्माकं मरणधर्माणं जनम् अभिलक्ष्य मा विसृज । हे पशुपते अस्मभ्यं मा क्रुधः । वयं त्वां प्रणमामः । अस्मत् अन्यत्र देशे दिव्याम् शाखाम् धनु विसृज ।

**मा नो॑ हिं॒सीर॑धि॑ नो ब्रूहि॒ परि॑णोवृङ्ग्धि॒ मा क्रु॑धः ।**

**मा त्वया॒ सम॑रामहि ॥२०॥**

**पदपाठः-** मा । नः॒ । हिं॒सीः॒ । अधि॑ । नः॒ । ब्रूहि॒ । परि॑ । नः॒ । वृ॒ङ्ग्धि॒ । मा । क्रु॒धः॒ ।

मा । त्वया॑ । सम् । अरामहि ॥२०॥

**सरलार्थः-** हे रुद्र अस्मान् मा हिंसीः अस्मद्विषये मा कुरु । अस्मासु कोपं मा कुरु । त्वं तव शस्त्रं दूरं स्थापय एवं कृपादृष्ट्या अश्मान् पश्य । वयं तव कुपितभावात् पृथगेव भूयास्म ।

**मा नो॒ गोषु॒ पुरु॑षेयु॒ मा गृं॑धो नो अजा॒विषु॑ ।**

**अ॒न्यत्रो॑ग्र॒ वि व॑र्तय॒ पिया॑रूणां प्र॒जां ज॑हि ॥२१॥**

**पदपाठः-** मा । नः॒ । गोषु॑ । पुरु॑षेषु । मा । गृ॒धः॒ । नः॒ । अ॒ज॒ऽअ॒विषु॑ ।

अ॒न्यत्र॑ । उ॒ग्र॒ । वि । व॒र्त॒य॒ । पिया॑रूणाम् । प्र॒ऽजाम् । ज॒हि॒ ॥२१॥

**सरलार्थः-** हे रुद्र ! अस्माकं गवादिपशून् हिंसितुम् इच्छां मा कुरु । तव अस्त्रशस्त्राणि राक्षसेषु देवविरोधिषु दुराचारिषु योजयित्वा तेषां प्रजां नाशय ।

## शब्दार्थाः

**नीलः** - कृष्णः, **क्रोष्टुः** - शृगालः, **विकेश्यः** - पिशाच्यः, **श्यावः** - कृष्णपीतवर्णः, **धूनु** - कम्पितः, **विद्धस्य** - शस्त्रहतस्य, **मृणन्तम्** - हिंसन्तम्, **अघ** - पापम्, **समरामहि** - सङ्गच्छामहै, **निलयते** - पलायते, **बिभर्षि** - धारयसि, **अक्षः** - चक्षुः ।

## स्वाध्यायः

**१. निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) नमो रात्र्या नमो ........................ । (प्रातः, दिवा, सायम्)

(२) रुद्रः ........................ अस्ति । (गजारूढः, अश्वारूढः, हंसारूढः)

(३) येन ........................ दैत्यस्य रथः भूमौ निपातितः । (महिषनामक, चण्डनामक, केशिनामक)

(४) मा नो ........................ पुरुषेषु । (गोषु, अश्वेषु, गजेषु)

(५) अयं कोषः ........................ निवासस्थानं वर्तते । (पशूनां, सर्वभूतानां, मानवानां)

**२. निम्नाङ्कितानां प्रश्नानाम् एकैक वाक्येनोत्तराणि लिखत ।**

(१) 'सहस्राक्षः' इति शब्दस्य कोऽर्थः?

(२) इमे रुद्राभिषेकमन्त्राः अथर्ववेदस्य कस्मिन् काण्डे समायान्ति?

(३) द्वितीयमन्त्रस्य छन्दसः नाम किम्?

(४) प्रस्तुतप्रकरणे कति मन्त्रास्सन्ति?

(५) कौ देवौ मित्रवत् स्तः?

३. **(अ) निम्नाङ्क्तिमन्त्राणां भावार्थं लिखत ।**

(१) अस्त्रा नीलशिखण्डेन सहस्राक्षेण वाजिना ।

रुद्रेणार्धकघातिना तेन मा समरामहि ॥

(२) भवारुदौ सयुजा संविदानावुभावुग्रौ चरतो वीर्याऽय ।

ताभ्यां नमो यतमस्यां दिशीऽतः ॥

(३) श्यावाश्वं कृष्णमसितं मृणन्तं भीमं रथं केशिनः पादयन्तम् ।

पूर्वे प्रतीमो नमो अस्त्वस्मै ।

**(ब) निम्नलिखितमन्त्राणां पूर्तिं विधेया ।**

(१) नमस्तेस्त्वायते .................................

(२) मा नो हिंसीरधि ..................................

(३) नमः सायं नमः ..................................

४. **पञ्चवाक्यैः उत्तराणि लिखत ।**

(१) रुद्रस्य धनुष्यस्य कीदृशं वर्णनं प्राप्यते?

(२) रुद्रः अपराधिनं दण्डदातुं कथं समर्थः?

(३) केभ्यः रुद्रः अस्माकं रक्षणं कर?

(४) रुद्रं कदा कदा प्रणमामः?

(५) रुद्रस्य स्वरूपं स्वशब्दैः वर्णयत ।

५. **शब्दरूपाणां परिचयं यच्छत ।**

(१) चतस्रः

(२) रात्र्या

(३) विकेश्यः

(४) ताभ्याम्

(५) गोषु

६. **क्रियापदानां परिचयं लिखत ।**

(१) चिकीर्षति

(२) स्याम

(३) अस्तु

(४) जहि

(५) बिभर्षि

७. **( अ ) सन्धिविच्छेदं कुरुत ।**

(१) अन्यत्रोग्र

(२) यन्त्वध

(३) संविदानावुभावुगौ

(४) तवेदम्

(५) जिह्वयेयमानम्

**( ब ) सन्धिमेलनं कुरुत ।**

(१) अस्तु + आयते

(२) पदनीः + इव

(३) भुवनानि + अन्तः

(४) रुद्रस्य + इषुः

(५) श्याव + अश्वम्

**छात्र-प्रवृत्तिः**

- छात्राः अथर्ववेदस्य नियमाः लिखेयुः ।

  अथर्ववेदपदपाठस्य परस्परं स्वाध्यायं कुर्युः ।

**विशिष्टज्ञानम्**

- कृथीनो यशसो जने । सा.वे. ४७९
- अहमनृतात्सत्यमुपैमि ।

  अहम् अनृतात्, असत्यवचनात् सत्यं प्रति गच्छामि ॥

●

# १४ अथर्ववेदे रुद्राभिषेकमन्त्राः २

**प्रस्तावना**

पाठेऽस्मिन् अथर्ववेदीयरुद्राभिषेकमन्त्राः प्रदत्ताः सन्ति । तेषु मन्त्रेषु भगवतः रुद्रस्य आत्मकल्याणाय, सर्वजनकल्याणाय जीवमात्रकल्याणाय च स्तुतिः कृता वर्तते । एषु रुद्रस्तुतिमंत्रेषु श्रद्धायाः भावः दृग्गोचरः भवति ।

पाठस्य १-१० मन्त्राः अथर्ववेदसंहितायाः ११ काण्डस्य २ सूक्तद्वयम् एवं ११-१५ मन्त्राः १५ काण्डतः समुद्धृताः सन्ति ।

---

**ॐ यस्यं तक्मा कासिंका हेतिरेकमश्वंस्येव वृषणः क्रन्द एतिं ।**

**अभिपूर्वं निर्णयंते नमों अस्त्वस्मै ॥ अथर्व. का. ११ सू. २ मं. २२॥**

**पदपाठः-** यस्यं । तक्मा । कासिंका । हेतिः । एकंम् । अश्वंस्यऽइव । वृषणः । क्रन्दः । एतिं ॥ अभिऽपूर्वम्। निःऽनयंते । नमः । अस्तु ।

**सरलार्थः-** कुत्सितशब्दकारिणी आर्तस्वकरी ज्वरादिपीडा यस्य रुद्रस्य आयुधम् एकम् अपकारिणं पुरुषं सेचनसमर्थस्य अश्वस्य क्रन्दः इव प्राप्नोति । स आयुधः पूर्वं-पूर्वं योग्यम् अभिलक्ष्य तं-तं नाशं प्रापयति, अस्मै ज्वरादि उपद्रवकारिणे रुद्राय नमः अस्तु ।

**ॐ योइन्तरिंक्षे तिष्ठंति विष्टंभितोऽयंज्वनः प्रमृणन् दैवपीयून् ॥**

**तस्मै नमों दशभिः शक्वंरीभिः ॥ अथर्व. का. ११ सू. २ मं. २३॥**

**पदपाठः-** यः । अन्तरिंक्षे । तिष्ठंति । विऽस्तंभितः । अयंज्वनः । प्रऽमुणन् । देवऽपीयून् ॥ तस्मै । नमः । दशऽभिः । शक्वंरिभिः ॥२३॥

**सरलार्थः-** यः अन्तरिक्षे निराधारप्रदेशे वा स्थितः रुद्रः अयज्वानं देवानां हिंसकं च हिंसति । तस्मै रुद्राय अञ्जलिबन्धनेन प्रणामं कुर्मः ।

**ॐ तुभ्यंमारण्याः पशवों मृगा वनें हिता हंसाः सुंपर्णाः शंकुना वंयांसि ॥**

**तवं यक्षं पंशुपते अप्स्वं१न्तस्तुभ्यं क्षरन्ति दिव्या आपों वृधे ॥ अथर्व. का. ११ सू. २ मं. २४॥**

**पदपाठः-** तुभ्यंम् । आरण्याः । पशवः । मृगाः । वनें । हिताः । हंसाः । सुपर्णाः । शकुनाः । वयांसि ॥ तवं । यक्षम् । पशुऽपते । अप्ऽसु । अन्तः । तुभ्यम् । क्षररन्ति । दिव्याः । आपः । वृधे ॥२४॥

**सरलार्थः-** हे पशुपते ! विधात्रा त्वदर्थं मृगाः, हंसा, श्येनाः तथा अन्ये च नवचराः पक्षिणः स्थापिताः । त्वदीयं पूज्यं स्वरूपम् उदकेषु मध्ये वर्तते, अतः अभिषेकाय आपः त्वदर्थं प्रवहन्ति ।

**ॐ शिंसुमारां अजगराः पुंरीकयां जषा मत्स्यां रजसा येभ्यो अस्यंसि ॥**
**न तें दूरं न पंरिष्ठास्तिं ते भव सद्यः सर्वान् परिंपश्यसि भूमिं**
**पूर्वंस्माद्धंस्युत्तंरस्मिन् समुद्रे ॥ अथर्व. का. ११ सू. २ मं. २५॥**

**पदपाठः-** शिंशुमारां । अजगराः । पुरीकयाः । जषाः । मत्स्यां । रजसाः । येभ्यः । अस्यंसि ॥ न । ते। दूरम् । न । परिऽस्था । अस्ति । ते । भव। सद्यः । सर्वांन् । परिं । पश्यसि । भूमिम् । पूर्वस्मात्। हंसि । उत्तंरस्मिन् । समुद्रे ॥२५॥

**सरलार्थः-** हे रुद्र ! त्वदर्थम् एव शिंशुमाराः, अजगराः, पुरीकयाः, जषाः तथा च मत्स्यादयः जलचराः प्राणिनः समुत्पन्नाः। हे भव ! त्वं सवर्ग गतस्य कृते किंचिदपि दूरं नास्ति, यतस्त्वं सर्वां कृत्स्नां सद्यः परितः अवलोकयसि। तथा त्वं पुरोवर्तिनः समुद्रात् उत्तरदिग्वर्तिनि समुद्रे क्षणादेव गच्छसि । अतः सर्वगतस्य तव कृते किञ्चिदपि दूरं नास्ति तथा च शिंशुमारादयः तव नित्य संनिहिताः ।

**ॐ मा नो॑ रुद्र त॒क्मना॒ मा वि॒षेण॒ मा न॒: सं स्रा॑ दि॒व्येना॒ग्निना॑ ॥**

**अ॒न्यत्रा॒स्मद् वि॒द्युतं॑ पातयै॒ताम् ॥ अथर्व. का. ११ सू. २ मं. २६ ॥**

**पदपाठः-** मा । न॒: । रु॒द्र । त॒क्मना॑ । मा । वि॒षेण॑ । मा । न॑: । सम् । स्रा॒: । दि॒व्येन॑ । अ॒ग्निना॑ ॥ अ॒न्यत्र॑ । अ॒स्मत् । वि॒ऽद्युत॑म् । पा॒तय॒ । ए॒ताम् ॥२६॥

**सरलार्थः-** हे रुद्र ! त्वदीयेन ज्वरादिरोगरूपेण आयुधेन, स्थावरजङ्गमोद्भवेन प्रामापहारिणा विषेण तथा च दिवि भवेन वैद्युतरूपेण तेजसा अस्मान् मा संसृज । एतां त्वदायुधभूतां विद्योतमानाम् अग्निम् अस्मतः अन्यत्र आख्ययश्वादिषु प्रक्षिप ।

**ॐ भ॒वो दि॒वो भ॒व ईशे पृथि॒व्या भ॒व आ प॑प्र उ॒र्व१॒॑न्तरि॑क्षम् ॥**

**तस्मै॒ नमो॑ यत॒मस्यां॑ दि॒शी॒३॑तः ॥ अथर्व. का. ११ सू. २ मं. २७ ॥**

**पदपाठः-** भ॒वः । दि॒वः । भ॒वः । ई॒शे॒ । पृ॒थि॒व्याः । भ॒वः । आ । प॒प्र॒ । उ॒रु । अ॒न्तरि॑क्षम् ॥ तस्मै॑ । नम॑: । य॒त॒मस्या॑म् । दि॒शि । इ॒तः ॥२७॥

**सरलार्थः-** भवः संज्ञो देवः अन्तरिक्षम् द्यावापृथिव्योः मध्ये च वर्तमानं लोकं स्वस्य अधिष्ठानेन तेजोमयं करोति। हे भव ! त्वं यस्मिन् अपि दिक्षु असि तस्मै त्रैलोक्यव्यापिने तुभ्यं नमः ।

**ॐ भव॑ राज॒न् यज॑मानाय मृड प॑शू॒नां हि प॑शुपति॑र्ब॒भूथ॑ ॥**

**यः श्र॒द्दधा॑ति॒ सन्ति॑ दे॒वा इति॒ चतु॑ष्पदे द्वि॒पदे॑ऽस्य मृड ॥ अथर्व. का. ११ सू. २ मं. २८ ॥**

**पदपाठः-** भव॑ । रा॒ज॒न् । यज॑मानाय । मृ॒ड॒ । प॒शू॒नाम् । हि । प॒शु॒ऽपति॑: । ब॒भूथ॑ ॥ यः । श्र॒त्ऽदधा॑ति । सन्ति॑ । दे॒वाः । इति॑ । चतु॑:ऽपदे । द्वि॒ऽपदे॑ । अ॒स्य॒ । मृ॒ड॒ ॥२८॥

**सरलार्थः-** हे सर्वस्याधिपते राजन् ! हे भव ! ये यजमानाः त्वदर्थं यागं कुर्वन्ति तान् यजमानान् त्वं सुखी करोसि। त्वमेव गवाश्वादीनां पञ्चपशूनां विभक्ताः पालयिता च भवसि। य आस्तिकः इन्द्रादिदेवगणान् स्वरक्षकरूपेण मन्यते,तस्य गवाश्वादयः पशून् तथा च पुत्रभृत्यादीन् त्वं सुखं ददासि ।

**ॐ मा नो॑ म॒हान्त॑मु॒त मा नो॑ अर्भ॒कं मा नो॒ वह॑न्तमु॒त मा नो॑ वक्ष्यतः ।**

**मा नो॑ हिंसीः पि॒तरं॑ मा॒तरं॑ च॒ स्वां त॒न्वं॑रुद्र॒ मा री॑रिषो नः ॥ अथर्व. का. ११ सू. २ मं. २९ ॥**

**पदपाठः-** मा । न॒: । म॒हान्त॑म् । उ॒त । मा । न॒: । अ॒र्भ॒कम् । मा । न॒: । वह॑न्तम् । उ॒त । मा । न॒:। व॒क्ष्य॒तः ॥ मा । न॒: । हिं॒सीः । पि॒तर॑म् । मा॒तर॑म् । च॒ । स्वाम् । त॒न्व॒ऽम् । रु॒द्र॒ । मा । री॒रि॒षः। न॒: ॥२९॥

**सरलार्थः-** हे रुद्र ! अस्माकं सम्बन्धिनं वृद्धं, शिशुं, वहन्तम्, पितरं, मातरं च मा हिंसीः । तथा च अस्माकं तन्वम् अपि मा हिंसीः । अर्थात् त्वं सर्वेषां रक्षणं कुरु ।

ॐ रुद्रस्यैलबकारेभ्योसंसूक्तगिलेभ्यः ॥

इदं महास्येभ्यः श्वभ्यो अकरं नमः ॥ अथर्व. का. ११ सू. २ मं. ३०॥

**पदपाठः-** रुद्रस्य । ऐलबऽकारेभ्यः । असंसूक्तऽगिलेभ्यः ॥
इदम् । महाऽआस्येभ्यः । श्वऽभ्यः । अकरम् । नमः ॥३०॥

**सरलार्थः-** ये महादेवस्य प्रेरणयुक्तानि कर्माणि कुर्वन्ति, तेभ्यः प्रमथगणेभ्यः तथा च कटुभाषणयुक्तेभ्यः गणेभ्यः नमस्करोमि । मृगयाविहारार्थं किरातवेषधारिणो देवस्य सम्बन्धिभ्यः महास्येभ्यः श्वानेभ्यः नमस्करोमि ।

ॐ नमस्ते घोषिणीभ्यो नमस्ते केशिनीभ्यः ॥

नमो नमस्कृताभ्यो नमः संभुञ्जतीभ्यः ॥

नमस्ते देव सेनाभ्यः स्वस्ति नो अभयं च नः ॥ अथर्व. का. ११ सू. २ मं. ३१॥

**पदपाठः-** नमः । ते । घोषिणीभ्यः । नमः । ते । केशिनीभ्यः ॥ नमः । नमःऽकृताभ्यः । नमः । सम्ऽभुञ्जतीभ्यः॥ नमः । ते। देव । सेनाभ्यः । स्वस्ति । नः । अभयम् । च । नः ॥३१॥

**सरलार्थः-** हे रुद्र !तव प्रभूतघोषयुक्ताभ्यः सेनाभ्यः विपरीताकृतिकेशयुक्ताभ्यः सेनाभ्यः, चण्डेश्वरप्रभृतयः सेनाभ्यः, संभुञ्जतीभ्यः सेनाभ्यः अपि च उक्तव्यतिरिक्ताभ्यः सेनाभ्यः नमः अस्तु । हे देव ! त्वत्प्रसादात् अस्मभ्यं क्षेमं भयरहितं च भवतु ।

ॐ तस्मै प्राच्या दिशः ॥ अथर्व. का. १५ सू. ४ मं. १॥

**पदपाठः-** तस्मै । प्राच्याः । दिशः ॥१॥

ॐ वासन्तौ मासौ गोप्तारावकुर्वन् बृहच्च रथंतरं चानुष्ठातारौ ॥
अथर्व. का. १५ सू. ४ मं. २॥

**पदपाठः-** वासन्तौ । मासौ । गोप्तारौ । अकुर्वन् । बृहत् । च । रथम्ऽतरम् । च । अनुऽस्थातारौ ॥२॥

**सरलार्थः-** देवैः वसन्तऋतोः द्वौ मासौ पूर्वस्यां दिशि रक्षकरूपेण नियुक्तौ तथा च देवाः बृहत्साम्नं एवं रथन्तरसाम्नं अनुष्ठातारौ अकुर्वन् ।

ॐ वासन्तावेनं मासौ प्राच्या दिशो गोपायतो बृहच्च रथन्तरं चानु
तिष्ठतो य एवं वेद ॥ अथर्व. का. १५ सू. ४ मं. ३ ॥

**पदपाठः-** वासन्तौ । एनम् । मासौ । प्राच्याः । दिशः । गोपायतः । बृहत् । च । रथम्ऽतरम् । च । अनु। तिष्ठतः । यः । एवम् । वेद ॥३॥

**सरलार्थः-** यः उपर्युक्तप्रकारेण जानाति तस्य कृते वसन्तऋतोः प्राक्-स्थितौ द्वौ मासौ रक्षितौ भवतः परं च बृहद्रथन्तरः च तस्य अनुकूलिनौ भवतः ।

ॐ तस्मै दक्षिणाया दिशः ॥ अथर्व. का. १५ सू. ४ मं. ४॥

**पदपाठः-** तस्मै । दक्षिणायाः । दिशः ॥४॥

ॐ ग्रैष्मौ मासौ गोप्तारावकुर्वन् यज्ञायज्ञियं च वामदेव्यं चानुष्ठातारौ
॥ अथर्व. का. १५ सू. ४ मं. ५॥

**पदपाठः-** ग्रैष्मौ । मासौ । गोप्तारौ । अकुर्वन् । यज्ञायज्ञियम् । च । वामदेव्यम् । च । अनुऽस्थातारौ ॥५॥

**सरलार्थः-** देवैः ग्रीष्म-ऋतोः दक्षिणस्यां दिशि द्वौ मासौ रक्षकरूपेण नियुक्तौ अपि च यज्ञयज्ञियम् एवं वामदेव्यम् अनुष्ठातारौ अकुर्वताम् ।

## शब्दार्थाः

**अपकारिणम्** - अपराधिनम्, **अयज्वानम्** - अयाज्ञिकम्, **श्येनाः** - शोभनयतनाः, **शिंशुमाराः** - नक्रविशेषाः, **अजगराः** - सर्पविशेषाः, **पुरीकयाः** - जलचराः प्राणिविशेषाः, **कृत्सनां** - भूमिं, **मा संसृज** - न संयोजय, रक्षस्व इत्यर्थः, **प्रक्षिप** - पातय, **वहन्तम्** - पोषणकर्तारम्, पोषकम्, **तन्वम्** - शरीरम्, **महास्येभ्यः** - महत् मुखेभ्यः, **संभुञ्जतीभ्यः** - सहभोजनं कुर्वनीभ्यः, **भयराहित्यम्** - अभयत्वम् ।

## स्वाध्यायः

१. **निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) यस्य तक्ता ........................ हेतिः । (नासिका, वासिका, कासिका)

(२) तस्मै नमो ........................ शक्वरीभिः । (दशभिः, द्विभिः, त्रीभिः)

(३) तुभ्यमारव्या पशवो मृगा ........................ । (जले, वने, खे)

(४) ........................ दक्षिणाया दिशः । (यस्मै, कस्मै, तस्मै)

(५) नमस्ते ........................ नमस्ते केशिनीभ्यः । (घोषिणीभ्यो, वासिनीभ्यो, मौनीभ्यो)

२. **निम्नाङ्कितानां प्रश्नानाम् एकैक वाक्येनोत्तराणि लिखत ।**

(१) अयज्वानं कः हिंसति ?

(२) पशुपतेः पूज्यं स्वरूपं कुत्र वर्तते ?

(३) भवः कान् सुखी करोति ?

(४) महादेवस्य प्रेरणयुक्तानि कर्माणि के कुर्वन्ति ?

(५) पूर्वस्यां दिशि कस्य ऋतोः द्वौ मासौ नियुक्तौ ?

३. **(अ) निम्नाङ्कितमन्त्राणां भावार्थं लिखत ।**

(१) ॐ योऽन्तरिक्षे तिष्ठति विष्टभितोऽयज्वनः प्रमृणन् देवयीयून् ।
तस्मै नमो दशभिः शक्वरीभिः ॥

(२) ॐ मा नो रुद्र तकमना मा विषेण मा नः सं स्रा दिव्येनाग्निना ।
अन्यत्रास्मद् विद्युतं पातयैताम् ॥

(३) ॐ भव राजन् यजमानाय मृड पशूनां हि पशुपतिर्बभूथ ।
यः श्रद्दधाति सन्ति देवा इति चतुष्पदे द्विपदेऽस्य मृड ॥

(४) ॐ रुद्रस्यैल बकारेभ्योसंसूक्तगिलेभ्यः ।
इदं महास्येभ्यः श्वभ्यो अकरं नमः ॥

(५) ॐ वासन्तौ मासौ गोप्तारावकुर्वन् बृहच्च रथंतरं चानुष्ठातारौ ॥

**(ब) निम्नलिखितमन्त्राणां पूर्तिं विधेया ।**

(१) यस्य तकमा ................................ ॥

(२) भवो दिवो भव ................................ ॥

(३) मा नो महान्तमुत ................................ ॥

(४) नमस्ते घोषिणीभ्यो ................................ ॥

(५) ग्रैष्मौ मासौ ................................ ॥

४. **पञ्चवाक्यैः उत्तराणि लिखत ।**

(१) रुद्र-आयुधस्य लक्षणानि, कार्यं च वर्णयत?

(२) विधाता रुद्रार्थं किं-किं समुत्पन्नम्?

(३) भवः कुत्र स्थित्वा लोकं तेजोमयं करोति?

(४) रुद्रं प्रति केषां रक्षणार्थं प्रार्थना कृता वर्तते?

(५) पशुपतेः गणानां, सोनानां च नामानि लिखत ।

५. **शब्दरूपाणां परिचयं यच्छत ।**

(१) विषेणः

(२) राजन्

(३) संभुञ्जतीभ्यः

(४) प्राच्याम्

(५) मासौ

६. **क्रियापदानां परिचयं लिखत ।**

(१) निर्णयते

(२) पश्यसि

(३) पातयेताम्

(४) श्रद्दधाति

(५) अकुर्वन्

७. **(अ) सन्धिविच्छेदं कुरुत ।**

(१) योऽन्तरिक्क्षे

(२) पातयैताम्

(३) वहन्तमुत

(४) महास्येभ्यः

(५) गोप्ताराकुर्वन्

**(ब) सन्धिमेलनं कुरुत ।**

(१) हेतिः + एकम्

(२) तुभ्यम् + आरण्याः

(३) पूर्वस्मात् + हंसि

(४) दिव्येन + अग्निना

(५) द्विपदे + अस्य

**छात्र-प्रवृत्तिः**

- छात्राः अथर्ववेदस्य मन्त्राणाम् उच्चारणपद्धते गानं कुर्युः ।

**विशिष्टज्ञानम्**

- वेदो नित्यमधीयताम् । (-आदिशङ्कराचार्यः)
  नित्यं वेदान् अधीयताम्
  अहरहः वेदानाम् स्वाध्यायः करणीयः ।

●

# १५ वेदमन्त्राणां नानाविधप्रयोगाः

**प्रस्तावना**

भारतीयसंस्कृतेः आधारभूताः वेदाः सन्ति । 'वेदाः ज्ञानराशयः' । यन्नवेदे तन्नकुत्राऽपि । ब्राह्मणैर्यथा ''निष्कारणं षडङ्गो वेदोऽध्येयोज्ञेयश्च'' एवं वेदेषु उक्तमन्त्राणां पुरश्चर्यया तत्तदधिष्ठातृदेवताप्रसादद्वारा तत्तन्मन्त्रसामर्थ्यसिद्धिः सम्पादनीया, एतदेव तपः । तपसा विना केवलया विद्यया सम्पादितमोजो निःसत्त्वतामापद्यते । मन्त्रभ्रांतिहरापरपर्यायसूत्रमंत्रप्रकाशिकायां कात्यायनेनोक्तं :-

**''नित्यनैमित्तिके कुर्यात् काम्यं नैव कदाचन ।**

**तत्रापि पुत्रकामश्चेत्काम्यं कुर्यादतन्द्रितः ।**

**रिपुनिग्रहकामश्चेत्काम्यं कुर्यादशङ्कितः ॥''**

अस्माभिः नित्यनैमित्तिकानि कार्याणि दिनप्रतिदिनं क्रियते । यदा यदा विशेषकामना भवति तदा तस्याः परिपूर्तिहेतोः काम्यानुष्ठानानि क्रियन्ते । तत्र विविधमन्त्राणां प्रयोगो क्रियते । ब्राह्मणैः मन्त्रशास्त्रस्याध्ययनाऽध्यापनानुष्ठानद्वारा मन्त्रसामर्थ्यं विशेषरूपेण - वैदिकमन्त्रसामर्थ्यमवश्यं समधिगन्तव्यम् । मन्त्रसामर्थ्यं नाम - ''अदृष्टोपायेन स्वपरमनोवांछितैहिकामुष्मिकफलाकांक्षापूरणम्'' । तेच मन्त्राश्चतुर्विधाः-

(१) निगमोदिताः , (२) आगमोदिताः, (३) पुराणोदिताः (४) भाषोदिताश्च ।

- निगमो नाम वेदः । गायत्रीमृत्युञ्जयादयः वैदिकाः ।
- उच्छिष्टगणपतिश्रीविद्यादय आगमोक्ताः ।
- पञ्चाक्षरषडक्षरद्वादशाक्षरादयः पौराणिकाः ।
- सर्पवृश्चिकदंशाद्युपद्रवप्रतिबन्धकाः भाषामयाः ।

---

जीवनस्य विविधासु अवस्थासु नानाविधाः उपाधयः समागच्छन्ति । तासां निवारणहेतोः विविधमन्त्राणां प्रयोगः क्रियते। तत्र अधिकारिणश्च नैगमिकेषु द्विजाः । आगमिकेषु द्विजबान्धवादयः । पौराणिकेषु स्त्रीशूद्रादयः । भाषिकेषु अनुलोमप्रतिलोमादयः संकराः सङ्कीर्णाश्च । एषां सर्वविधानां मन्त्राणामनुष्ठानं दीक्षापूर्वकं, दीक्षा च गुरोः सकाशाद् उपादेया।

प्रस्तुतप्रकरणेऽस्मिन् शुक्लयजुर्वेदस्य, ऋग्वेदस्य च विविधमन्त्राणां प्रयोगाः, विधि, क्रिया च वर्णिताः सन्ति । येषामुपयोगेन सामान्यमनुष्याः स्वजीवनस्थितानाम् उपाधिनां निवारणं कर्तुं प्रभवन्ति ।

### (गायत्रीसाधनम्)

**ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यम्भर्गोदेवस्य धीमहि । धियोयोनः प्रचोदयात् ॥**

(शु. य. अ. ३ मं. ३५)

**सरलार्थः-** पृथ्वीलोकः, भुवर्लोकः एवं स्वर्गलोकः त्रिषु लोकेषु व्याप्तः परमात्मनः सूर्यस्य वयं ध्यानं कुर्मः । यः अस्माकं बुद्धिं श्रेष्ठकर्मेषु संयोज्य तस्याः विस्तारं कारयेत् ।

'गायत्रीं यो जपेन्नित्यं न स पापेन लिप्यते ।' (संवर्तस्मृति)

गायत्र्याः उपासना अस्माकं परमं कर्तव्यमस्ति । गायत्र्यापरो मन्त्रः कोऽपि नास्ति । तस्य प्रयोगाः निम्नलिखिताः सन्ति ।

**प्रयोगा:-**

(१) निर्मलान्त:करण: त्रिस्नायी मितहविष्याशी मौनी त्रिसन्ध्यार्चनपरो लक्षत्रयं जपेत् । तदनन्तरं कर्मसु योजयेत् ।

(२) सूर्योदये प्रतिदिनं कृतस्नानं सहस्रं जपेत् । आयुरारोग्यमैश्वर्यं धनं च लभते ।

(३) चन्द्रग्रहणे खादिरवह्नौ रक्तचन्दनसमिधो घृताक्ता जुहुयात्, सहस्रसुवर्णलाभो भवेत् ।

(४) रक्तचन्दनमिश्रं गोमयं घृताक्तं च वह्नौ हुत्वा सहस्रगोधनमाप्नोति ।

(५) क्षीराहारस्य लक्षजाप्येन अपमृत्युप्रतिकारो भवति ।

(६) शालितण्डुलहोमे कन्यालाभ: ।

(७) सहस्राभिमन्त्रितघृतपाशनेन जलेन स्नाने कृते अलक्ष्मीमलव्याधिविनायकेभ्यो मुच्यते ।

(८) सहस्राभिमन्त्रितघृतपानेन मेधां बहुविज्ञानोल्लासिनीं लभते ।

(९) ब्रह्मचारी मिताहार: प्रत्यहं सहस्रत्रयं जपेत्, सम्वत्सरेण धनैश्वर्यं लभेत ।

(१०) गौरसर्षपानयुतं जहुयात् सर्वरिपुसाधनं भवति ।

**( धनमन्नं पशु: सुवर्णं च लभ्यते, सर्वजनप्रियता )**

**अग्नेऽअच्छा व्वदेह न: प्रति न: सुमना भव ।**

**प्रनो यच्छ सहस्रजित्त्वꣳहि धनदाऽअसि स्वाहा ॥**

(शु. य. अ. ९ मं. २८)

**सरलार्थ:-** हे अग्ने, अस्मान् प्रति सुमना: शोभनमनस्को भव । हे सहस्रजित् यस्मात्त्वं स्वभावतो धनस्य दातासि अतस्त्वम् अस्मभ्यं धनं प्रयच्छ । अस्य मन्त्रस्य इन्द्राबृहस्पती ऋषि: अनुष्टुप् छन्द: अग्निर्देवता ।

**प्रयोगा:-**

(१) सहस्रसङ्ख्याकमुदुम्बरतिलयवधान्यापामार्गतण्डुलान् जुहुयात् । धनकामो धनं लभते ।

(२) घृताक्तानामौदुम्बरसमिधामयुतं जुहुयात् । अन्नपशुसमृद्धो भवति ।

(३) पलाशसमिधां दधिमधुघृताक्तानां शतसहस्रं वटमूले अग्निमुपसमाधाय जुहुयात् । सुवर्णलाभो भवति ।

(४) अनेन गोरोचनमष्टसहस्राभिमन्त्रितां कृत्वा ललाटे तिलकं कुर्यात् । सर्वजनप्रियो भवति ।

**( मेधाप्राप्ति: )**

**मित्रꣳ हुवे पूतदक्षं व्वरुणञ्च रिशादसम् ।**

**धियङ्घृताचीꣳ साधन्ता ॥**

(शु. य. अ. ३३ मं. ५७)

**सरलार्थ:-** मित्रं वरुणं च अहं यज्ञे आह्वयामि । तयो: प्रार्थ्यते दुष्टानां विनाशं कुरु । बुद्धिं कर्म साधयते। किदृशीं धियम् । घृताचीम् घृतम्अच्यते उरु आहुतिञ्च प्रदीयते । अस्य मधुच्छन्दा ऋषि: । लिङ्गोक्ता देवता:। गायत्रीच्छन्द: ।

**प्रयोगा:-**

(१) मेधाकामो घृतमयुतं जहुयात् ।

(२) घृतं च सहस्राभिमन्त्रितं कृत्वा पिबेत्, अत्यन्तं मेधावी भवति ।

## ( वृष्टिसम्पादकं कर्म )

**अपाङ्गम्भन्सीदमात्त्वासूर्य्योभिताप्प्सीन्माग्निर्व्वैश्वानरः ।**

**अच्छिन्नपत्राः प्रजाऽअनुवीक्षस्वानुत्त्वा दिव्या वृष्टिः सचताम् ॥**

**सरलार्थः-** हे कूर्म, अपां गम्भीरे स्थाने रविमण्डले त्वम् उपविश । तत्रोपविष्टं त्वां सूर्यो मा संतापयतु । वैश्वानरः सर्वत्रहितोऽग्निश्च मा संतापयतु । त्वं चात्र स्थितः सन् प्रजाइष्टकारूपा अनुवीक्षस्व । दिव्यावृष्टिः त्वामनु सेवतामुदकेन नित्यं सिक्तो भव ।

अस्य मन्त्रस्य प्रजापतिर्ऋषिः । कूर्मोदेवता । पङ्क्तिच्छन्दः ।

**प्रयोगाः-**

देवं वर्षयितुकामउदुम्बरबिल्ववेतसवारणानां दधिमधुघृताक्तानाम् अयुतं जुहुयात् । वृष्टिर्भवति ।

## ( ज्वरादिशान्तये )

**इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहेमतीः ।**

**यथा शमसद्द्विपदे चतुष्पदे व्विश्वम्पुष्टङ्ग्रामेऽअस्मिन्ननातुरम् ॥**

**सरलार्थः-** येन प्रकारेण पुत्रपौत्रादिषु गवादिपशुषु सुखं भवतु तथा निवासस्थाने प्राणिजातम् सम्पन्नं उपद्रवरहितं भवति। तेन हेतुना वयम् अस्मदीयाः बुद्धिः महद्बलशालिने जटाजूटयुक्ताय विनश्यद्वीराय शम्भवे समर्पयामः ।

अस्य मन्त्रस्य कुत्सऋषिः । एकरुद्रोदेवता । जगतीच्छन्दः ।

**प्रयोगाः-**

(१) तिलानाम् अयुतहोमे - अयाचितं धनमुत्पद्यते ।

(२) दूर्वाप्रवालानामयुतं होमे - महाज्वरोपघाते गतायुः अपि दीर्घायुर्भवति ।

(३) घृताक्तानां पलाशसमिधामयुतं जुहुयात् - अभिचारिकेभ्यो भयं न भवति ।

(४) गवामुपघाते गोष्ठमध्येऽग्निमुपसमाधाय वैकङ्कतसमिधोऽयुतं जुहुयात् । गवां शान्तिर्भवति ।

## ( लक्ष्मीप्राप्त्यै )

**कांसोऽस्मितां हिरण्यप्राकारामार्द्रांज्वलंतीं तृप्तां तर्पयन्तीम् ।**

**पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ।।**

**सरलार्थः-** अहं तां सुन्दरस्मितयुक्तां सुवर्णवत् भासमानां शीतलसुन्दरगुणयुक्तां, स्वप्रकाशां तुष्टां, भक्तेभ्यो वाञ्छितार्थदात्रीं, कमलवत् कोमलां, पद्मेस्थितां, वाण्यामनसा च या वर्णयितुम् अशक्या अस्ति तां श्रियं देवीम् अत्र आवाहयामि।

**प्रयोगाः-**

(१) अष्टलक्षात्मकं जपकर्म । प्रातःसायम् आनुकुल्यतानुसारं जपविधानम् । पलाशसमिद्भिः, पयसा, गोधृतम एवं मधुना दशांशहोमः । राज्यश्रीः, समृद्धिः शत्रुनाशः च भवति ।

(२) चण्डीपाठेन सह प्रतिश्लोकं सम्पुटीकृत्य पाठेनापि धनधान्यसमृद्धिः ऐश्वर्यञ्च प्राप्यते ।

## ( वास्तुदोषोपशमनकरं कर्म )

**स नो भुवनस्य पते प्प्रजापते यस्य त ऽ उपरि गृहा यस्य वेह ।**

**अस्मै ब्रह्मणेऽस्मै क्षत्राय महि शर्म्म यच्छ स्वाहा ॥**

**सरलार्थः-** हे भुवनस्य जगतः पते तव अस्मिन् लोके गृहाः सन्ति । स अस्माकं ब्रह्मसम्बन्धिकर्मणे क्षत्रसम्बन्धिकर्मणे सुखं देहि ।

अस्य परमेष्ठी देवता । प्रजापतिर्ऋषिः । प्रस्तारपङ्क्तिश्छन्दः ।

**प्रयोगाः-**

(१) अनेनाज्याहुतिसहस्रं जुहुयात्, वास्तुदोषस्य शान्तिर्भवति ।

## (पुत्रप्राप्त्यै)

**उ॒भा पि॑बतमश्विनो॒भा न॒ः शर्म्म॑ यच्छतम् ।**

**अ॒वि॒द्रि॒याभि॑रू॒तिभि॑ः ॥**

**सरलार्थः-** हे अश्विनौ उभौ युवां सोमं पिबतम् आस्वादयतम् । अनन्तम् उभावपि अस्मभ्यम् अविद्रियाभिः सम्पूर्णाभिः ऊतिभिः सुखं यच्छतम् । अस्य प्रस्कण्वऋषिः । अश्विनौदेवता गायत्रीच्छन्दः ।

**प्रयोगाः-**

(१) पुत्रकामनायै प्रतिदिनम् अष्टोत्तरशतं जपेत् ।

## (ब्रह्महत्याविमोचकं कर्म)

**विश्वा॑नि देव सवितर्दु॒रि॒तानि॒ परा॑सुव ।**

**यद्भ॒द्रं तन्न॒ऽआसु॑व ॥**

**सरलार्थः-** हे सविता देव ! त्वम् अस्माकं समस्तान् दुर्गुणान् दूरीकुरु । तथा च यत् कल्याणं तदस्मभ्यं देहि । अस्य श्यावाश्व ऋषिः । सवितादेवता । गायत्रीच्छन्दः ।

**प्रयोगाः-**

(१) सूर्योदयसमये सूर्याभिमुखो भूत्वा अष्टोत्तरशतं जपेत् - निष्पापो भवति ।

(२) उदकसक्त्वाहारो मासमेकमादित्याभिमुखो सहस्रं जपेत्, स्वकृतब्रह्महत्यायाः प्रमुच्यते ।

## (शान्तिकामे, पुष्टिकामे, कन्याकामे, पतिकामे)

**त्र्यम्बकं यजामहे सु॒ग॒न्धिम्पु॑ष्टि॒वर्द्ध॑नम् ।**

**उ॒र्व्वा॒रु॒कमि॑व॒ बन्ध॑नान्मृ॒त्योर्मु॑क्षीय॒ मामृता॑त् ॥**

**त्र्यम्बकं यजामहे सु॒ग॒न्धिम्प॑ति॒वेद॑नम् ।**

**उ॒र्व्वा॒रु॒कमि॑व॒ बन्ध॑नादितो मु॑क्षीय॒ मामुत॑ः ॥**

**सरलार्थः-** दिव्यगन्धयुक्तं, धनधान्यादिसम्पदवृद्धि कर्तारं, त्रिनेत्रभूषितं शङ्करम् अर्चयामः । अकालमृत्योः मुक्तो भूयासम्। यथा कर्कटीफलं सुपक्वं स्वतः वृन्तात् स्वयमेव पृथक् भवति तद्वत् त्र्यम्बकप्रसाद् सांसारिकबन्धनात् मुक्तोभूयासम् । अथ यजमानकन्यका अपि शिवमुपासन्ते पत्युःलभयितारं दिव्यपरिमलसनाथंत शिवं पूजामहे, परिजनेभ्यः मुक्ता भूयास्म ।

द्वयोः वसिष्ठऋषिः । अनुष्टुप् छन्दः । रुद्रो देवाता ।

**प्रयोगाः-**

(१) द्वाभ्यां शान्तिकामः, पुष्टिकामो वा धान्य-यव-पलाशसमिद्भिः अयुतं प्रत्येकं जुहुयात् - शान्तिः पुष्टिश्च भवति।

(२) कन्यानां प्रतिकामानां सौभाग्यकामानां द्वितीयत्र्यम्बकेन सर्वव्रीही-आज्यहोमः अयुतसंख्यया ।

(३) कन्याकामनायामपि द्वितीयत्र्यम्बकमन्त्रेण सर्वव्रीहिआज्यहोमः अयुतसंख्यया ।

एवं विविधप्रकाराः मन्त्राः तेषामुपायाश्च वेदेषु वर्णिता एव तेषां प्रयोगेन सर्वकामना परिपूर्तिभविष्यति इति भावः।

## शब्दार्थाः

**अयुतम्** - दशसहस्रम्, **वेतसः** - जलवेतसः, **गोष्ठ** - गोशाला, **सक्तु** - यवपिष्टः, **व्रीहिः** - धान्यम् ।

## स्वाध्यायः

**१. निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) गायत्रीं यो जपेन्नित्यं न स ........................ लिप्यते । (दोषेन, पापेन, पुण्येन)

(२) इमा ........................ तवसे । (भवाय, रुद्राय, शर्वाय)

(३) पद्मेस्थितां ........................ वर्णां तामिहोपह्वये श्रियम् । (कृष्ण, पीत, पद्म)

(४) यद् ........................ तन्नऽआसुव । (भद्रम्, दोषम्, अन्नम्)

(५) वेदाः ........................ राशयः । (उपासना, कर्म, ज्ञान)

**२. निम्नाङ्कितानां प्रश्नानाम् एकैक वाक्येनोत्तराणि लिखत ।**

(१) आगमिकेषु मन्त्रेषु के अधिकारिणः भवन्ति ?

(२) पौराणिकेषु केषामधिकारः ?

(३) भाषामयाः मन्त्राः के सन्ति ?

(४) मन्त्राणामनुष्ठानं केन प्रकारेण भवति ?

(५) केन द्रव्येण होमेन कन्यालाभो भवति ?

**३. (अ) निम्नाङ्कितमन्त्राणां भावार्थं लिखत ।**

(१) भूर्भुवःस्वः तत्सवितुव्वरेण्यं भर्गोदेवस्य धीमहि । धियोयोनः प्रचोदयात् ।

(२) विश्वानिदेवसवितर्दुरितानि परासुव । यद्भद्रंतन्नऽआसुव ।

(३) इमारुद्रायतवसेकपर्दिनेक्षयद्वीराय प्रभरामहे मतीꣳ ।

यथाशमसद्विपदेचतुष्पदे विश्वम्पुष्टङ्ग्रामेऽअस्मिन्ननातुरम् ॥

**(ब) निम्नलिखितमन्त्राणां पूर्तिं विधेया ।**

(१) अग्नेऽअच्छा ................................

(२) कांसोऽस्मितां ..................................

(३) स नो भुवनस्य ..................................

**४. टिप्पणीलेख्याः ।**

(१) चतुर्विधमन्त्राणांनिरूपणम्

(२) मेधाप्राप्तिः

(३) गायत्रीमन्त्रस्य विविधप्रयोगाः

**५. शब्दरूपाणां परिचयं यच्छत ।**

(१) कार्याणि

(२) गुरोः

(३) अस्मभ्यम्

(४) सुमनाः

(५) प्राप्त्यै

**६. क्रियापदानां परिचयं लिखत ।**

(१) क्रियते

(२) प्रभवन्ति

(३) सन्ति

(४) जपेत्

(५) जुहुयात्

**७. (अ) सन्धिविच्छेदं कुरुत ।**

(१) निगमोदिताः

(२) प्रकरणेऽस्मिन्

(३) कुर्यादशङ्कितः

(४) तत्रोपविष्टः

(५) एतदेव

**(ब) सन्धिमेलनं कुरुत ।**

(१) तत् + न

(२) वृष्टिः + भवति

(३) आयुः + आरोग्यम् + ऐश्वर्यम्

(४) धन + ऐश्वर्यम्

(५) ज्वर + उपघाते

**छात्र-प्रवृत्तिः**

- छात्राः विविधवेदमन्त्राणां प्रयोगं कुर्युः ।
- छात्राः अन्योपयोगीमन्त्राणां सङ्कलनं कृत्वा भित्तो स्थापयन्तु ।

**विशिष्टज्ञानम्**

- इतिहास पुराणाभ्यां वेदं समुपबृंहयेत् ।
  इतिहास पुराणाभ्याम् एव वेदाना सन्निकर्षः वर्य ज्ञातुं शक्नुमः ॥

●

# १६ वेदपारायणम् एवं वेदपरम्परा

**प्रस्तावना**

भारतीयज्ञानगङ्गायाः स्रोतांसि वेदा एव सन्ति । वेदशब्देन यथा चतस्रो मन्त्र-संहिताः परिग्राह्याः भवन्ति । प्रायः तु वेद-शब्दस्य अनेकार्थाः भवन्ति यथा - सत्ता, विचारणे, विन्दते, विद्यमानत्वे इत्यादयः । सम्प्रति वेदानां ज्ञानार्णवत्वाम् अत्र विद्-ज्ञाने इति ज्ञानाथकःऽर्थः वेदानां कृते ग्राह्यो भवति । तेषां ज्ञानयुक्तानां वेदानाम् अध्ययन-अध्यापनं तथा च तेषां रक्षणं तु अतीव आवश्यकं वर्तमानेऽस्मिन् समये । तेषां वेदानां रक्षणार्थं सम्प्रति तेषां परंपरानां पारायणप्रकाराणां च ज्ञानम् आवश्यकं भवति । तेनैव छात्राः वेदानां रक्षणं कुर्यादिति हेतोः अत्र वेदपारायणम् एवं परम्परायाः बोधको पाठः प्रदीयते । पारायणं नाम - ''साकल्यसाङ्गवचने पारायणतुरायणे'' इत्यमरकोशात् - साकल्येन कात्सर्येन यत् साङ्गम् उच्यते तत् पारायणम् ।

---

वेदा एव संहिता इति पदेन ज्ञायन्ते । अस्याः संहितायाः अध्ययन-पारायणविषेये याज्ञवल्क्यमुनिना स्व-शिक्षाग्रन्थे कथितं वर्तते । तेनैव ज्ञायते श्लोकोऽयं यत् -

**''संहितासारबहुलः, पदसंज्ञासमाकुलः ।**

**क्रमसन्धिसमाकीर्णो, दुस्तरो मन्त्रसागरः ॥''**

(- याज्ञवल्क्य-शिक्षा, -३०)

श्लोकेऽस्मिन् संहिताध्ययनं वा पारायणं कीदृशं कति प्रकारकं च तत् निगदितं वर्तते । संहितायाः पारायणं रक्षणं च दुस्तरणीय समुद्रमिव भवति यः मन्त्र-समुद्रेन ज्ञायते । वेद पारायणं पद-क्रम-सन्धियुक्तं पुनः-पुनः अभ्यासं कृत्वा अनेनैव अयं दुस्तरो मन्त्रसमुद्रः तरणीयः ।

अध्ययनविधिना प्रयुक्तं वा अध्यापनविधिप्रसादलभ्यं वा अध्ययनं नित्य-कर्म विप्राणाम् । वेदपारायणस्य नित्यत्वं बहुधा प्रोक्तं वर्तते - ''**वेदाध्ययनं नित्यम् अनध्ययने पातात् ।**'' वेदानाम् अध्ययनं पारायणं च नित्यमेव कर्तव्यम्, अनित्यत्वे सति पापभुञ्जनं भवति । चरणव्यूहस्य भाष्येऽपि पारायणस्य महत्त्वं प्रदत्तम अस्ति - ''**तस्माद् ब्रह्मयज्ञार्थे पारायणार्थे च ऋग्वेदस्य अध्ययनं कर्तव्यम् ।**'' अनेनैव ज्ञायते यत् पारायणस्य कीदृशं महत्त्वं स्वरूपंश्चास्ति । अत एव कथितं यत् - ''**स्वाध्यायो एव ब्रह्मयज्ञः ।**'' यः नित्य-निरतरं स्वाध्यायं पारायणं वा करोति सः साक्षात् ब्रह्मयज्ञस्यैव अनुष्ठानं करोति । तैत्तिरीयोपनिषदि अपि कथितं वर्तते यत् - ''**स्वाध्यायान्मा प्रमदः । (तै.उ. २-११-२)**'' ''**स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् ।'' (तै.उ. - १.११.२.)** स्मृतौ अपि विविधानि वचनानि पारायणस्य स्वाध्ययस्य वा महत्त्वसूचकानि अस्माभिः लभ्यन्ते यथा - **• स्वाध्यायस्तय आर्जवम् । भ.गी. १६-१) • स्वाध्यायाभ्यसनञ्चैव। (भ.गी. २७-१५)**

**वेदमेव सदाभ्यस्येत्तपस्तप्स्यन्द्विजोत्तमः ।**

**वेदाभ्यासो हि विप्रस्य तपः परमिहोच्यते ॥ (मनु. - २ - १६६)**

**वेदानधीत्य वेदौ वा, वेदं वापि यथाक्रमम् ।**

**अविप्लुतब्रह्मचर्यो, गृहस्थाश्रममावसेत् ॥ (मनु. - ३ - २)**

अपि च विविधाः सूक्तयोऽपि वेदपारायणस्य महत्वं गदन्ति ।

## पारायणप्रकाराः

पारायणं द्विविधं - प्रकृतिविकृतिभेदात् । संहिता प्रकृतिः इति उच्यते । तद् विकृतयः अष्टौ भवन्ति यथा -

**''जटा माळा शिखा रेखा, ध्वजो दण्डो रथो घनः ।**

**अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा महर्षिभिः ॥''**

| | | | |
|---|---|---|---|
| (१) जटा | (२) माला | (३) शिखा | (४) रेखा |
| (५) ध्वजः | (६) दण्डः | (७) रथः | (८) घनः |

→ प्राकृतं पारायणमपि द्विविधं भवति - • क्रमपाठः । • क्रमपदश्च ।

→ वैकृतमपि द्विविधं भवति - • क्रमजटः । • क्रमदण्डश्च ।

तदेतत् सङ्कलनस्य चतुष्प्रकारकं पारायणं चरणव्यूहे वर्णितं वर्तते । प्रकारान्तरेण चतुर्णां वेदानां पारायणं द्वैविध्यमश्नुते • उपेन्द्रपारायणम्, • विश्वरूपपारायणञ्च ।

तत्र केवलानां चतसृणां संहितानां पारायणम् उपेन्द्रपारायणं कीर्त्यते, उपेन्द्रो वामनः, तस्य ह्रस्वकायत्वात् । ब्राह्मणादि समुपबृंहितानां तासां पारायणं तु बृहत्त्वात् विश्वरूपपारायणम् इति व्यपदिश्यते ।

## वेदपारायण-फलम्

याज्ञवल्क्यमुनिना स्व-शिक्षाग्रन्थे वेदपारायणस्य फलं निर्दिष्टं वर्तते यथा -

**''संहिता नयते सूर्यं, पदं च शशिनः पदम् ।**

**क्रमश्च नयते सूक्ष्मं, यत् तत् पदमनामयम् ॥''**

संहितायाः मूलमन्त्रेण अर्थात् प्रकृति-पारायणेन सूर्यलोकस्य प्राप्तिः भवति, पदपारायणेन चंद्रलोकं लभते तथा च क्रमपाठेन वा सन्धिपाठेन अनिर्वचनीयब्रह्मलोकस्य प्राप्तिः भवति । अनेनैव संहितया, पदेन एवं क्रमपारायणेन विविधानां दुर्लभानां लोकानां प्राप्तिः जायते । ततः संहिता, पद एवं क्रमानां पारायणेन त्रिवेणी-स्नानस्य फलमपि लभते । अतः एव संहिता यमुनारूपा, पदपाठः सरस्वतीरूपः तथा च क्रमपाठः गंगारूपो मन्यते । यथा महासमुद्रे क्षिप्तः मृत्तिका सहसा विनश्यति तथैव संहिता-पद-क्रमानां पारायणेन सर्वं दुश्चिरितं नश्यति । तथैव आदित्यपुराणेऽपि कथितं अस्ति यत् - ये श्रेष्ठाः द्विजाः जटादिअष्टौ विकृतीनां पारायणे परायणाः भवन्ति ते श्रेष्ठाः पङ्क्तिपावनरूपाः ज्ञायते ।

## पारायणोपक्रमः

याज्ञवल्क्य-शिक्षायां संहिता-पद-क्रमानां पारायणस्य उपक्रमः प्रदर्शितः -

**''प्रणवं प्राक् प्रयुञ्जीत, व्याहृतीस्तदनन्तरम् ।**

**सावित्रीं चानुपूर्व्येण, ततो वेदादिमारभेत् ॥''**

आदौ सप्रणवव्याहृतिकं सावित्रीगायत्रीमन्त्रं जप्त्वा ततः वक्ष्यमाणानुक्रमेण वेदादीनां पारायणम् उपक्रमेत् ।

## वेद-परम्परा

सम्प्रदायानुसारेण वेद-परम्परा द्विधा विभक्ता - (१) ब्रह्म-परम्परा (२) आदित्य-परम्परा ।

### (१) ब्रह्म-परम्परा

ब्रह्मपरम्परायां प्राप्तः वेदः वेदव्यासो मन्दमतीन् मनुष्यान् विचिन्त्य तत् कृपया चतुर्धा विभज्य ऋग्यजुःसामाथर्वाख्यांश्चतुरो वेदान् पैल-वैशम्पायन-जैमिनिसुमन्तुभ्यः क्रमाद् उपदिदेश ।

**"तदृग्वेदधरः पैलः, सामगो जैमिनिः कविः ।**
**वैशम्पायन एवैको, निष्णातो यजुषामुत ।**
**अथर्वाङ्गिरसामासीत् सुमन्तुर्दारुणो मुनिः ॥"**

(-ना. पु. - १ - ४ - २२)

यज्ञावसरे देवताह्वानं स्तुतिं च उद्दिश्य व्यासः पैलम् ऋग्वेदं पाठयामास, विधिवत् यज्ञ-सम्पादनार्थं वैशम्पायनं यजुः पाठितः, उच्चस्वरेण स्वरबद्धान् मन्त्रानुच्चैर्गानोद्दिश्य व्यासेन कविजैमिनिं सामवेदमध्यापितः । यज्ञस्य निरीक्षणार्थं, कृताकृतवेक्षणार्थं च मुनिना व्यासेन सुमन्तुमुनिम् अथर्ववेदं पाठितः ।

**( २ ) आदित्य-परम्परा**

व्यासो वैशम्पायनाय वेदं प्रोवाच, स स्वशिष्याय याज्ञवल्क्याय । कस्मादपि कारणाद् रुष्टो वैशम्पायनो याज्ञवल्क्यम् उवाच - 'देहि मदधीतं वेदमिति ।' याज्ञवल्क्यो गुरुवचनपालनाय ततोऽधीतं वेदं सद्यो वान्तवान् । अन्ये वैशम्पायनशिष्याः तित्तिरिरूपं धृत्वा याज्ञवल्क्येन वान्तं वेदं गृहीतवन्तः । स एवायं वान्तगृहीतो वेदः कृष्णयजुर्वेदः ।

वैशम्पायने कुपिते ततोऽधीतं वेदं विसृज्य याज्ञवल्क्यः पुनः वेदाधिगतये सूर्यम् आराधयामास, ततश्च वेदमाप, ततोऽयं वेदः शुक्लयजुर्वेदनाम्ना अप्रथत । इति पौराणिकाः वदन्ति । अनेनैव आदित्य-परम्परा प्रारब्धा ।

## शब्दार्थाः

**बहुलः** - प्रचुरतायुक्तः, **आकुलः** - व्याप्तः, **नयते** - प्रापयति, **सूक्ष्मं** - अनिर्वचनीयं यत् ब्रह्मस्वरूपम्, **कालिन्दी** - सूर्यतनया यमुना, **दुश्चरितं** - कुत्सितधर्मवृत्तिम्, **वान्तं** - वमनं ।

## स्वाध्यायः

**१. निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) वेदशब्देन ........................ मंत्रसंहिताः परिग्राह्याः । (तिस्रः, चतस्रः, पञ्चः)

(२) संहिता-सार ........................ । (बहुलः, आकुलः, व्याकुलः)

(३) ........................ मन्त्रसागरः । (विस्तरो, कुत्सरो, दुस्तरो)

(४) वेदाध्ययनं ........................ । (नित्यं, अनित्यं, कृताकृतम्)

(५) ........................ तप आर्जवम् । (स्नानम्, अध्यायः, स्वाध्यायः)

**२. निम्नाङ्कितानां प्रश्नानाम् एकैक वाक्येनोत्तराणि लिखत ।**

(१) संहिता-पदेन के ज्ञायन्ते?

(२) किं नाम पारायणम्?

(३) पारायणं कतिविधम्?

(४) जटादि विकृतयः कति?

(५) सूर्यलोकं केन लभते?

**३. (अ) निम्नाङ्कितमन्त्राणां भावार्थं लिखत ।**

(१) संहिता सार बहुलः पदसंज्ञासमाकुलः ।
क्रमसन्धिसमाकीर्णो, दुस्तरो मन्त्रसागरः ॥

(२) जटामालाशिखारेखा,ध्वजोदण्डोरथोघनः ।
अष्टौविकृतयः प्रोक्ताः, क्रमपूर्वा महर्षिभिः ॥

(३) संहिता नयते सूर्यं,पदं च शशिनः पदम् ।
क्रमश्च नयते सूक्ष्मं, यत् तत् पदमनामयम् ॥

**(ब) निम्नलिखितमन्त्राणां पूर्तिं विधेया ।**

(१) वेदमेव सदाभ्यस्येत् ..................................

(२) वेदानधीत्य वेदौ वा ..................................

(३) प्रणवं प्राक् ..................................

**४. टिप्पणीलेख्याः ।**

(१) पारायण-प्रकाराः

(२) पारायण-फलम्

(३) वेद-परम्परा

**५. शब्दनां विभक्तिपरिचयं यच्छत ।**

(१) विधिना

(२) संहितायाः

(३) अनुष्ठानं

(४) वचनानि

(५) विकृतयः

**६. क्रियापदानां परिचयं लिखत ।**

(१) ज्ञायते

(२) लभ्यन्ते

(३) आवसेत्

(४) गदति

(५) उपदिश्यते

**७. (अ) सन्धिविच्छेदं कुरुत ।**

(१) वेदाध्ययनं

(२) स्वाध्यायान्मा

(३) वेदाधीत्य

(४) वेदमेव

(५) परमिहोच्यते

**(ब) सन्धिमेलनं कुरुत ।**

(१) सम् + आकुलः

(२) दुः + तरः

(३) द्विज + उत्तमः

(४) पदम् + अनामयम्

(५) वेदादिम् + आरभेत्

**छात्र-प्रवृत्तिः**

- छात्राः वेदानां भिन्न-भिन्न परम्परागतमन्त्राणाम् उच्चारणपद्धतेः भिन्नतादर्शकं पत्रं निर्मापयेयुः ।

**विशिष्टज्ञानम्**

- श्रुतौ श्रद्धां बद्ध्वा दृढपरिकरः कर्मसुजनः
  श्रुतौ दढश्रद्धां बद्धा दढपरिकराः भवन्तु ॥

शिवमहिम्नस्तोत्रं-श्लोक-२०

# १७ पुरुषसूक्तस्य पदपाठः

**प्रस्तावना**

**पुरुषं पुरुषसूक्तेन उपतस्थे समाहितः ।**

(श्रीमद्भा. १०/१/२०)

- पुरति अग्रे गच्छतीति - पुरुषः

ज्ञात-अज्ञातसमस्तज्ञानविज्ञानयोः स्रोतरूपाः वेदाः । वेदाः ज्ञानार्णवाः । मानवाः वेदेषु वर्णितमन्त्रपाठेन स्वजीवनस्य धन्यताम् अनुभवन्ति । वेदस्वरूपपयोनिधौ विविधसूक्तानि मणिरूपेण स्थितानि सन्ति । तेषु एकतमं पुरुषसूक्तम् ।

सूक्तशब्दः सु उपसर्गपूर्वकः वच् धातोः क्त प्रत्यये कृते सति सूक्तशब्दो निष्पद्यते । यस्यार्थो भवति सुन्दरकथनम्, वेदमन्त्रसमुदायः

''एकदैवत्य एवं एकार्थप्रतिपादको वैदिकमन्त्रसमूहः सूक्तः ॥''

अस्मिन् पाठे शुक्लयजुर्वेदमाध्यन्दिनीशाखायाः पुरुषसूक्तस्य वर्णनं कृतमस्ति ।

ऋषिभिः वेदानां संरक्षणाय बहवःउपायाः कृतास्सन्ति । वेदमन्त्राणां पठनपद्धतौ भागद्वयं कृतमस्ति ।

(१) प्रकृतिपाठः (२) विकृतिपाठः

- संहितापाठः, पदपाठः, क्रमपाठः - प्रकृतिरुच्यते ।

- जटामालादयः अष्टविकृतयः कथ्यन्ते ।

पाठेऽस्मिन् विशेषरूपेण छात्राणां प्रकृतिपाठे अग्रिमसोपानयुक्तं पुरुषसूक्तस्य पदपाठस्य वर्णनं कृतमस्ति ।

---

## पदपाठपरिचयः

- **अर्थः पदम् ॥३॥२॥ वाजसनेयिप्रातिशाख्यम्**
- **सुप्तिङ्गान्तं पदम् १।४।१४॥ पाणिनि**

  एतयोः सूत्रयोः माध्यमेन पदस्वरूपज्ञानं भवति । अर्थावबोधनाय पाणिन्यादिवैयाकरणानामनुसारं

- **''सुप्तिङ्'' प्रत्यययुक्तशब्दसमूहो 'पद' रूपेण अवगम्यते ।**

  **''अर्थवाचकः अक्षरसमुदायोऽक्षरं वा पदं स्यात् ।''**

- **तच्चतुर्धा ॥८॥४८॥**

  तत्पदं चतुष्प्रकारकं स्यात् ।

- **क्रियावाचकमाख्यातमुपसर्गो विशेषकृत् ॥**

  **सत्वाभिधायकं नाम निपातः पादपूरणः ॥८॥५६॥**

  (१) आख्यातम् (२) उपसर्गः (३) नाम (४) निपातः

- (१) अर्पयतु (२) पाहि **इत्यादि आख्यातम् ।**
- (१) परा (२) उप **इत्यादयो द्वाविंशतिरूपसर्गाः ।**
- (१) देवः (२) सविता **इत्यादीनि नामानि ।**
- (१) वा (२) च (३) उत **इत्यादयो निपाताः ।**

संहितापाठपरम्परानुसारं स्वरवर्णानां सन्धेः विच्छेदं कृत्वा वैदिकमन्त्राणां सस्वरपाठः ''पदपाठः'' कथ्यते । उक्तञ्च शिक्षायाम्

**''नवपदशय्याः एकादशपदभक्तयः''**

## पदपाठनियमाः

⇒ शुक्लयजुर्वेदस्य विविधासु शाखासु प्रातिशाख्यनियमानुसारम् एकाधिकपुनरावर्तितपदानां लोपः भवति । शास्त्रीयपरम्परायां विलुप्तपदान् गलित्पदःइति अभिज्ञायते ।

⇒ पदपाठे प्रत्येकपदानां विच्छेदं कृत्वा उच्चारणं भवति ।यदा उभयोः पदयोः समास भवति तदा तं पदं **'इतिकरणेन'** स्पष्टी क्रियते ।

⇒ प्रातिशाख्यनियमानुसारं भिन्न-भिन्न विभक्तिषु वैवर्ण लोपः, आगमः, वर्णविकारः एवं प्रकृतिभाव आदिषु इतिकरणेन पदस्य मूलस्वरूपं स्पष्टीक्रियते ।

यथा- सहस्रशीर्षेतिसहस्रे शीर्षा एनम् 'अवग्रहः' कथ्यते ।

⇒ पदपाठे स्वरर्णानां सन्धिनां विच्छेदः एवं अवग्रहः आदि विशेषपद्धत्या एतत् संहितापाठात् अधिकं क्लिष्टं भवति। एतेषां नियमानां कारणेन एतत् पदच्छेदेन अपितु पदपाठः उच्यते ।

## ॥ अथपदपाठः ॥

### मन्त्रः- सहस्रशीर्षा... ॥

स॒ह॒स्र॑शी॒र्षेति॑स॒हस्र॑ शीर्षा । पुरु॑षः । स॒ह॒स्रा॒क्षऽइति॑सहस्र अ॒क्षः । स॒ह॒स्र॑पा॒दिति॑स॒हस्र॑ पात् ॥ सः । भूमि॑म्। स॒र्व्वत॑ः । स्पृ॒त्वा । अति॑ । अ॒ति॒ष्ठ॒त् । द॒शा॒ङ्गु॒लमिति॑दश अ॒ङ्गु॒लम् ॥१॥

### मन्त्रः- पुरुषऽएवेदं... ॥

पुरु॑षः । ए॒व । इ॒दम् । सर्व्व॑म् । यत् । भू॒तम् । यत् । च॒ । भा॒व्य॒म् ॥ उ॒त । अ॒मृ॒त॒त्वस्येत्य॑मृत॒ त्वस्य॑। ईशा॑नः । यत् । अन्ने॑न । अ॒ति॒रो॒ह॒तीत्य॑ति॒ रोह॑ति ॥२॥

### मन्त्रः- एतावानस्य महिमा ... ॥

ए॒तावा॑न् । अ॒स्य॒ । म॒हि॒मा । अत॑ः । ज्याया॑न् । च॒ । पूरु॑षः । पुरु॑ष॒ऽइति॒पुरु॑षः ॥ पाद॑ः । अ॒स्य॒ । विश्वा॑ । भू॒तानि॑ । त्रि॒पादिति॑त्रि॒ पात् । अ॒स्य॒ । अ॒मृत॑म् । दि॒वि ॥३॥

**मन्त्रः- त्रिपादूर्ध्व... ॥**

त्रिपादितित्रि पात् । ऊर्द्ध्वः । उत् । ऐत् । पुरुषः । पादः । अस्य । इह । अभवत् । पुनरितिपुनः॥ ततः । व्विर्ष्वङ् । व्वि । अक्क्रामत् । साशनानशनेऽइतिसाशनानशने । अभि ॥४॥

**मन्त्रः- ततोव्विराऽजायत... ॥**

ततः । व्विराडितिवि राट् । अजायत । व्विराजऽइतिवि राजः । अधि । पूरुषः । पुरुषऽइतिपुरुषः ॥ सः । जातः । अति । अरिच्च्यत । पश्श्चात् । भूमिम् । अथोऽइत्यथो । पुरः ॥५॥

**मन्त्रः- तस्माद्यज्ञात्सर्वहुतः ... ॥**

तस्म्मात् । यज्ञात् । सर्व्वहुतऽइतिसर्व्व हुतः । सम्भृतमितिसम् भृतम् । पृषदाज्ज्यमितिपृषत् आज्ज्यम् ॥ पशून्। तान् । चक्क्रे । व्वायव्व्यान् । आरण्ण्याः । ग्राम्म्याः । च । ये ॥॥

**मन्त्रः- तस्माद्यज्ञात्सर्वहुतऽऋचः ... ॥**

ऋचः । सामानि । जज्ज्ञिरे ॥ छन्दाꣳसि । जज्ज्ञिरे । तस्म्मात् । यजुः । तस्म्मात् । अजायत ॥७॥

**मन्त्रः- तस्मार्यश्चाऽअजायन्त... ॥**

तस्म्मात् । अश्श्वाः । अजायन्त । ये । के । च । उभयादतः । उभयदतऽइत्त्युभय दतः ॥ गावः । ह । जज्ज्ञिरे । तस्म्मात् । तस्म्मात् । जाताः । अजावयः ॥८॥

**मन्त्रः- तंयज्ञम्बर्हिषि... ॥**

तम् । यज्ञम् । बर्हिषि । प्र । औक्क्षन्। पुरुषम् । जातम् । अग्ग्रतः ॥ तेन । देवाः । अयजन्त । साद्ध्याः । ऋषयः । च । ये ॥९॥

**मन्त्रः- षत्पुरुषंव्यदधुः... ॥**

यत् । पुरुषम् । व्वि । अदधुः । कतिधा । व्वि । अकल्प्पयन् ॥ मुखम् । किम् । अस्य । आसीत्। बाहूऽइतिबाहू । ऊरूऽइत्त्यूरू । पादौ । उच्च्येतेऽइत्त्युच्च्येते ॥१०॥

**मन्त्रः- ब्राह्मणोस्य... ॥**

ब्राह्मणः । अस्य । मुखम् । आसीत् । बाहूऽइतिबाहू । राजन्न्यः । कृतः ॥ ऊरूऽइत्त्यूरू । तत् । अस्य। यत् । व्वैश्श्यः । पद्भ्यामितिपत् भ्याम् । शूद्रः । अजायत ॥११॥

**मन्त्रः- चन्द्रमामनसो... ॥**

चन्द्रमाः । मनसः । जातः । चक्क्षोः । सूर्य्यः । अजायत ॥ श्रोत्त्रात् । व्वायुः । च । प्राणः । च । मुखात् । अग्ग्निः । अजायत ॥१२॥

**मन्त्रः- नाभ्याऽआसीदन्तरिक्षꣳ... ॥**

नाभ्याः । आसीत् । अन्तरिक्क्षम् । शीर्ष्णः । द्यौः । सम् । अवर्त्तत ॥ पद्भ्यामितिपत् भ्याम् । भूमिः। दिशः । श्रोत्त्रात् । तथा । लोकान् । अकल्प्पयन् ॥१३॥

**मन्त्रः- यत्पुरुषेणहविषा... ॥**

यत् । पुरुषेण । हविषा । देवाः । यज्ञम् । अतन्वत ॥ व्वसन्तः । अस्य । आसीत् । आज्ज्यम् । ग्रीष्मः । इद्ध्मः । शरत् । हविः ॥१४॥

**मन्त्रः- सप्तास्यासन्परिधयस्त्रिः ... ॥**

सप्त । अस्य । आसन् । परिधयऽइतिपरि धयः । त्रिः । सप्त । समिधऽइतिसम् इधः । कृताः ॥ देवाः । यत् । यज्ञम् । तन्वानाः । अबध्नन् । पुरुषम् । पशुम् ॥१५॥

**मन्त्रः- यज्ञेनयज्ञमयजन्त... ॥**

यज्ञेन । यज्ञम् । अयजन्त । देवाः । तानि । धर्म्माणि । प्रथमानि । आसन् ॥ ते । ह । नाकम्। महिमानः । सचन्त। यत्र । पूर्व्वे । साद्ध्याः । सन्ति । देवाः ॥१६॥

**मन्त्रः- अद्भ्यःसम्भृतः ॥**

अद्भ्यऽइत्यत् भ्यः । सम्भृतऽइतिसम् भृतः । पृथिव्व्यै । रसात् । च । व्विश्श्वकर्म्मणऽइतिविश्श्व कर्म्मणः। सम् । अवर्त्तत । अग्ग्रे ॥ तस्य । त्वष्टा । व्विदधदितिवि दधत् । रूपम् । एति । तत् । मर्त्त्यस्य । देवत्त्वमितिदेव त्वम् । आजानमित्त्या जानम् । अग्ग्रे ॥१७॥

**मन्त्रः- व्वेदाहमेतम्पुरुषं... ॥**

व्वेद । अहम् । एतम् । पुरुषम् । महान्तम् । आदित्त्यवर्ण्णमित्त्यादित्त्य व्वर्ण्णम् । तमसः । परस्तात् ॥ तम् । एव । व्विदित्त्वा । अति । मृत्युम् । एति । न । अन्यः । पन्थाः । व्विद्यते । अयनाय ॥१८॥

**मन्त्रः- प्रजापतिश्चरहितगर्ब्भे... ॥**

प्रजापतिरितिप्प्रजा पतिः । चरति । गर्ब्भे । अन्तः । अजायमानः । बहुधा । व्वि । जायते ॥ तस्य। योनिम् । परि । पश्श्यन्ति । धीराः । तस्मिन् । ह । तस्थुः । भुवनानि । व्विश्श्वा ॥१९॥

**मन्त्रः- यो देवेब्भ्यऽआतपति... ॥**

यः । देवेब्भ्यः । आतपतीत्त्या तपति । यः । देवानाम् । पुरोहितऽइतिपुरः हितः ॥ पूर्व्वः । यः । देवेब्भ्यः । जातः । नमः । रुचाय । ब्राह्म्मये ॥२०॥

**मन्त्रः- रुचम्ब्राह्मञ्जनयन्तो... ॥**

रुचम् । ब्राह्म्मम् । जनयन्तः । देवाः । अग्ग्रे । तत् । अब्रुवन् ॥ यः । त्वा । एवम् । ब्राह्म्मणः। व्विद्द्यात् । तस्य । देवाः । असन् । व्वशे ॥२१॥

**मन्त्रः- श्रीश्चतेलक्ष्मीश्चपत्न्या... ॥**

श्रीः । च । ते । लक्क्ष्मीः । च । पत्न्यौ । अहोरात्त्रेऽइत्त्यहोरात्त्रे । पाश्श्र्वेऽइतिपाश्श्र्वे । नक्क्षत्त्राणि। रूपम् । अश्श्विनौ । व्यात्तमितिवि आत्तम् ॥ इष्ण्णन् । इषाण । अमुम् । मे । इषाण । सर्व्वुसर्व्वलोकमितिसर्व्व लोकम् । मे । इषाण ॥२२॥

## पदपाठफलम्

**''संहितापाठतः पुण्यं द्विगुणं पदपाठतः ।''**

**''पदं च शशिनः पदम् ।''**

ऐतरेयआरण्यके एवं ऋग्वेदप्रातिशाख्ये विविधसंहिताविकृतिपाठानां फलस्य वर्णनंकृतमस्ति । यथा अन्नकामना परिपूर्तिहेतोः संहितापाठः तथा स्वर्गकामनाहेतोः पदपाठस्य विधानमस्ति । संहितापाठेन यद्पुण्यं लभ्यते तस्माद् द्विगुणं पुण्यं पदपाठेन प्राप्यते । एवञ्च चन्द्रलोकस्यापि प्राप्तिर्भवति ।

### शब्दार्थाः

**अर्णवः** – समुद्रः, **पृषत्** – बिन्दुः, **ऋचः** – ऋग्वेदः, **बर्हिः** – यज्ञाग्निः, **ऊरु** – जंघा, **नाकम्** – स्वर्गम्, **अरण्याः** – अरण्ये भवाः, **वायव्यान्** – वायुवदगुणान्, **जज्ञिरे** – जायन्ते, **अदधुः** – धरन्ति ।

### स्वाध्यायः

**१. निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) वेदाः ......................... । (ज्ञानार्णवाः, विद्यार्णवाः, धनार्णवाः)

(२) जटामालादयः ......................... विकृतयः कथ्यन्ते । (पञ्च, अष्ट, सप्त)

(३) प्रस्तुतप्रकरणे पुरुषसूक्तस्य ......................... पाठस्य वर्णनं कृतमस्ति । (संहिता, पद, क्रम)

(४) व्विराडितिवि ......................... । (पात्, आसीत्, राट्)

(५) विलुप्तपदान् ......................... पदेन अभिज्ञायते । (क्रमिकः, गलित्, उष्णिक्)

**२. निम्नाङ्कितानां प्रश्नानाम् एकैकवाक्येनोत्तराणि लिखत ।**

(१) के पाठाः प्रकृतिपाठाः कथ्यन्ते ?

(२) पदस्य व्याख्यां लिखत ।

(३) पदानां कतिभेदाः सन्ति ।

(४) सूक्तशब्दस्य व्युत्पत्तिं लिखत ।

(५) वेदाः केषां स्त्रोतरूपाः सन्ति ?

**३. निम्नाङ्कितमन्त्राणां पदपाठं लिखत ।**

(१) च॒न्द्रमा॑ः । मन॑सः । ...

(२) यः । दे॒वेभ्य॑ः । ...

(३) पुरु॑षः । ए॒व । ...

**४. टिप्पणीलेख्याः ।**

(१) पदपाठप्रकाराः

(२) पदपाठफलम्

(३) पदपाठनियमाः

**५. निम्नलिखित शब्दनां विभक्ति परिचयं यच्छत ।**

(१) ज्ञानार्णवा:
(२) विकृतय:
(३) चन्द्रमा:
(४) मनस:
(५) प्रथमानि

**६. निम्नलिखितक्रियापदानां परिचयं लिखत ।**

(१) अजायत
(२) अभवत्
(३) आसीत्
(४) अवर्तत
(५) तपति

**७. (अ) सन्धिविच्छेदं कुरुत ।**

(१) पाणिन्यादि
(२) तच्चतुर्धा
(३) एकाधिकम्
(४) नियमानुसारम्
(५) इत्यादीनि

**(ब) सन्धिमेलनं कुरुत ।**

(१) सहस्रपात् + इतिसहस्रपात्
(२) पुन: + आवर्तित
(३) कृता: + सन्ति
(४) पाठे + अस्मिन्
(५) इति + आदयो

**छात्र-प्रवृत्ति:**

- अन्यवेदमन्त्राणां पदपाठनियमानां शुचिनिर्माणं कुर्वन्तु ।

**विशिष्टज्ञानम्**

- यज्ञेनयज्ञमयजन्त- शु.अ. ३१-१६
  यज्ञ द्वारा विष्णुदेवं पूजयत ।

●●●